**भाषा-टीका**—शाल्मली वृक्षकी शीतल छाया होनेसे वह सब वृक्षोंमें श्रेष्ठ है, और वह भुवनवासी देवोंका क्रीडा स्थल है, । वनोंमें जिसप्रकार नन्दनवन उत्तम वन है, इसी प्रकार भगवान् महावीर प्रभु भी केवलज्ञानके कारण श्रेष्ठ हैं, जिससे सर्व्वपदार्थोंका उन्हें प्रत्यक्ष आविर्भाव है । ज्ञानके साथ साथ उनमें यथाख्यात चरित्रमें भी पूर्णश्रेष्ठता प्राप्त है । जोकि आत्माका सहज स्वभाव समन्वित गुण है ॥ १८ ॥

**गुजराती अनुवाद**—शीतल छाया होवाने लीधे शाल्मली वृक्ष सर्व वृक्षोथी श्रेष्ठ छे, ते भुवनवासी देवोनुं क्रीडा स्थान छे, वनोमा जेम नन्दनवन श्रेष्ठ छे, तेमज भगवान् महावीर पण केवलज्ञाने करी सर्वोत्तम छे, जेनाथी सर्व पदार्थोनो प्रत्यक्ष आविर्भाव तेमने थाय छे, ज्ञाननी साथे यथाख्यात चरित्रमां पण तेओ श्रेष्ठ छे के जे आत्मानो सहज स्वभाव छे ॥ १८ ॥

**मूल**

**थणियं व सद्दाण अणुत्तरे उ,**
**चंदो व ताराण महाणुभावे ।**
**गंधेसु वा चंदणमाहु सेट्ठं,**
**एवं मुणीणं अपडिन्नमाहु ॥ १९ ॥**

**संस्कृतच्छाया**

**स्तनितं वा शब्दानामनुत्तरं तु, चन्द्रो वा ताराणां महानुभावः ।**
**गन्धेषु वा चन्दनमाहुः श्रेष्ठम्, एवं मुनीनामप्रतिज्ञमाहुः ॥ १९ ॥**

**सं० टीका**—यथा च शब्दानां मध्ये स्तनितं मेघगर्जितं "स्तनितं गर्जितं मेघनिर्घोषो रसितादि चेत्यमरः" । तदनुत्तरं प्रधानं तुशब्दो विशेषणार्थः, आह च, "समुच्चयेऽवधारणे, नियोगे, प्रशंसायां, उक्तशंकानिवृत्तौ, पादपूरणे, विशेषणार्थे चेति कोषः" । तथा च तारकाणां=नक्षत्रगणानां मध्ये चन्द्रो महानुभावः, "नक्खत्तं, जोति, भं, तारा, ( अपुमे ) तारको इत्यभिधानप्पदीपिका" । सकलरजोनिवृत्तिकारिण्या कान्त्या मनोरमः श्रेष्ठः । गन्धेषु चेति गुणगुणिनोरभेदान्मतुब्लोपाद्वा, गन्धवत्सु मध्ये यथा चंदनं मलयजं गोशीर्षकाख्यं "चन्नं ( नित्थियं ) गंधसारो मलयजो ( प्यथ )" "गोसीसं तलप्पण्णिकं, ( पुमे वा ) हरिचंदनं" "इत्यभिधानप्यदीपिका" । मलयजं मलयपर्वतादौ-जायते तद् वा तज्ज्ञाः श्रेष्ठमाहु । एवं मुनीनां महर्षीणां च मध्ये भगवन्तं । पुनश्च नास्य प्रतिज्ञा इहलोकपरलोकानां शंसिनी

विद्यत इत्यप्रतिज्ञः, इहलोकपरलोकाशंसारहितप्रतिज्ञस्तमेवंभूतं महावीरम् श्रेष्ठमाहुरिति ॥ १९ ॥

**अन्वयार्थ**—[ व ] जैसे [ थणिय ] मेघकी गर्जना [ सद्दाण ] सवशब्दोंम [ अणुत्तर उ ] प्रधान है-सवसे वडकर है, और [ व ] जैसे [ चंदो ] चन्द्रमा [ ताराण ] सव तारोंमें [ महाणुभावे ] उज्वल और मनोहर है, [ वा ] इसीप्रकार [ गंधेसु ] सव सुगन्धित पदार्थोंमें [ चंदणं ] चन्दनको [ सेट्ठं ] अच्छा [ आहु ] कहा है [ एवं ] इसी प्रकार भगवान्को भी [ मुणीणं ] सव मुनिओंमें [ अपडिण्णं ] इस लोक और परलोकको प्रतिज्ञा-कामनासे विरक्त [ आहु ] कहा है ॥ १९ ॥

**भावार्थ**—जैसे सव शब्दोंमें मेघकी गर्जनाका शब्द वडा प्रवल होता है, सवके सव शब्द उससे नीची कक्षामें हैं, तथा सव नक्षत्र मण्डलमें चांद सवमें उज्वल और सुन्दर है, और समस्त सुगन्धित पदार्थोंमें मलयज चन्दन सुरभि और उत्तम है, उसी प्रकार समस्त मुनिओंमें भगवान् महावीर उस समय सवमें प्रधान थे, क्योंकि उनमें आत्मासे भिन्न इसलोक और परलोक संवंधी किसी भी विषयकी कामना न थी ॥ १९ ॥

**भाषा-टीका**—शब्दोंमें मेघकी गर्जनाका शब्द सवसे वडा होता है, असख्य तारों और नक्षत्रोंमें चंद्रमा तेजस्वी शीतल और महानुभाव है, सुगन्ध वस्तुओंमें मलयवनका गोशीर्ष चन्दन श्रेष्ठ होता है । इसी प्रकार मुनि महर्षिगणोंमें भगवान् सवमें विलक्षण श्रेष्ठतापूर्ण थे । उनकी सव प्रतिज्ञाएँ इस लोक और परलोक सम्वन्धी विषयाकांक्षाओंसे रहित थीं ॥ १९ ॥

**गुजराती अनुवाद**—शब्दोमां जेम मेघनी गर्जनानो शब्द, ताराओने विषे जेम चन्द्रमा, अने सुगंधीओमां जेम गोशीर्ष चन्दन श्रेष्ठ छे, तेम मुनि महर्षिगणोमां भगवान् श्रीमहावीर श्रेष्ठ छे, तेमनी सर्व प्रतिज्ञाओ आ लोक अने परलोक सम्वन्धीनी वांछना रहित छे ॥ १९ ॥

## मूल

**जहा सयंभू उदहीण सेट्ठे,**
**नागेसु वा धरणिंदमाहु सेट्ठे ।**
**खोओदए वा रस वेजयंते,**
**तवोवहाणे मुणि वेजयंते ॥ २० ॥**

## संस्कृतच्छाया

यथा स्वयम्भूरुदधीनां श्रेष्ठः, नागेषु वा धरणेन्द्रमाहु श्रेष्ठम् ।
क्षोदोदकं वा रसे वैजयन्तः, तप उपधानेन मुनिर्वैजयन्तः ॥ २० ॥

सं० टीका—यथा स्वयं भवंतीति स्वयंभुवो देवास्तत्रागत्य रमन्त इति, स्वयंभूरमणस्तद्वेष्टकोऽपि. समुद्राणां मध्ये यथा स्वयंभूरमणः समुद्रः, समस्तद्वीपसागरपर्यन्तवर्ती श्रेष्ठः प्रधानो महत्तरः । नागेषु च भुवनपतिविशेषेषु मध्ये धरणेन्द्रं नागानामिन्द्रं यथा श्रेष्ठमाहुः । तथेक्षुरस इवोदकं जलं यस्य सः इक्षुरसोदकः, स यथा रसमाश्रित्येति वृत्ता, वैजयन्तःप्रधानः । स्वगुणैः समुद्राणां पताकेवोपरि स्वयंभूरमणेन्द्रो रसस्य प्रधानः तथैव तप उपधानेन विशिष्टतपोविशेषेण मनुते जगतस्त्रिकालावस्थामिति मुनिर्भगवान् वैजयन्तः प्रधानः समस्तलोकस्य महातपसा वैजयन्तीव सर्वोपरिस्थितः ॥ २० ॥

अन्वयार्थ—[जहा] जैसे [सयंभू] स्वयंभूरमण समुद्र [उदहीण] सब समुद्रोंमें [सेट्ठे] श्रेष्ठ है [वा] तथा [धरणिंदं] धरणेन्द्र [नागेसु] नागकुमार जातिके भवनवासी देवोंमें [सेट्ठं] श्रेष्ठ है [च] और [खोओदए] इक्षुरस [रसवेजयंते] सब रसोंमें उत्तम है, वही प्रकार [तवोवहाणे] उत्तम तपके विधानमें [मुणी] भगवान्‌को [वेजयंते] उत्तम [आहु] कहते हैं ॥ २० ॥

भावार्थ—सब समुद्रोंमें स्वयंभूरमण प्रधान है, क्योंकि वहां अनेक प्रकारके देव आकर क्रीडा करते हैं, तथा अपने निजके स्थान पाते हैं, वही प्रकार सब ऋषि-मुनियोंमें भगवान् श्रेष्ठ थे, क्योंकि वे अनन्त निर्मल निर्दोष उग्र तपस्या लोकोंके लिए प्रकट करते थे। तथा नागकुमारदेवोंमें धरणेन्द्र प्रधान है तथा समस्त रसोंमें इक्षुरस उत्तम है वही प्रकार भगवान् भी सबमें उत्तम थे ॥ २० ॥

भाषाटीका—जैसे सब समुद्रोंमें स्वयम्भूरमण समुद्र सबमें प्रधान है, जिसके ऊपर देवगण क्रीडा करते रहते हैं । इनमें देवोंमें, धरणेन्द्र देव प्रधान है । जैसे और तरह रसोंमें इक्षुरस

शान्तिकर और स्वादिष्ट वस्तु है, इसी प्रकार विशेष तपसे जगत्की तीनों कालकी अवस्थाओंको नित्य और परिवर्तन शील माननेवालोंमें मुनि–भगवान् महावीर प्रभु श्रीध्वजाकी तरह समस्त लोकमें महान् तपसे तप कर निकले हुए कुंदनकी तरह सुशोभित थे ॥ २० ॥

**गुजराती अनुवाद**—सर्व समुद्रोमा स्वयंभूरमण समुद्र मोटो छे, तेन कांठा पर देवताओ वायुसेवन करवाने आवे छे, भुवनपति देवोमा धरणेन्द्र देवराज प्रधान छे, मीठा अने सरस पदार्थोमा शेरडीना रस शान्तिकर तेमज मीष्ट तथा स्वादिष्ट छे, तेवीज रीते तप उपधानथी जगत्नी त्रणे कालनी अवस्थाओने नित्य तेमज परिवर्तनशील माननाराओमा मुनींद्र श्री भगवान् महावीर प्रभु समस्त लोकमां शुद्ध कुन्दननी माफक सुशोभित छे ॥ २० ॥

## मूल

**हत्थीसु एरावणमाहु णाए,**
**सीहो मिगाणं सलिलाण गंगा ।**
**पक्खीसु वा गरुले वेणुदेवो,**
**णिव्वाणवादीणिह णायपुत्ते ॥ २१ ॥**

**( संस्कृतच्छाया )**

**हस्तिष्वैरावणमाहुर्ज्ञातं, सिंहो मृगाणां सलिलानां गंगा ।**
**पक्षिषु वा गरुत्मान् वेणुदेवो, निर्वाणवादिनामिहज्ञातपुत्रः ॥२१॥**

**सं० टीका**—हस्तिषु=करिवरेषु मध्ये, यथैरावतं=शक्रवाहनं ज्ञातं प्रसिद्धं "ऐरावतोऽभ्रमातंगैरावणाभ्रमुवल्लभाः इत्यमरः" । "कुंजरो, वारणो हत्थीत्यभिधानप्पदीपिका" । दृष्टान्तभूतं वा प्रधानमाहुस्तज्ज्ञाः, अथवा हस्तं रत्नं रत्नत्रयं तदस्यास्तीति हस्ती तेषु हस्तिषु, "हत्थो पाणिम्हि, रतने, गणे, सोण्डाय, भन्तरे; इति अभिधानप्पदीपिका" । ऐरावतो नागरंगस्तद्वच्छोभनीयः । अथवा हस्तो नागस्तोयदस्तन्मध्य ऐरावत इवेति । अथवा धृतवस्तुहस्तिषु हि ऐरावतो नारंगो नारंगसदृशः

शान्तिकर और स्वादिष्ट वस्तु है, इसी प्रकार विशेष तपसे जगत्की तीनों कालकी अवस्थाओंको नित्य और परिवर्तन शील मानने वालोंमें मुनि–भगवान् महावीर प्रभु श्रीध्वजाकी तरह समस्त लोकमें महान् तपसे तप कर निकले हुए कुंदनकी तरह सुशोभित थे ॥ २० ॥

**गुजराती अनुवाद**—सर्व समुद्रोमा स्वयंभूरमण समुद्र मोटो छे, तेन कांठा पर देवताओ वायुसेवन करवाने आवे छे, भुवनपति देवोमा धरणेन्द्र देवराज प्रधान छे, मीठा अने सरस पदार्थोमा शेरडीना रस शान्तिकर तेमज मीष्ट तथा स्वादिष्ट छे, तेवीज रीते तप उपधानथी जगत्नी त्रणे कालनी अवस्थाओने नित्य तेमज परिवर्तनशील माननाराओमा मुनींद्र श्री भगवान् महावीर प्रभु समस्त लोकमा शुद्ध कुन्दननी माफक सुशोभित छे ॥ २० ॥

**मूल**

**हत्थीसु एरावणमाहु णाए,**
**सीहो मिगाणं सलिलाण गंगा ।**
**पक्खीसु वा गरुले वेणुदेवो,**
**णिव्वाणवादीणिह णायपुत्ते ॥ २१ ॥**

**( संस्कृतच्छाया )**

**हस्तिष्वैरावणमाहुर्ज्ञातं, सिंहो मृगाणां सलिलानां गंगा ।**
**पक्षिषु वा गरुत्मान् वेणुदेवो, निर्व्वाणवादिनामिहज्ञातपुत्रः ॥२१॥**

**सं० टीका**—हस्तिषु=करिवरेषु मध्ये, यथैरावतं=शक्रवाहनं ज्ञातं प्रसिद्धं "ऐरावतोऽभ्रमातंगैरावणाभ्रमुवल्लभाः इत्यमरः" । "कुंजरो, वारणो हत्थीत्यभिधानप्पदीपिका" । दृष्टान्तभूतं वा प्रधानमाहुस्तज्ज्ञाः, अथवा हस्तं रत्नं रत्नत्रयं तदस्यास्तीति हस्ती तेषु हस्तिषु, "हत्थो पाणिम्हि, रतने, गणे, सोण्डाय, भन्तरे, इति अभिधानप्पदीपिका" । ऐरावतो नागरंगस्तद्वच्छोभनीयः । अथवा हस्तो नागस्तोयदस्तन्मध्य ऐरावत इवेति । अथवा धृतवस्तुहस्तिषु हि ऐरावतो नारंगो नारंगसदृशः

ऐरावतकी तरह उच्च कोटिकी है। अथवा हाथमें जिस प्रकार नारंगी सुन्दर लगती है उसी तरह प्रभु भी जगती-तल पर नारंगीकी तरह भव्य प्राणिओंके हृदयोंमे सुन्दर लगते हैं। हरिणादिक जंगली जीवोंमें सिंह वलिष्ट होता है, इसी तरह भरत क्षेत्रकी अपेक्षा मानवसृष्टिमें वीर प्रभु सिंहकी तरह आत्म-वलसे वलवान् थे, जैसे सव प्रकारके जलोंमें गंगाजल अनेक औषधियोंसे मिश्रित होनेके कारण निर्म्मल है, ऐसे ही प्रभु भी कर्म्म-लेपसे अलिप्त होनेसे अत्यन्त स्वच्छ हैं। और पक्षिओंमें गरुड नामक वेणुदेव प्रधान है, इसी प्रकार निर्व्वाण अर्थात् जो सिद्धक्षेत्र है जहा कर्म्म-मलका अत्यन्त अभाव है, उसका स्वरूप वतानेमे तथा उसके पानेके उपाय वतानेमें ज्ञातपुत्र महावीर प्रभु सर्व्वोपरि हैं। उनका निर्व्वाण सवमें उच्चकोटिका और अकाट्य है ॥ २१ ॥

**गुजराती अनुवाद**—जेम ऊंचा तथा सुन्दर हाथिओमा ऐरावत हाथी निष्कलंक अने उत्तम छे, केमके तेनापर इन्द्र सवारी करे छे, अथवा ज्ञान-दर्शन-चरित्ररूप जे त्रण रत्नो छे, तेमां प्रभु पण हाथीनी पेठे जे ऊंचा छे, अथवा ते रत्नत्रय मनोहर तेमज उपादेय छे, अथवा हस्तिनो अर्थ वादळ पण थाय छे, जेमनी वाणी अमोघ वाणी छे, अने ऐरावत हाथीनी पेठे उच्च कोटिनी छे, अथवा जेम नारंगी हाथमां सुंदर लागे छे तेम प्रभु पण भूतल पर नारंगीनी जेम भव्य प्राणीओना स्वच्छ हृदयने सुंदर लागे छे, मृगादिक जनावरोमां सिंह वलिष्ट होय छे, तेम भरतक्षेत्रनी अपेक्षाए मानव सृष्टिमा श्रीवीरप्रभु कर्मरूप मृगोने जीतवा सारु सिंह समान आत्मवलमां वलवान् छे, अनेक प्रकारनी औषधि-युक्त होवाने लीधे गंगाजल सर्व जलमां निर्मल छे, तेमज प्रभु पण कर्म लेपथी अलिप्त होवाने लीधे अत्यन्त विशुद्ध छे, पक्षिओने विषे गरुड [वेणुदेव] प्रधान छे, तेवीज रीते निर्वाण (सिद्ध) क्षेत्र के ज्या कर्ममळनो अत्यन्त अभाव छे, तेनुं स्वरूप वतावावामा तथा तेनी प्राप्तिनो उपाय वतावावामा ज्ञातपुत्र महावीर प्रभु सर्वोपरि छे ॥२१॥

## मूल

**जोहेसु णाए जह वीससेणे,**
**पुप्फेसु वा जह अरविंदमाहु ।**
**खत्तीणसेट्ठे जह दंतवक्के,**
**इसीण सेट्ठे तह वद्धमाणे ॥ २२ ॥**

संस्कृतच्छाया

योधेषु ज्ञातो यथा विश्वसेनः,
पुष्पेषु वा यथाऽरविन्दमाहुः ।
क्षत्रियाणां श्रेष्ठो यथा दान्तवाक्यः,
ऋषीणां श्रेष्ठस्तथा वर्द्धमानः ॥ २२ ॥

**सं० टीका**—योद्धेषु वीरपुरुषेषु भटेषु मध्ये ज्ञातो विदितो दृष्टान्तभूतो वा विश्वा—सेना हस्त्यश्वरथपदातिप्रभृतिचतुरंगबलसमेता (इति वृद्धा) यस्य स विश्वसेनश्चार्द्धचक्रवर्ती तथाऽसौ प्रधानः । "विष्वक्शेनो जनार्दन" इत्यमरः इत्यनेन विश्वसेनःशब्दः विष्वक्सेनस्यापभ्रंशोऽपिभवितुमर्हतीत्याधुनीका मताः । पुष्पेषु च "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुममित्यमरः ।" तन्मध्ये यथाऽरविन्दं महोत्पलकमल "वा पुंसि पद्मं नलिनमरविन्दं महोत्पलमित्यमरः ।" प्रधानमाहुस्तथा क्षतात् रिपुकृतखण्डान्नष्टकर्म्मणस्त्रायन्त इति क्षत्रिया "राजन्नो, खत्तियो, खत्तं, मुद्धाभिसित्त, बाहुजा इत्यभिधानप्पदीपिका ।" "राजा तु खत्तिये वुत्तो नरनाहे पभुम्हि च" इत्यभिधानप्पदीपिका ।" राजानोऽपि तेषां मध्ये दान्ता उपशान्ता यस्य वाक्येनैव शत्रवस्स दान्तवाक्यश्चक्रवर्ती "सब्बभुम्मो चक्कवत्ती इत्यभिधानप्पदीपिका ।" यथा चासौ श्रेष्ठः प्रधानस्तदेवममुना प्रकारेण बहून् दृष्टान्तान् प्रशस्तान् अनुकूलान् प्रदर्श्याधुना भगवन्तं महावीरजिनवरेन्द्रं दार्ष्टान्तिकं स्वनामग्राहमाह । तथैव ऋषीणां "तापसो तु इसी (रितो) इत्यभिधानप्पदीपिका ।" मध्ये श्रीमद्वर्धमानोऽन्तिमतीर्थंकरो महावीरस्वामी श्रेष्ठः ॥ २२ ॥

**अन्वयार्थ**—[जह] जैसे [जोहेसु] योद्धाओंमें [वीससेणे] कृष्ण-वासुदेव [णाए] प्रधान है [वा] और [पुप्फेसु] फूलोंमें [अरविंद] सहस्रदलकमल सुगन्धित होता है तथा [जह] जैसे [खत्तीण] क्षत्रियोंमें [दंतवक्के] चक्रवर्ती [सेठ्ठे] प्रधान है [तह] उसी प्रकार [इसीण] ऋषियोंमें [वद्धमाणे] भगवान् वर्धमान [सेठ्ठे] प्रधान [आहु] कहलाते थे ॥ २२ ॥

**भावार्थ**—कृष्ण-वासुदेवसे बढकर अन्य कोई योद्धा नहीं है, गन्धयुक्त फूलोंमें कमल अच्छा होता है, समस्त भूमिके क्षत्रियोंमें चक्रवर्ती मुख्य कहलाता है, उसी भांति भगवान्-महावीर उस समयके सब ऋषि-मुनिओंमें सर्वश्रेष्ठ थे ॥ २२ ॥

**भाषा-टीका**—लडाके वीरोंमें पुष्कल हाथी, घोडे रथ पैदल आदि चतुरनीकका आधिपत्य भोक्ता अर्धचक्री वासुदेव कृष्ण प्रधान होता है। फूलोंमें हजार पंखुडियोंवाला अरविंद नामक कमल श्रेष्ठ है। सताए गए वे मनुष्य जिसके कि-शत्रुओंने हृदयके सैंकडों टुकडे कर डाले हैं। तथा उन (कर्म्म रूपी) शत्रुओंसे जो सुरक्षित रखनेवाला हो वही क्षत्रिय होता है। उन्हींको दीप्तिमान् राजा कहा जाता है। उनमें उपशान्त गुण प्रधान होता है जिसके कथन मात्रसे शत्रु शिथिल पड जाते हैं वही चक्रवर्ती भी होता है अत एव वह सबमें मुख्य है। इसी प्रकार इन सुन्दर दृष्टान्तोंको जिनपर अनायासमें ही घटाया जाता हो ऐसे वे हमारे परम पवित्र वर्धमानस्वामी अन्तिम जिन-भगवान् सब ऋषिमहर्षियोंमें श्रेष्ठ थे ॥ २२ ॥

**गुजराती अनुवाद**—योद्धाओमा गज-अश्व-रथ-पायदल, ए चतुरंगी सेनानो अधिपति अर्ध चक्रवर्ती वासुदेवकृष्ण सर्वोत्तम छे, फूलोमा हजार पाखडीवाळुं अरविंद कमल श्रेष्ठ छे, शत्रु (कर्मरूपी शत्रु) थी रक्षा करनार क्षत्रिय कहेवाय छे, तेने दीप्तिमान् राजा कहे छे, तेनामा उपशान्त रस प्रधान होय छे, जेना कथन मात्र थी शत्रु शिथिल थई जाय छे, ते चक्रवर्तीज होय छे, ते सर्वोत्तम छे, तेवीज रीते आवा सुन्दर-दृष्टान्तो जेना पर घटी शके ते अमारा परम पवित्र, पतित पावन, जगदुद्धारक वर्धमान भगवान् अन्तिम जिन सर्व ऋषिओमा श्रेष्ठ छे ॥ २२ ॥

## मूल

**दाणाण सेट्ठं अभयप्पयाणं,**
**सच्चेसु वा अणवज्जं वयंति ।**
**तवेसु वा उत्तमबंभचेरं,**
**लोगुत्तमे समणे णायपुत्ते ॥ २३ ॥**

## संस्कृतच्छाया

दानानां श्रेष्ठं अभयप्रदानं, सत्येषु वाऽनवद्यं वदन्ति ।
तपस्सु वोत्तमं ब्रह्मचर्य्यं, लोकोत्तमः श्रमणो ज्ञातपुत्रः ॥ २३ ॥

**सं० टीका**—तथा च स्वपरानुग्रहार्थमर्थिने दीयत इति दानं, अथवा स्व-स्वत्वनिवृत्तिपूर्वक परस्वत्वोपादानं दानं, यद्वा श्रद्धा भक्तिस्तया परिग्रहममत्वत्यागभावेन कर्म्मनिर्जराऽर्थं चानुकम्पया यद्दीयते तद्दानं;* तच्चतुर्धा वाऽनेकधा, परन्तु तेषां दानानां मध्ये प्राणिनां जीवानां

---

* तुष्टिश्रद्धाविनयभजना लुब्धता क्षान्तिसत्वप्राणत्राणव्यवसितगुणज्ञान-कालज्ञताढ्य । दानाशक्तिर्जननमृतिमिश्श्वास्तिको मत्सरेर्ष्यो, दक्षात्मा यो भवति स नरो दातृमुख्यो जिनोक्त ॥ कालेऽन्नस्य क्षुधमवहितो दित्समानो विधूत्य, नो भोक्तव्यं प्रथममतिथेर्यस्सदा तिष्ठतीति । तस्याप्राप्तावपि गतमलं पुण्यराशिं श्रयन्तं, तं दातारं जिनपतिमते मुख्यमाहुर्जिनेन्द्रा. ॥ सर्व्वाभीष्टा बुधजननुता धर्मकामार्थमोक्षाः, सत्सख्याना वितरणपरा दु खविध्वंसदक्षा । लब्धु शक्या जगति नयतो जीवितव्यं विनैव, तद्दानेन ध्रुवमसुभृता किं न दत्तं ततोऽत्र ॥ कृत्याकृत्ये कलयति यतः कामकोपौ लुनीते, धर्मे श्रद्धा रचयति परा पापबुद्धिं धुनीते । अक्षार्थेभ्यो विरमति रजो हन्ति चित्त पुनीते । तद्दातव्यं भवति विदुषा शास्त्रमत्र व्रतिभ्य ॥ भार्य्या-भ्रातृस्वजनतनयान्यन्निमित्तं त्यजन्ति, प्रज्ञासत्वव्रतसमितयो यद्विना यान्ति नाशम् । क्षुद्दु खेन ग्लपितवपुषो भुंजते च त्वभक्षं, तद्दातव्यं भवति विदुषा सयतायान्न-शुद्धम् ॥ सम्यग् विद्याशमदमतपोध्यानमौनव्रताढ्यं, श्रेयोहेतुर्गतरुजि तनौ जायते येन सर्वम् । तत्साधूना व्यथितवपुषा तीव्ररोगप्रपञ्चैस्तद्रक्षार्थं वितरत जना. प्राशु-क्रान्यौषधानि ॥ सावद्यत्वान्महदपि फल नो विधातुं समर्थं, कन्यास्वर्णद्विपहयध-रागोमहिष्यादिदानम् । त्यक्त्वा दद्याज्जिनमतदयाभेषजाहारदानं, भूत्वाऽप्यल्पं विपुलफलदं दोषमुक्तं वियुक्तम् ॥ नीतिश्रीतिश्रुतिमतिधृतिज्योतिभक्तिप्रतीति, प्रीति-क्षातिस्मृतिरतियतिख्यातिशक्तिप्रगीति । यस्माद्देही जगति लभते नो विना भोजनेन तस्माद्दानं स्युरिह ददता ता. समस्ता. प्रशस्ता ॥ दर्पोद्रेकव्यसनमथनक्रोधयुद्ध-प्रबाधा पापारम्भक्षितिहतधिया जायते तन्निमित्तम् । यत्सगृह्य श्रयति विषयान् दु खितं यत्स्वयं स्याद्दु खाय प्रभवति न तच्छ्लाघ्यतेऽत्र प्रदेयम् ॥ साधू रत्नत्रि-तयनिरतो जायते निर्जिताक्षो, धर्म्मं दत्ते व्यपगतमलं सर्व्वकल्याणमूलम् । राग-द्वेषप्रमृतिमथनं यद्गृहीत्वा विधत्ते, तद्दातव्यं भवति विदुषां देयमिष्ट तदेव ॥ धर्म्मध्यानव्रतसमितिमृत्सयतश्चारु पात्र, व्यावृत्तात्मात्रसहननत. श्रावको मध्यमं तु । सम्यग्दृष्टिर्व्रतविरहित. श्रावक स्याज्जघन्यमेव त्रेधा जिनपतिमते पात्रमाहुः

"सव्वे जीवा वि इच्छन्ति जीविउं न मरीजिउं" वा जीवो जीवितुमिच्छतीत्युक्तत्वाज्जीवितार्थिनां वाऽभयदानं त्राणकारित्वाच्च श्रेष्ठं ।

---

श्रुतज्ञाः ॥ यो जीवानां जनकसदृश. सत्यवाग्दत्तभोजी, सप्रेमस्त्रीनयनविशिखाभिन्नचित्तः स्थिरात्मा, द्वेधा ग्रन्थादुपरममना सर्व्वथा निर्जिताक्षो, दातुं पात्रं व्रतपतिममुं वर्यमाहुर्जिनेन्द्रा ॥ यद्वत्तोयं निपतति घनादेकरूपं रसेन, प्राप्याधारं सगुणमगुणं याति नानाविधित्वम् । तद्वद्दानं सफलमफलं प्राप्यमप्येति मत्वा, देयं दानं समयमभृतां सयताना यतीनाम् ॥ यद्वत्क्षिप्तं गलति सकलं छिद्रयुक्ते घटेऽम्भस्तित्कालावूनिहितमहितं जायते दुग्धमद्यम् । आमामत्रे रचयति भिदा तस्य नाशं च याति, तद्वद्दत्तं विगततपसे केवलं ध्वंसमेति ॥ शश्वच्छीलव्रतविरहिताः क्रोधलोभादिवन्तो, नानारम्भप्रहितमनसो ये मदग्रन्थशक्ता । ते दातार कथमसुखतो रक्षितुं सन्ति शक्ता, नावा लोहं न हि जलनिधेस्तार्य्यते लोहमय्या ॥ क्षेत्रद्रव्यप्रभृतिसमयान् वीक्ष्य बीजं यथोप्तं, दत्ते सस्यं विपुलममलं चारुसंस्कारयोगात् । दत्तं पात्रे गुणवति तथा दानमुक्तं फलाय, सामग्रीतो भवति हि जने सर्व्वकार्यप्रसिद्धि ॥ नानादुःखव्यसननिपुणान्नाशिनोऽतृप्तिहेतुः, कर्म्मारातिप्रचयनपरास्तत्वतो वेत्यभोगान् । मुक्त्वाकाक्षा विषयविषया कर्म्मनिर्नाशनेच्छो, दद्याद्दानं प्रगुणमनसा संयतायापि विद्वान् ॥ यस्मै गत्वा विषयमपर दीयते पुण्यवद्भिः, पात्रे तस्मिन् गृहमुपगते सयमाधारभूते ॥ नो यो मूढो वितरति धने विद्यमानेऽप्यनल्पे, तेनात्मात्र स्वयमपधिया वञ्चितो मानवेन ॥ दीर्घायुष्क: शशिसितयशोव्याप्तदिक्चक्रवालः, सद्विद्याश्रीकुलबलधनप्रीतिकीर्तिप्रताप. । शूरो धीर. स्थिरतरमना निर्भयश्चारुरूपस्त्यागी भोगी भवति भविनां देह्यभीतिप्रदायी । कर्म्मारण्यं दहति शिखिवन्मातृवत्पातिदुःखात्सम्यङ्नीतिं वदति गुरुवत्स्वामिवद्यद्बिभर्ति । तत्वातत्वप्रकटनपटुस्पष्टमाप्नोति पूतं, तत्सज्ज्ञानं विगलितमलं ज्ञानदानेन मर्त्य. ॥ दाता भोक्ता बहुधनयुतः सर्व्वसत्वानुकम्पी, सत्सौभाग्यो मधुरवचनः कामरूपातिशायी; शश्वद्भक्त्या बुधजनगतैः सेवनीयाङ्घ्रियुग्मो; मर्त्यः प्राज्ञो व्यपगतमदो जायतेऽन्नस्य दानात् ॥ रोगैर्वातप्रभृतिजनितैर्वह्निभिर्वाम्बुमग्न सर्व्वाङ्गीणव्यथनपटुभिर्बाधितुं नो स शक्य. । आजन्मान्त परमसुखिना जायते चौपधाना, दाता यो निर्भरकुलवपुःस्थानकान्तिप्रताप ॥ दत्वा दानं जिनमतरुचि. कर्मनिर्नाशनाय, भुक्त्वा भोगांस्त्रिदशवसतौ दिव्यनारीसनाथः मर्त्यावासे वरकुलवपुर्जैनधर्मं विधाय, हत्वा कर्म्म स्थिरतररिपुं मुक्तिसौख्यं प्रयाति ॥

यतः

"यथा मम प्रियाः प्राणास्तथाऽन्यस्यापि देहिनः ।
इति मत्वा न कर्तव्यो, घोरप्राणिवधो बुधैः ॥"

अन्यच्च—

"अहिंसा परमो धर्म्मो, हिंसा सर्वत्र निन्दिता"

इति श्लोकमर्धमभ्यस्य स्वमनसि सदैव दयैव धारणीया, यदि कोऽपि लोभावेशेन रसनातृप्तये धनार्जनाशया विजयाभिलाषेण च आमोदप्रमोदार्थं जन्तून्निहन्यात्तदा तेषां नरकपतनमवश्यं भावि । पातञ्जलयोगदर्शनादावपि चाहिंसायामेव प्रमुखत्वम्, यथाह—

"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः"

अहिंसा—सत्यमित्यादियमास्तेषां मध्येऽहिंसैव प्राथमिकी;

पुनश्च—

"वितर्कबाधने प्रतिपक्षभावनम्"

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदु-मध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ।

तथा चान्यदपि—

"अहिंसा प्रतिष्ठायां तत्सन्निधाने वैरत्यागः ।" तद्विपक्षिणी हिंसा तस्य लक्षणं यथा—

"प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा"

प्रमत्तो यः कायवाङ्मनोयोगैः प्राणव्यपरोपणं करोति सा हिंसा । हिंसा, मारणं, प्राणातिपातः, प्राणवधो, देहान्तरसंक्रामणं, प्राणव्यपरोपणमित्यनर्थान्तरम् । न हिंसाऽहिंसा । इति तत्वार्थसूत्रम्, तथा च योगसूत्रस्य व्यासकृतभाष्येऽपि 'तत्राऽहिंसा सर्वथा सर्वदा सर्वभूतानामभिद्रोहः ।'

तथैव याज्ञवल्क्यसंहितायाम्—

"कर्म्मणा मनसा वाचा, सर्वभूतेषु सर्वदा,
अक्लेशजननं प्रोक्तमहिंसत्वेन योगिभिः।"

तस्यां स्मृतावाचाराध्याये—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
दानं दया दमः शान्तिः, सर्वेषां धर्मसाधनम्॥

"मा हिंसीᳲ पुरुषं जगदिति" यजुर्वेदसंहितायां षोडशोऽध्याय-स्तृतीयमन्त्रः।

मा हिंस्यात् सर्वाभूतानीति 'शतपथे'।

तथा च मनुः—पंचमाध्याये

"योऽहिंसकानि भूतानि, हिनस्त्यात्महितेच्छया,
स जीवँश्च मृतश्चैव, न कचित्सुखमेधते" ॥ ४५ ॥

पुनश्च मनुः—

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
अहिंसा सत्यमक्रोधो, दशकं धर्मलक्षणम्॥"

तथा च महाभारते—

"अहिंसा परमो धर्मो हिंसाऽधर्मस्तथाविधः।
सत्यं तेऽहं प्रवक्ष्यामि, यो धर्मः सत्यवादिनाम्॥"

धर्मिजनानामुत्कृष्टं प्राथमिकं धर्मन्त्वहिंसैवेति यथा—

"अहिंसा परमो धर्मस्तथाऽहिंसा परो दमः।
अहिंसा परमं दानमहिंसा परमं तपः॥"

"अहिंसा परमो यज्ञस्तथाऽहिंसा परं फलम्।
अहिंसा परमं मित्रमहिंसा परमं सुखम्॥"

"सर्वयज्ञेषु वा दानं, सर्वतीर्थेषु वा स्तुतम् ।
सर्वदानफलं वापि, नैव तुल्यमहिंसया ॥"

तथाहि नियमसारे—

कुलजोणिजीवमग्गण-ठाणाइसु जाणऊण जीवाणं ।
तस्सारंभनियत्तणपरिणामो होइ पढमवदं ॥ ५६ ॥
कुलयोनिजीवमार्गणास्थानेषु ज्ञात्वा जीवानाम् ।
तस्यारंभनिवृत्तिपरिणामो भवति प्रथमव्रतम् ॥ ५६ ॥

कुलविकल्पो योनिविकल्पश्च जीवमार्गणस्थानविकल्पाश्च प्रागेव प्रतिपादितास्तत्रैव तेषां भेदान् बुध्वा तद्रक्षापरिणतिरेव भवत्यहिंसा । तेषां मृतिर्भवतु वा न वा, प्रयत्नपरिणाममन्तरेण सावद्यपरिहारो नास्ति । अतः प्रयत्नपरेऽहिंसाव्रतं भवतीति ।

तथा चोक्तं श्रीसमन्तभद्रस्वामिना—

"अहिंसा भूतानां जगति विदितं ब्रह्म परमं,
न सा तत्रारम्भोऽस्त्यणुरपि च यत्राश्रमविधौ ।
ततस्तत्सिद्ध्यर्थं परमकरुणो ग्रन्थमुभयं,
भवानेवात्याक्षीन्न हि विकृतिवेषोपधिरतः ॥"

मुनीनामहिंसा सर्वथा पालनीया-हिंसायाः फलं दुष्परिणामात्मकं परिजानीहि यथा—

"पंगुकुष्ठिकुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां, हिंसां संकल्पतस्त्यजेत् ॥"
"आत्मवत्सर्वभूतेषु, सुखदुःखे प्रियाप्रिये,
चिन्तयन्नात्मनोऽनिष्टां, हिंसामन्यस्य नाचरेत् ।"

**यदाहुर्लौकिका अपि ।**

"श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्य्यताम् ।
आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥"

**राज्यादधिकं प्राणाः प्रियाः ।** यथा—

"प्राणी प्राणितलोभेन, यो राज्यमपि मुञ्चति ।
तद्वधोत्थमघं सर्वोर्वीदानेऽपि न शाम्यति ॥"

"मार्य्यमाणस्य हेमाद्रिं, राज्यं वाऽथ प्रयच्छतु ।
तदनिष्टं परित्यज्य, जीवो जीवितुमिच्छति ॥"

"दीर्य्यमाणः कुशेनापि, यः स्वांगे हन्त दूयते ।
निर्मन्तून् स कथं जन्तूनन्तयेन्निशितायुधैः ॥"

तथोक्तं—

"रसातलं यातु यदत्र पौरुषं, क्व नीतिरेषाऽशरणो ह्यदोषवान्;
निहन्यते यद्बलिनातिदुर्बलो, हहा महाकष्टमराजकं जगत् ॥"

पुनश्च—"म्रियस्वेत्युच्यमानोऽपि, देही भवति दुःखितः ।
मार्य्यमाणः प्रहरणैर्दारुणैः स कथं भवेत् ॥"

**पुनरपि हिंसकान्निन्दति—**

"कुणिर्वरं वरं पंगुरशरीरी वरं पुमान् ।
अपि सम्पूर्णसर्वांगो, न तु हिंसा परायणः ॥"

**स्वार्थिकी हिंसाऽपि हानीया,** यथा—

"हिंसा विघ्नाय जायेत, विघ्नशान्त्यै कृतापि हि ।
कुलाचारधियाऽप्येषा, कृता कुलविनाशिनी ॥"

"अपि वंशक्रमायातां, यस्तु हिंसां परित्यजेत् ।
स श्रेष्ठः सुलस इव, कालसौकरिकात्मजः ॥"

॥ हिंसां कुर्वन्न विशोधयति निजात्मानम् ॥

"दमो देवगुरूपास्तिर्दानमध्ययनं तपः ।
सर्वमप्येतदफलं, हिंसां चेन्न परित्यजेत् ॥"

॥ शास्त्रे सूक्ष्महिंसां धर्मार्थं प्ररूपकोऽपि कुशास्त्रः ॥

"विश्वस्तो मुग्धधीर्लोकः, पात्यते नरकावनौ ।
अहो नृशंसैर्लोभान्धैर्हिंसाशास्त्रोपदेशकैः ॥"

अहिंसामाहात्म्यम्—

"मातेव सर्वभूतानामहिंसा हितकारिणीः ।
अहिंसैव हि संसारमरावमृतसारिणिः ॥"
"अहिंसा दुःखदावाग्निप्रावृषेण्यघनावली ।
भवभ्रमिरुगार्तानामहिंसा परमौषधिः ॥"

अस्याः फलम्

"दीर्घमायुः परं रूपमारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं, किमन्यत्कामदैव सा ॥"

अत्रान्तरे—

हेमाद्रिः पर्वतानां हरिरमृतभुजां चक्रवर्ती नराणां,
शीतांशुर्ज्योतिषां स्वस्तरुरवनिरुहां चण्डरोचिर्ग्रहाणाम् ॥
सिन्धुस्तोयाशयानां जिनपतिरसुरामर्त्यमर्त्याधिपानां,
यद्वत्तद्वद्व्रतानामधिपतिपदवीं यात्यहिंसा किमन्यत् ॥

अत एव प्राणवियोगानुकूलो व्यापारो हिंसा सर्वशास्त्रे निषिद्धैव । जैनैरपि प्राणिनामतिपातो दुःखं प्राणातिपातो विरतिरूपः सर्वतः साधूनां, देशतः श्रावकाणां चेति भावः । जीवानां जीवनवल्लभत्वाद्यथाऽऽह—

"दीयते म्रियमाणस्य, कोटिर्जीवितमेव वा,
धनकोटिं परित्यज्य, जीवो जीवितुमिच्छति ॥"

**अत्राभयदानप्रदानप्राधान्यख्यापनार्थमुदाहरणं चेदम् ।**

वसन्तपुरेऽरिदमननामा राजाऽऽसीत् स कदाचित्प्रासादस्थो हि चतुर्वधूसमेतश्च क्रीडति स्म । ताभिरपि स्वस्वकलाभिर्महीपं प्रमोदयित्वा वरो लब्धः । पुनश्च राज्ञीभी राज्ञि स वरो न्यासीकृतः । एकदा कश्चिच्चौरो रक्तश्यामकरवीरकृतमुण्डमालो रक्तपरिधानः प्रहत-वध्यडिण्डिमो राजमार्गेण नीयमानः राजपत्नीभिर्दृष्टो नृपेण सह दृष्टश्च पृष्टं, 'किमनेनाकारी'ति, तदैकेन राजपुरुषेणावेदितं, यथानेन परद्रव्याद्यपहारेण राजविरुद्धं धर्मविरुद्धं च कर्म कृतं तस्य परिणामस्वरूपो राज्ञा प्राणदण्डो दत्तश्चास्ते, ततस्तन्मध्य एकया महत्या राज्या नृप-पार्श्वे पूर्वदत्तो वरो याचित एकदिनं चोरोऽयं मोच्यो, यथाऽहमुप-करोमीति । वरं प्राप्य च भोजनादिना स्वागतं कृत्वा स्वर्णखण्डसहस्र-दानैस्तुष्टीकृतः सः । द्वितीयदिने द्वितीयया लक्षधनैः सत्कृतः । तृती-यया कोटिमितैः स्वागतीकृतः । चतुर्थ्या तु राजानुमत्याऽऽमरणाद्र-क्षितः । अभयवचनं दापितमभयदानेन ततस्तास्तामुपहस्याहुः । त्वयास्य किं दत्तम् । तयोक्तं मया यद्दत्तं तत्काभिरपि न दत्तं । एवं तासां पारस्परिकेऽधिकोपकारविषये विवादे न्यायार्थं राजाऽऽकारितस्ततो राज्ञोपगम्य कलहकारणं पृष्टं, तदा ताभिरावेदितं, अस्माकं मध्ये केनाधिकमुपकृतम् । राज्ञा स एव चोर आहूतः पृष्टश्चेति यथा त्वया-कस्या उपकारोऽमानितः । तेनाऽभाणि, 'चतुर्थ्या मात्राऽभयं दापयित्वा निर्भयः कृतः । अतस्तस्या बहूपकारं मन्ये,' सर्वदानानां मध्येऽभय-दानस्यप्रधानत्वात् ।

तथा च सत्येषु वाक्येषु यदनवद्यं पापरहितं परपीडाऽनुत्पादकं वचनं तच्छ्रेष्ठं वदन्ति । यथाह दशवैकालिके—

"तहेव काणं काणेति, पंडगं पंडगं ति वा
वाहियं वावि रोगित्ति; तेण चोरेति नो वए ।"

**तथा च मनुः ।**

"सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं तन्नानृतं ब्रूयादिति" ।

**एवमेव तत्वार्थसूत्रे—**

असदभिधानमनृतम् ॥ ९ ॥ ७ ॥

असदिति सद्भावप्रतिषेधोऽर्थान्तरं गर्हा च । तत्र सद्भावप्रतिषेधो नाम सद्भूतनिन्हवोऽभूतोद्भावनं च । तद्यथा नास्त्यात्मा, नास्तिपरलोकः, इत्यादि भूतनिन्हवः । श्यामाकतण्डुलमात्रोऽयमात्मा अंगुष्ठपर्वमात्रोऽयमात्मा, आदित्यवर्णो, निष्क्रिय इत्येवमाद्यमभूतोद्भावनम् । अर्थान्तरं यो गां ब्रवीत्यश्वमश्वं च गामिति । गर्हेति हिंसापारुष्यपैशुन्यादियुक्तं वचः सत्यमपि गर्हितमनृतमेवास्तीति भावः ।

**एतन्मध्य एतत्प्रमाणानि—यथा—**

"क्रोधलोभमदद्वेषरागमोहादि कारणैः, असत्यस्य परित्यागः सत्याणुव्रतमुच्यते ।" "हासकर्कशपैशुन्यनिष्ठुरादिवचो मुचः । द्वितीयाणुव्रतं पूतं, लभंते देहिनः स्थितिम् ॥"

"यद्वदन्ति शठा धर्म्मं, यन्म्लेच्छेष्वपि निन्दितम् ।
वर्जनीयं त्रिधा वाक्यमसत्यं तद्धितोद्यतैः ॥"

**पुनर्यत्रासत्यप्रसंगः समजनि तत्र मौनं कार्यं परमसत्यं न वाच्यं, यथा हि सागारधर्मामृते—**

"आवश्यके मलक्षेपे, पापकार्ये च वान्तिवत्,
मौनं कुर्वीत शश्वद्वा, भूयो वाग्दोषविच्छिदे ।"

**मौनमाहात्म्यं यथा—**

"सन्तोषं भाव्यते तेन, वैराग्यं तेन दर्श्यते ।
संयमः पोष्यते तेन, मौनं येन विधीयते ॥"

"लौल्यत्यागात्तपोवृद्धिरभिमानस्य रक्षणम् ।
ततश्च समवाप्नोति, मनः सिद्धिं जगत्रये ॥"

"वाणी मनोरमा तस्य, शास्त्रसन्दर्भगर्भिता ।
आदेया जायते येन, क्रियते मौनमुज्ज्वलम् ॥"

"पदानि यानि विद्यन्ते, वन्दनीयानि कोविदैः ।
सर्वाणि तानि लभ्यन्ते, प्राणिना मौनकारिणा ॥"

"न सार्वकालिके मौने, निर्वाहव्यतिरेकतः ।
उद्योतनं परं प्राज्ञैः, किंचनापि विधीयते ॥"

**सत्याणुव्रतरक्षणार्थमाह—**

"कन्यागोक्ष्मालीककूटसाक्ष्यन्यासापलापवत् ।
स्यात्सत्याणुव्रती सत्यमपि स्वान्यापदे त्यजन् ॥"

**नियमसारेऽप्येवम्—**

"रागेण वा दोसेण वा मोहेण वा मोसभासऽपरिणामं ।
जो पजहदि साहु सया विदियवयं होइ तस्सेव" ॥ ५७ ॥

{ रागेण वा द्वेषेण वा मृषाभाषा परिणामं ।
य: प्रजहाति साधुः सदा द्वितीयव्रतं भवति तस्यैव }

अत्र मृषापरिणामः सत्यप्रतिपक्षः, स च रागेण वा द्वेषेण वा

मोहेन वा जायते तदा यः साधुः आसन्नभव्यजीवस्तं परिणामं परित्यजति तस्यैव द्वितीयं व्रतं भवतीति ।

"व्यक्तिव्यक्तं सत्यमुच्चैर्जपन् यः। स्वर्गस्त्रीणां भूरिभोगैकभाक् स्यात् ॥
अस्मिन् पूज्यः सर्वदा सर्वसद्भिः, सत्यात्सत्यं चान्यदस्ति व्रतं किम् ॥"

अलीकफलमुपदर्शयति यथा—

"मन्मनत्वं काहलत्वं, मूकत्वं मुखरोगिताम् ।
वीक्ष्यासत्यफलं कन्यालीकाद्यसत्यमुत्सृजेत् ॥"

"मूकाजडाश्च विकला, वाग्घीना वाग्जुगुप्सिताः ।
पूतिगन्धमुखाश्चैव, जायन्तेऽनृतभाषिणः ॥"

पुनश्च प्रतिषेधमाह—

"सर्वलोकविरुद्धं यद्यद्विश्वसितघातकम् ।
यद्विपक्षश्च पुण्यस्य, न वदेत्तदसूनृतम् ॥"

पुनश्च—

"असत्यतो लघीयस्त्वमसत्याद्वचनीयता ।
अधोगतिरसत्याच्च, तदसत्यं परित्यजेत् ॥"

"असत्यवचनं प्राज्ञः, प्रमादेनापि नो वदेत् ।
श्रेयांसि येन भज्यन्ते, वात्ययेव महाद्रुमाः ॥"

॥ यदाहुर्महर्षयः सय्यम्भवाः, दशवैकालिके ॥

"अइअम्मि य कालम्मि, पच्चुप्पण्णमणागए,
जमट्ठं तु न जाणेज्जा, एवमेअं ति णो वए ।"

{अतीते च काले, प्रत्युत्पन्नमनागते,
यमर्थं तु न जानीयात्, 'एवमेतत्' इति नो वदेत् ।}

"अइअम्मि य कालम्मि, प्पच्चुप्पण्णमणागए ।
जत्थ संका भवे तं तु, एवमेअं ति णो वए ।"
"अतीते च काले, प्रत्युत्पन्नमनागते, ॥
यत्र शंका भवेत्तत्तु, 'एवमेतत्' इति नो वदेत् ॥"

{ अइअम्मि य कालम्मि, प्पच्चुप्पन्नमणागए
निस्संकिअं भवे जं तु, एवमेअं तु निद्दिसे । }

"अतीते च काले, प्रत्युत्पन्नमनागते ॥
निश्शंकितं भवेद्यत्तु, 'एवमेतत्' तु निर्दिशेत् ॥"

**पुनरप्यैहिकान् दोषानाह—**

"असत्यवचनाद्वैरविषादाप्रत्ययादयः ।
प्रादुःषन्ति न के दोषाः, कुपथ्याद्व्याधयो यथा ॥"
"निगोदेष्वपि तिर्य्यक्षु, तथा नरकवासिषु ।
उत्पद्यन्ते मृषावादप्रसादेन शरीरिणः ॥"
"अल्पादपि मृषावादाद्रौरवादिषु संभवः ।
अन्यथा वदतां जैनीं, वाचं त्वहह का गतिः ॥"
"ज्ञानचारित्रयोर्मूलं, सत्यमेव वदन्ति ये ।
धात्री पवित्री क्रियते, तेषां चरणरेणुभिः ॥"
"अलीकं ये न भाषन्ते, सत्यव्रतमहाधनाः ।
नापराद्धुमलं तेभ्यो, भूतप्रेतोरगादयः ॥"
"शिखी मुण्डी जटी नग्नश्चीवरी यस्तपस्यति ।
सोऽपि मिथ्या यदि ब्रूते, निन्द्यः स्यादन्त्यजादपि ॥"
"एकत्रासत्यजं पापं, पापं निश्शेषमन्यतः ।
द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते ॥"

"पारदारिकदस्यूनामस्ति काचित्प्रतिक्रिया ।
असत्यवादिनः पुंसः, प्रतीकारो न विद्यते ॥"
"कुर्वन्ति देवा अपि पक्षपातं, नरेश्वराः शासनमुद्वहन्ति ।
शीती भवन्ति ज्वलनादयो यत्तत् सत्यवाचां फलमामनन्ति ॥"

तथा च ज्ञानार्णवेऽप्याह—

"यः संयमधुरां धत्ते, धैर्यमालम्ब्य संयमी,
स पालयति यत्नेन, वाग्वने सत्यपादपम् ।"
"अहिंसाव्रतरक्षार्थं, यमजातं जिनैर्मतम् ।
नारोहति परां कोटिं, तदेवासत्यदूषितम् ॥"
"असत्यमपि तत्सत्यं, यत्सत्वाशंसकं वचः ।
सावद्यं यच्च पुष्णाति, तत्सत्यमपि निन्दितम् ॥"
"अनेकजन्मक्लेशानां, शुद्ध्यर्थं यस्तपस्यति ।
सर्वं सत्वहितं शश्वत्स ब्रूते सूनृतं वचः ॥"
"सूनृतं करुणाक्रान्तमविरुद्धमनाकुलम् ।
अग्राम्यं गौरवाश्लिष्टं, वचः शास्त्रे प्रशस्यते ॥"
"मौनमेव हितं पुंसां, शश्वत्सर्वार्थसिद्धये ।
वचो वाचि प्रियं तथ्यं, सर्वसत्वोपकारि यत् ॥"
"असद्वदनवल्मीके, विशाला विषसर्पिणी,
उद्वेजयति वागेव, जगदन्तर्विषोल्बणा ॥"
"पृष्टैरपि न वक्तव्यं, न श्रोतव्यं कथंचन ।
वचः शंकाकुलं पापं, दोषाढ्यं चाभिसूयकम् ॥"
"मर्म्मच्छेदि मनःशल्यं, च्युतस्थैर्यं विरोधकम् ।
निर्दयं च वचस्त्याज्यं, प्राणैः कण्ठगतैरपि ॥"

"धर्मनाशे क्रियाध्वंसे, सुसिद्धान्तार्थविप्लवे ।
अपृष्टैरपि वक्तव्यं, तत्स्वरूपप्रकाशने ॥"
"या मुहुर्मोहयत्येव, विश्रान्ता कर्णयोर्जनम् ।
विषमं विषमुत्सृज्य, साऽवश्यं पन्नगी न गीः ॥"
"न तथा चन्दनं चन्द्रो, मणयो मालतीस्रजः ।
कुर्वन्ति निर्वृतिं पुंसां, यथा वाणी श्रुतिप्रिया ॥"
"अपि दावानलप्लुष्टं, शाड्वलं जायते वनम् ।
न लोकः सुचिरेणापि, जिह्वानलकदर्थितः ॥"
"सतां विज्ञाततत्त्वानां, सत्यशीलावलम्बिनाम् ।
चरणस्पर्शमात्रेण, विशुद्ध्यति धरातलम् ॥"
"नृजन्मन्यपि यः सत्यप्रतिज्ञाप्रच्युतोऽधमः ।
स केन कर्म्मणा पश्चाज्जन्मपङ्कात्तरिष्यति ॥"
"खण्डितानां विरूपाणां, दुर्विधानां च रोगिणाम् ।
कुलजात्यादिहीनानां, सत्यमेकं विभूषणम् ॥"
"न हि स्वप्नेऽपि संसर्गमसत्यमलिनैः सह ।
कश्चित्करोति पुण्यात्मा, दुरितोल्मुकशंकया ॥"
"सुतस्वजनदारादिवित्तबन्धुकृतेऽथवा ।
आत्मार्थे न वचोऽसत्यं, वाच्यं प्राणात्ययेऽपि च ॥"

इत्यादिप्रमाणैः सत्यमनवद्यं पापरहितमेव श्रेष्ठम् ॥

(अथ ब्रह्मचर्यमाह—)

तपस्सु चेच्छाया निरोधव्यापारेषु द्वादशप्रकारेषु मध्ये यथैवोत्तमं नवविधब्रह्मचर्यगुप्त्युपेतं ब्रह्मचर्यं प्रधानं भवति । कमनीयकामिनी-मनोहराङ्गनिरीक्षणद्वारेण समुपजनितकौतूहलचित्तवाञ्छापरित्यागेनाथवा

स्ववेदोदयाभिधाननोकषायतीव्रोदयेन संजातमैथुनसंज्ञापरित्यागलक्षण-शुभपरिणामेन च ब्रह्मचर्य्यं श्रेष्ठं भवति सर्वेषु तपस्स्विति भावः ।

आह च—

"भवति तनुविभूतिः कामिनीनां विभूतिं, स्मरसि मनसि कामिंस्त्वं तदा मद्वचः किम्; सहजपरमतत्त्वं स्वस्वरूपं विहाय व्रजसि विपुलमोहं हेतुना केन चित्तम् ।"

॥ अब्रह्म दोषा यथा— ॥

"सन्तापरूपो मोहांगसादतृष्णानुबन्धकृत् ।
स्त्रीसम्भोगस्तथाप्येष, सुखं चेत्का ज्वरेऽक्षमा ॥"

॥ परदाररतौ सुखाभावः, अनायुष्यकारित्वं च ॥ यथा—

"न हीदृशमनायुष्यं, लोके किञ्चन विद्यते ।
यादृशं पुरुषस्येह, परदाराभिमर्शनम् ॥"

अथ ब्रह्मचर्य्यमाहात्म्यमाह—

"स्वस्त्रीमात्रेऽपि सन्तुष्टो, नेच्छेद्योऽन्याः स्त्रियः सदा ।
सोऽप्यद्भुतप्रभावः स्यात्किं वर्ण्यं वर्णिनः पुनः ॥"

॥ ब्रह्मचारिणीं सतीं दृष्टान्तेन स्पष्टयति— ॥

"रूपैश्वर्य्यकलावर्य्यमपि सीतेव रावणम् ।
परपूरुषमुज्झन्ती, स्त्री सुरैरपि पूज्यते ॥"

अन्यच्च तत्त्वार्थसूत्रे—

स्त्रीमैथुनमब्रह्म— ॥ ११-७

स्त्रीपुंसयोर्मिथुनभावो मिथुनकर्म्म वा मैथुनं,

तदब्रह्म—

अन्यच्चापि—

"मातृस्वसृसुतातुल्या, निरीक्ष्य परयोषितः ।
स्वकलत्रेण यस्तोषश्चतुर्थं तदणुव्रतम् ॥"
"दुःखानां निधिरन्यस्त्री, सुखानां प्रलयानलः ।
व्याधिवद्दुःखवत्त्याज्या, दूरतः सा नरोत्तमैः ॥"
"स्वभर्तारं परित्यज्य, या परं याति निस्त्रपा ।
विश्वासं श्रयते तस्यां, कथमन्यः स्वयोषिति ॥"
"किं सुखं लभते मर्त्यः सेवमानः परस्त्रियम् ।
केवलं कर्म्म बध्नाति, श्वभ्रभूम्यादिकारणम् ॥"

यतः—

"विन्दन्ति परमं ब्रह्म, यत्समालम्ब्य योगिनः ।
तद्व्रतं ब्रह्मचर्य्यं स्याद्धीरधौरेयगोचरम् ॥"
"एकमेव व्रतं श्लाघ्यं, ब्रह्मचर्य्यं जगत्त्रये ।
यद्विशुद्धिं समापन्नाः पूज्यन्ते पूजितैरपि ॥"

तन्मते दशधा मैथुनम्—

"आद्यं शरीरसंस्कारो, द्वितीयं वृष्यसेवनम्,
तौर्यत्रिकं तृतीयं स्यात्, संसर्गस्तुर्य्यमिष्यते ।
योषिद्विषयसंकल्पः, पञ्चमं परिकीर्तितम् ।
तदंगवीक्षणं षष्ठं, संस्कारः सप्तमं मतम् ॥"
"पूर्वानुभोगसम्भोगस्मरणं स्यात्तदष्टमम् ।
नवमं भाविनीचिन्ता, दशमं वस्तिमोक्षणम् ॥"
"किम्पाकफलसंभोगसन्निभं तद्धि मैथुनम् ।
आपातमात्ररम्यं स्याद्विपाकेऽत्यन्तभीतिदम् ॥"

"विरज्य कामभोगेषु, ये ब्रह्म समुपासते ।
एते दश महा दोषास्तैस्त्याज्या भावशुद्धये ॥"
"सिक्तोऽप्यम्बुधरव्रातैः, प्लावितोऽप्यम्बुराशिभिः ।
न हि त्यजति सन्तापं, कामवह्निप्रदीपितः ॥"
"मूले ज्येष्ठस्य मध्याह्ने, व्यभ्रे नभसि भास्करः ।
न प्लोषति तथा लोकं, यथा दीप्तः स्मरानलः ॥"
"हृदि ज्वलति कामाग्निः, पूर्वमेव शरीरिणाम् ।
भस्मसात्कुरुते पश्चादंगोपाङ्गानि निर्दयः ॥"

**भोगिदंष्टस्य जायन्ते, वेगाः सप्तैव देहिनः ।**

"स्मरभोगीन्द्रदंष्टानां दश स्युस्ते भयानकाः ॥"

इमे ते दश—यथा—

"प्रथमे जायते चिन्ता, द्वितीये द्रष्टुमिच्छति ।
तृतीये दीर्घनिश्वासाश्चतुर्थे भजते ज्वरम् ॥"
"पंचमे दह्यते गात्रं, षष्ठे भक्तं न रोचते ।
सप्तमे स्यान्महामूर्च्छा, उन्मत्तत्वमथाष्टमे ॥"
"नवमे प्राणसन्देहो, दशमे मुच्यतेऽसुभिः ।
एतैर्वेगैः समाक्रान्तो, जीवस्तत्वं न पश्यति ॥"
"नासने शयने याने, स्वजने भोजने स्थितिम् ।
क्षणमात्रमपि प्राणी, प्राप्नोति स्मरशल्यतः ॥"
"दक्षो मूढः क्षमी क्षुद्रः, शूरो भीरुर्लघुर्गुरुः ।
तीक्ष्णः कुण्ठो वशी भ्रष्टो, जनः स्यात्स्मरवंचितः ॥"
"यदि प्राप्तं त्वया मूढ !, नृत्वं जन्मोघसंक्रमात् ।
तदा तत्कुरु येनेयं, स्मरज्वाला विलीयते ॥"

**इदानीमामुष्मिकमैहिकं चाब्रह्मफलमुपदर्श्य गृहस्थोचितं पुनरपि ब्रह्मचर्य्यव्रतमाह—**

"षण्ढत्वमिन्द्रियच्छेदं, वीक्ष्याऽब्रह्मफलं सुधीः ।
भवेत्स्वदारसन्तुष्टोऽन्यदारान् वा विवर्जयेत् ॥"

"रम्यमापातमात्रे यत्परिणामेऽतिदारुणम् ।
किम्पाकफलसंकाशं, तत्कः सेवेत मैथुनम् ॥"

"यद्यपि निषेव्यमाणा, मनसः परितुष्टिकारका विषयाः ।
किम्पाकफलादनवद्भवन्ति पश्चाददतिदुरन्ताः ॥"

"कम्पः स्वेदः श्रमो मूर्च्छा, भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च, भवेयुर्मैथुनोत्थिताः ॥"

"योनियन्त्रसमुत्पन्नाः, सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते, यत्र तन्मैथुनं त्यजेत् ॥"

योनौ जन्तुसद्भावं वात्स्यायनः कामशास्त्रकारोऽप्याह ।

**वात्स्यायनश्लोको यथा—**

"रक्तजाः कृमयः सूक्ष्मा, मृदुमध्याधिशक्तयः ।
जन्मवर्त्मसु कण्डूतिं, जनयन्ति तथाविधाम् ॥"

**कामज्वरचिकित्सार्थमौषधमिव मैथुनसेवनमिति यो मन्येत तं प्रत्याह—**

"स्त्रीसम्भोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या, विध्यापयितुमिच्छति ॥"

**इतर अप्याहुः—**

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥"

**॥ स्त्रियाऽपि परपुरुषो भुजग इव त्याज्यः ॥**

"ऐश्वर्य्ये राजराजोऽपि रूपे मीनध्वजोऽपि यः ।
सीतया रावण इव, त्याज्यो नार्य्या नरः परः ॥"

**पुनश्च**—"प्राणभूतं चरित्रस्य, परब्रह्मैककारणम् ।
समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ॥"

**यतः**—"चिरायुषः सुसंस्थाना, दृढसंहनना नराः ।
तेजस्विनो महावीर्य्या, भवेयुर्ब्रह्मचर्य्यतः ॥"

**एतैर्ज्ञायते ब्रह्मचर्यमाहात्म्यम् ॥**

तथैव सर्वलोकोत्तमरूपसम्पदा सर्वातिशायिन्या क्षायकज्ञानदर्शनशीलैर्ज्ञातपुत्रो ज्ञातनन्दनोऽन्तिमजिनः श्रमणः प्रधानः ॥ यतो भगवतो महावीरस्य बहूनि नामानि सन्ति । **यथा**—

"समणे भगवं महावीरे नाते, नातपुत्ते, नातकुलनिव्वत्ते, विदेहदिन्ने, विदेहजच्चे, समणे भगवं महावीरे, कासवगोत्ते, अम्मा. पियुसतिए वद्धमाणे, सह सम्मुदिए समणे, भीमभयभेरवं ओरालं अचेलयं परिसहं सहइत्तिकट्टु देवेहिं से नाम कयं **समणे भगवं महावीरे** ॥ श्रीआचाराङ्गसूत्रम्–११, १५, १६–१७

"एवं से उदाहु अणुत्तरनाणी, अणुत्तरदंसी अणुत्तरणाणदंसणधरे
अरहा णायपुत्ते भगवं, वेसालिए वियाहिए" ।

( श्री सूयगडांगसूत्रम् १–२ )

भगवतो महावीरस्य ज्ञातवंशो यथाऽऽह सिद्धान्ते ।

"छव्विहा कुलारिया मणुस्सा प० तं० उग्गा, भोगा, राइण्णा, इक्खागा, णाता, कोरव्वा" ॥ ( श्री ठाणांग सूत्रम् ४९७ )

"जात्यार्य्या, इक्ष्वाकवो, विदेहा, हरयोऽम्बाष्ठा, ज्ञाताः कुरवो, वुंवुनाला, उग्रा, भोगा, राजन्या इत्येवमादयः क्षत्रिया आर्यकुलोद्भवाः" ॥

(तत्त्वार्थसूत्रम् ३-१५)

ज्ञातखण्डोद्यानोऽपि ज्ञातवंशस्य परिचयमादत्ते, यथा—

"वहिया य 'णायसंडे' आपुच्छित्ताण णायए सव्वे ।
दिवसे मुहुत्तसेसे कमाणामं समणुपत्तो ॥"

(आवश्यकचूर्णि पृ० २६७)

पुनश्च—

"उत्तरखत्तियकुण्डपुरसंनिवेसस्स मज्झेणं निगच्छत्ति र त्ता जेणेव 'णायसंडे' उज्जाणे तेणे व उवागच्छइ...........महावीरे लोयं करेइ ।" (श्री आचारांगसूत्र २-१५-८)

श्रीहेमचन्द्राचार्योऽपि परिशिष्टपर्वणि ज्ञातनन्दनमिति शब्दप्रयोगं कृत्वा प्रणमस्करोति, यथा—

**कल्याणपादपारामं, श्रुतगंगाहिमाचलम्,**
**विश्वाम्भोजरविं देवं, वन्दे श्रीज्ञातनन्दम् ॥**

इत्यादिप्रमाणैर्भगवान् महावीरो ज्ञातवंशमलंकृतवान् ।

**अन्वयार्थ**—जैसे [ दाणाण ] दान-धर्ममें [ अभयप्पयाणं ] अभयदान [ सेठ्ठं ] श्रेष्ठ है, [ वा ] और [ सच्चेसु ] सत्योंमें [ अणवज्जं ] पाप रहित-दूसरोंको पीड़ा न देनेवाला सत्य-वचन [ वा ] और [ तवेसु ] सब तपोंमें [ वंभचेरं ] ब्रह्मचर्यको [ उत्तम ] अच्छा [ वयंति ] कहा है, उसी प्रकार [ समणे ] दयालु-श्रमण [ णायपुत्ते ] ज्ञातृ-पुत्र-महावीर [ लोगुत्तमे ] लोकमे ] श्रेष्ठ थे ॥ २३ ॥

**भावार्थ**—स्व परके हितकेलिए किसीवस्तुका निष्काम अर्पण करना दान है, दान अनेक प्रकारका होनेपर भी 'अभयदान' सब दानोंमे उत्तम है,

इसी प्रकार सत्य भी अनेक प्रकारका है; तथापि दूसरेको जिस सत्यसे पीडा न हो ऐसा सत्य-प्रियसत्य उस सत्यसे अच्छा है जिससे दूसरोंको पीडा हो, और सब तपोंमें ब्रह्मचर्य तप सर्वोत्कृष्ट है, उसी प्रकार भगवान्-महावीर भी लोकमें सर्वोत्तम थे ॥ २३ ॥

**भाषा-टीका**—अपनी और औरोंकी उन्नति तथा भलाईके लिए जो परोपकारकी दृष्टिसे दिया जाय उसे दान कहते हैं। या अपने अधिकारको वस्तु-मेंसे हटा कर जिस वस्तु पर किसी अन्यको अधिकार देदेना भी दान कहा जा सकता है। परन्तु यहा तो श्रद्धा और प्रतीति के साथ भक्ति भाव पूर्वक, परिग्रहका ममत्व भाव छोडकर कर्मोकी निर्जराके लिए अनुकम्पासे तथा मन, वचन कायकी शुद्धिसे फलकी इच्छा न रख कर दाता जिस पात्रमें कुछ पवित्र वस्तु देता है उसीका नाम दान है।

और वह अन्नदान, औषधदान, ज्ञानदान, अभयदानके भेदसे चार प्रकारका है। परन्तु उन सबमें प्राणियोंका भय हटा कर उन्हें सर्वथा निर्भय करदेना ही सर्वोत्तम दान अभयदान माना गया है। क्योंकि आत्मामें दश प्राण होने से प्राणी कहलाता है। जीवित रहनेकी इच्छा या जीवित रहना ही इसका स्वभाव रहनेसे इसकी 'जीव सज्ञा' है। दशप्राण 'द्रव्य प्राण' हैं और 'भाव प्राण' अनन्त चतुष्टय कहलाते हैं, वास्तवमें यह जीव तीनों कालमें इन्हीं प्राणोंसे जीवित रहता है। अतः सब जीव जीवित रहनेकी इच्छा रखते हैं मरना कोई नहीं चाहता, किसीको मरना अभीष्ट नहीं है। अत जीवित रहनेके अभिलाषुओंको 'अभय' दान देकर उनका सब प्रकारसे रक्षण करना मनुष्यका श्रेष्ठतम कर्तव्य है।

**कहा भी है कि**—"जिस प्रकार मुझे अपने प्राण प्रिय हैं उसी प्रकार अन्य देह धारियोंको भी अपना जीवन प्रिय है। स्वर्गका निवासी इन्द्र और विष्टेका कीडा, महलमें रहने वाला राजा और झोंपडीमें रहने वाला गरीब लकडहारा समान जीवन चाहते हैं। यह समझ कर किसी भी प्राणीके 'मन' नामक प्राणको भी कष्ट न देना चाहिए।"

"क्योंकि अहिंसा परम धर्म है, हिंसा सब जगह पर निन्दित की गई है, यह स्वयंको प्रिय न होने के कारण औरों को भी अप्रिय है। क्योंकि अपनी और औरों की मनोदशामें कोई अन्तर नहीं है। अत- चतुर मनुष्य अपने मनमें

सदैव यही भाव रखता है कि–किसी भी तरह जगत् के जीवोंका कल्याण मंगल या भलाई करूं, परोपकारमें स्वयं लग कर औरों को भी लगानेका प्रयत्न करूं। अपनेमें दोषमात्रका लेश तक न रख कर औरों को भी निर्दोष वनानेका सतत प्रयत्न करूं । आत्माके अनन्त सुखसे सुखी वन कर औरों को भी सुख के स्थान पर ले जाऊं"

परन्तु यदि कोई प्राणी इन भावोंके विपरीत चल कर लोभ का दास बन कर, जवानकी लालसाके जालमें फँसकर, धन कमानेकी इच्छासे, या लडाईमें विजय पानेकी आशासे, अपने मनको वहलानेकी गरजसे निरपराध और दीन जीवों को मार डालता है, तव इस पाप दोष से दूष्य होकर उस अधम या स्वार्थी को नरक-( दु.ख ) में अवश्य जाना पडता है । इसी सिद्धान्तकी सव प्रकारके महापुरुषोंने रक्षाकी है । सव ने जन्म लेकर इसको उच्च कोटिमें लानेका प्रचार किया है । महर्षि 'पतंजलि' ने तो इसको ही वडा पद दिया है । पाच यमोंमें जीव रक्षा सवसे पहला यम है ।

"किसीने क्रोध, लोभ, मोहके वश होकर हिंसा करने, कराने, अनुमोदन करनेको वितर्क कहा है । इस पापका परिणाम उनके मतमें अनन्त दु:ख फल बताया गया है ।"

"कहीं अहिंसाकी प्रशंसा यहा तक की गई है की प्राणधारियोंसे वैर भाव तक त्यागदेना चाहिए । साधक तव ही अहिंसाका साधन कर सकता है ।"

श्रीमदुमास्वामीने भी तत्वार्थसूत्रमें यही कहा है कि जो कोई भी जीव प्रमाद अर्थात् असावधानता युक्त होकर काययोग, वचनयोग और मनोयोगके द्वारा प्राणोंका 'अतिपात' या व्यपरोपण करता है, उसको 'हिंसा' कहते हैं । हिंसा-करना, मारना, प्राणोंका अतिपात–त्याग अथवा वियोग करना, प्राणोंका वध करना, जीव-कायसे अलग करके देहान्तरको सक्रम करा देना, भवान्तर-गत्यन्तरको पहुंचा देना, और प्राणोंका व्यपरोपण करना, इन सव शब्दोंका एक ही भाव है ।

"यदि कोई जीव प्रमादी अर्थात् मद, विषय, कषाय, निद्रा, विकथाके वश होकर ऐसा कार्य करता है, अपने या परके प्राणोंका 'व्यपरोपण' करनेमें प्रवृत्त होता है, तव वह हिंसक हिंसाके दोषका भागी समझा जाता है । परन्तु प्रमाद छोड कर प्रवृत्ति करनेवालेके शरीरादिके निमित्तसे यदि किसी जीवका वध होजाय

तव वह उस दोषका भागी नहीं समझा जाता। क्योंकि इस लक्षणमें प्रमादका योग मुख्य रूपसे वताया है और अप्रमत्त अवस्थाका नाम 'अहिंसा' है।

इसके अतिरिक्त योग सूत्रके व्यास कृत भाष्यमें भी अहिंसाका लक्षण बांधते समय उन्होंने वताया है कि—सर्व्वदा सव प्रकारके जीवोंसे कभी द्रोहका न करना 'अहिंसा' है।

**याज्ञवल्क्यस्मृतिमें**—योगी जनोंने मनवचन काय से किसीको क्लेश न पहुंचाना 'अहिंसा' कहा है।

"अहिंसा, सत्यबोल्ना, परवस्तुको विना आज्ञा न लेना, आत्माको पवित्र वनाना, इन्द्रियोंका वश करना, दान देना, दया करना, मनो विकारोंके प्रवाहको दमना, शान्त रहना, इन सबको धर्म साधन बताया है।"

**यजुर्वेद**—यहां भी यही उपदेश दिया है कि—"हे पुरुष! तू जगत् के किसी भी प्राणीकी हिंसा मत कर 'मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, १८—३ अपनी आखोंसे सबको मित्रकी दृष्टिसे देख शत्रुकी सी दृष्टि किसी पर मत डाल।"

**मनुका पांचवॉ अध्याय**—"जो मनुष्य अपने कल्याणकी तो इच्छा प्रगट करता है परन्तु प्राण, भूत, जीवोंकी हिंसा कर डालता है, वह जीव अपनी इस जीवित दशामें और मर कर परलोकमें कभी भी सुख न पायगा।"

**दशधर्म**—"धैर्यरखना, शातिकरना, आत्माको पापसे विरक्त करना, चोरी न करना, आन्तरिक पवित्रता रखना, इन्द्रियोंको वशमें रखना, सत्य बोल्ना, क्रोध न करना, अहिंसाका पालन करना, इस प्रकार धर्मके दश लक्षण कहे हैं। जिनमें अहिंसाको भी स्थान प्राप्त है।"

**महाभारत**—"मैं यह सत्य कहता हूं कि—सत्यवादियोंका धर्म अहिंसा है और यही सव धर्मोमें प्रधान है, तथा हिंसा करना अधर्म और पाप है।"

**अहिंसा वचनामृत**—"अहिंसा परम धर्म है, अहिंसा उत्कृष्ट दमन है, अहिंसा उत्कृष्ट दान है, अहिंसा प्रधान तप है, अहिंसा परम यज्ञ है, अहिंसा परम फल है, अहिंसा परम मित्र है, अहिंसा उत्कृष्ट सुख है।"

"सव प्रकारके यज्ञोंमें अनेक प्रकारके दान करना, सव तीर्थोंमें अनेक स्तुतिऐं गाना, सव दानोंका फल या परिणाम अहिंसासे वढ कर नहीं है। अर्थात् वे कर्म्म अहिंसाकी वराव्वरी नहीं कर सक्ते।"

**नियमसार**–"कुलस्थान, योनिस्थान, जीवसमासस्थान, मार्गणा स्थान इत्यादि भेदोंको भलि भान्ति जान कर जीव रक्षा करनेके भावको 'अहिंसा' कहते है। जीवोंकी मृत्यु होती है या नहीं इस प्रकारके विचारमें लगे हुए परिणामके सुधारके विना पाप हिंसा रूप क्रियाका त्याग होना कठिन है, अतः इस रक्षाके प्रयत्नमें लगना 'अहिंसा' है।"

**समन्तभद्राचार्य कहते हैं कि**–"जगत् में इसे सब जानते है कि–अहिंसा परब्रह्म स्वरूप है, अर्थात् आत्माकी वीतरागता ही अहिंसा है, जहा वीतरागता है, वहीं आत्मा का शुद्ध स्वरूप है, जिस आश्रमके चरित्रमे अणुमात्र भी आरभ नहीं है वहीं यह पूर्ण अहिंसा प्राप्त होती है। आशय यह है कि आदर्श पुरुषोका सच्चरित्र रूप आचरण ही अहिंसा है, अत अहिंसाकी सिद्धिके लिए ही परम दयालु प्रभुने आरभ और परिग्रहको त्याग दिया। प्रभु विकार शील वेश और परिग्रहमें अनुरक्त नहीं थे। क्योंकि जहा परिग्रहकी आसक्ति नहीं है वहां हीं ऊंचे दर्जेका अहिंसा धर्म है। 'जिनधर्म की जय' इसी लिए बोलते हैं कि–इसमें पूर्ण 'अहिंसा' का पालन किया जाता है। यही त्रस जीवका घात करनेवाले विचारोंको जड मूलसे हटानेका कारण है। तथा 'पंच काय' रूप इकेन्द्रिय स्थावर जीवोंके नाना प्रकारके होनेवाले वधसे वह विलकुल दूर है और वह सुन्दर सुखसे भरपूर समुद्रके समान अगाध है।"

"मुनिओंका कर्तव्य है कि वे सर्व्वथा अहिंसाका पालन करें, क्योंकि हिंसाका परिणाम दु·खजनक है, जिसे महापुरुषोंने महान् अनुभवसे वताया है। जिनके ये वचनामृत हैं।"

"पैरसे लाचार है, शरीरकी चमडीको फोड कर कोढ बाहर टपकने लगा है, हाथ कटे हुए हैं, और भी अनेक रोगोंसे ग्रस्त है। उसे देख कर समझ लेना चाहिए कि उन्हें यह दारुण दु·ख अन्य प्राणियोंकी हिंसा करनेसे भुगतना पडा है अतः चतुर पुरुषका यह कर्तव्य है कि–निरपराधजीवकी संकल्पमात्रसे कभी 'हिंसा' न करे।"

"सुखदु खमें, अच्छे-बुरेमें, युक्त अयुक्तमें, अपनी आत्मोंकी तरह अन्य आत्माओंको समझ कर कभी किसीका हिंसा रूप अनिष्ट नकरे।"

**लोकोंका यह मन्तव्य है कि**–"धर्मका सम्पूर्ण अग सुन कर तथा मनमें विवेक रख कर उसका निर्णय पूर्वक यह सार है कि जब मुझे अपने

प्रतिकूल कुछ अच्छा नहीं प्रतीत होता है, तब औरों को उनके प्रतिकूल आचरण कब इष्ट है ।”

**“सबको अपने प्राण ही प्रिय हैं, राज्य नहीं”**–“प्राणी अपने प्राणोंकी रक्षाके लोभमें राज्य को भी तृणकी तरह छोड देता है। अत एव किसीके प्राणोंका नाश करनेसे जो पाप होता है वह समस्त पृथ्वी दान कर देनेसे भी दूर नहीं होता।”

“मरनेवालेको चाहे राज्य भी प्रदान करो, या सुवर्ण का पहाड अर्पण करदो, परन्तु जीवनके सन्मुख वे वस्तुएँ उसे कुछ भी अच्छी नहीं लगतीं, इसी लिए वह उन सब को छोड कर जीवित रहनेकी ‘अपील’ करता है।”

**पीडा**–“जरासा काटा पैर में लग जाता है, मगर वह सारे अगों में भारी पीडा उत्पन्न कर देता है, परन्तु जो निरपराध जीवोंको तीक्ष्ण शस्त्रसे मौतके घाट उतार देता है, उस मरनेवालेके दु खका क्या ठिकाना है। उसे तो अवश्य अनिर्वचनीय वेदना होती है।”

“यह कहा की नीति है जो अशरण, निरपराध; दुर्बल प्राणी बलवान् के द्वारा मारा जाता है, हाय! हमें तो कष्ट के साथ कहना पडता है कि–जगत् में अराजकता छा गई है, अब यहा न्यायको कहां स्थान रह गया है।”

“यदि कोई किसीके कानोंको यह सुनादे कि तू मरजा! तब सुननेवाला यह सुनते ही काप उठता है, शरीर भयभीत और दु खी हो जाता है। जो पैनें और कठोर शस्त्रसे किसीको मारने लगता है तब उसकी क्या दशा होती होगी। उसके दु खका अनुभव सिवाय उसके भला और कौन कर सकता है।”

“हाथका कट जाना अच्छा है, बिना पैर रहना भी कुछ बुरा नहीं, मगर सम्पूर्ण शरीरके अगोंको पाकर हिंसा करनेवाला पुरुष सर्वथा निकम्मा है, अर्थात् वह किसी कामका नहीं है।”

**मतलब साधने की हिंसा भी हानिकर है**–“विघ्नकी शान्तिके लिए की गई हिंसा भी विघ्नके लिए ही होगी। बहुतसे यह कह डालते हैं कि–हमारे कुलका यही ‘आचार’ चला आता है, मगर वह कुछ कुलकी भलाईके लिए नहीं है, वह तो कुल नाश के लिए ही होगा, शान्तिके लिए नहीं। अपने वंशमें चली आनेवाली कुलक्रमागत हिंसाको जो भी प्राणी छोड कर शुद्ध हो

जाता है, वह काल सूर कसाईके पुत्र 'सुलस' की तरह सब मनुष्योंमें पवित्र और श्रेष्ठ गिना जाता है।"

"जो इन्द्रियोंको तो वश रखना चाहता है, तथा देव और गुरु की आत्मीय सेवा करता है, यथा शक्य दान भी देता है, तत्वको पढ कर पढाता भी है, तप भी करता है, परन्तु जरासी भी हिंसाको यदि धर्म मान्यतासे कर देता है तब तो उपरोक्त सबकी सब क्रियाएँ निष्फल हैं, अत. सिद्ध हुआकि धर्मके नाम पर की गई हिंसा भयंकर पापकारिणी है।"

"जिस शास्त्रमें धर्मका नाम लेकर हिंसा करनेका उपदेश किया हो वह शास्त्र न होकर कुशास्त्र समझा जाना चाहिए अर्थात् वह शस्त्र है शास्त्र नहीं।"

"यह कितना आश्चर्य है कि–मनुष्य तक को मार देनेवाले, लोभान्ध होकर पथ भ्रष्ट होजाने वाले, हिंसा विधायक शास्त्र बनाकर, तथा पाप करनेका उपदेश देकर, लोकोंको मूर्ख बना रहे हैं, अन्ध विश्वासी बनाकर मानो नरकके कूंडेमें डाल रहे हैं।"

**अहिंसाका माहात्म्य**–"अहिंसा माता की तरह सबकी पालिका और हितकारिणी है। अहिंसा ही शत्रुओंके मनमें अमृतका सचार करनेवाली है। अहिंसा दु.खरूपी दवानलको बुझानेमें अमोघ और प्रधान मेघ है, संसार भ्रमणा यानी जन्म मरणके रोगसे पीडितोंके लिए तो आरोग्यता देनेमें समर्थ 'औषधि' है।"

**अहिंसाका फल**–"लम्बी आयु, स्वच्छ और सुन्दर रुप, नीरोगता, ससारमें निर्मल यशः कीर्ति, इत्यादि सामग्रिएँ अहिंसा पालन करनेके उपलक्षमें ही तो मिली हैं। अधिक क्या कहा जाय अहिंसा सब मनोरथ पूर्ण करनेवाली है।"

**किसीने ठीक ही कहा है कि**–"पहाडोंमें सुमेरु, अमृत पीने वालोंमें देवता, मनुष्योंमें चक्रवर्ती, ज्योतिष् चक्रमें चाद, ठंढी छायां देनेवालोंमें फलदार वृक्ष, ग्रहोंमें सूर्य, जलाशयोंमें समुद्र, सुर–असुर–मनुष्य तथा चक्रवर्तियोंमें वीत-राग के पदकी तरह सब व्रतोंमें 'अहिंसा' को सबमें बडप्पन तथा प्रधानता प्राप्त है। अर्थात् इससे बढ कर और बडा व्रत क्या हो सकता है।"

**निष्कर्ष**–इन सब शास्त्रोंका मीलान करनेसे यह स्वयं सिद्ध हो जाता है कि–हिंसा सब शास्त्रोंमें वर्जित है; जैनोंने तो इसका नाम प्राणातिपात कहा है,

जिस का आशय यह होता है कि-किसी के एक-प्राणको भी निरर्थक न दुखाना चाहिए। साधु मुनिराज इसका सम्पूर्ण अग पालन करते है। और गृहस्थ जन इसका एक भाग ही निभा सकते हैं क्योंकि सबको अपना जीवन सब वस्तुओं से अधिक प्रिय है।

**जैसे कहा है कि**-"यदि मरनेवालेको यह कहा जाय कि-तुम सोनेके 'एक क्रोड सिक्के' लेकर हमें अपनी जान मारनेकेलिए कहदो, तब वह धनके ढेरको छोडकर जीवित रहनेकी आशा प्रगट करेगा। क्योंकि जान देदेनेपर उसकेलिए धन किस कामका है। अत सबको अपना जीवन प्रिय है। इस लिए सब दानोंमें अभय दान श्रेष्ठ है।"

**अभयदान पर उदाहरण**-"अरिदमन वसन्तपुरका राजा है, वह अपनी चार रानियोंसे नित्य रग रलिया करता है। एक दिन उन रानिओंने गाना, बजाना, नाचना आरभ किया; राजा उनकी गान्धर्व विद्या पर लट्टू होगया और बोला कि आज तुम जो कुछ मागोगी वही दूंगा। रानिओंने कहा कि इस समय तो हमें किसी वस्तुकी आवश्यकता नहीं है, कालान्तरमें माग लेंगी, अब हमारा वर अपने पास जमा कर लीजिए; राजाने कहा अच्छा।"

एक बार रानियोंने एक चोरको देखा कि जिसे लाल कपडे, और जूतोंका हार पहिना कर वध्य भूमि ले जाया जा रहा है। रानियोंके साथ राजा भी महल पर टहल रहा था, देखकर उन्होंने पूछा कि प्राणनाथ! इसने क्या अपराध किया है। राजाने उसी समय एक सिपाहीको बुलाकर पुछवाया, उसने कहा कि पृथ्वीनाथ! इसने चोरी जैसा अकार्य करके राज और धर्मके विरुद्ध कार्य किया है, अत आपनेही तो इसको 'प्राणदंड' पानेकी आज्ञा दी है।

यह सुनकर उनमें से एक रानी ने कहा कि प्राणवल्लभ! आप मेरा 'वर' यह दें कि इसे एक दिनके लिये न मारें जिससे मैं इस पर कुछ उपकार कर सकूं। राजाने कहा "तथास्तु"

रानीने उसे महलमें लिवा कर कहा तुझे आजके लिए बचा दिया है, अतः आज खा पी और मौज कर। यह कह उसका खूब अन्न और वस्त्रसे स्वागत किया, सवेरा होने पर उसे एक हजार दीनार देकर अपने महलसे विदाकर दिया।

इसी प्रकार दूसरी और तीसरी रानीने भी एक एक दिन रक्खा और क्रमसे एक लाख और एक क्रोड सोनेके सिक्कोंका पारितोषिक दिया।

मगर चौथी रानीने उसे कुछ भी न देकर उसका वह प्राणदंड का अपराध राजासे कह कर क्षमा करा दिया। तव यह सुन उन तीनोंने कहा कि इसे तूने क्या दिया है? चौथी रानीने कहा कि मैंने इसे वह वस्तु दी है, जिसे तुम सव मिल कर स्वप्नमें भी नहीं दे सकीं। यह सुनकर वे सव क्रुद्ध होकर उसके गले पड गईं और वोलीं कि हमने तो उसे क्रोडपति वनादिया है और तुम कहती हो कि हमने इसपर तुनके जितना उपकार भी नहीं किया। चौथीने कहा कि धनसे भी अधिक सवको अपने प्राण प्यारे होते हैं। मैंने इसे प्राणदान दिलवाकर सदाके लिए सुखी वना दिया है। अव इसे मरनेका भय नहीं है जिससे मैंने सवसे वडा उपकारका कार्य किया है। यदि मेरे कहेका विश्वास न हो तो राजासे इसका न्याय कराना चाहिए। इतना कहनेके वाद राजाको तुरन्त महलमें वुलवाया गया, और रानियोंका वह मुकदमा सुन कर राजाने चोरको वुलाया और पूछा कि भाई! सत्य कह तू किस रानीका अधिक उपकार मानता है।

उसने नम्रतासे सिर झुका कर कहा कि-यों तो सवने मुझ पर भारी उपकार किया है, मगर चौथी रानीका सवसे अधिक उपकार मानता हूं, क्योंकि उसने अभयदान दिलवाया है। तीनों रानियोंने क्रोडोंका धन भी दिया और एक एक दिन मरनेसे भी वचाया मगर मुझे तो सदैव यही भय वना रहता था कि धनका क्या करूंगा जव कि कल मर जाना है। मगर चौथी रानीने मुझे उसी मौतके संकटसे उवारा है। अवमें यावज्जीवन पर्य्यन्तके लिए निर्भय हूं। अतः इस उपकारको अपने तनका पुरस्कार देकर भी नहीं चुकाया जा सकता। क्योंकि सर्व दानोंमें अभयदान प्रधानतम है।

**सर्वोच्च भाषा सत्य है**–इसी प्रकार सत्य वचनोंमें निरवद्य, पापरहित, दूसरेकी पीडाको हटानेवाली भाषा सर्व्वोत्तम हैं। क्योंकि काना, नपुंसक, रोगी, चौरादिके नामसे पुकारनेपर भी उसके मनको आघात पहुँचता है।

**मनुका मत**–"सत्य, प्रिय, और अन्यके मनके अनुकूल वचन वोलो, असत्य और अप्रिय सत्य कभी मत वोलो।"

**असत्य**–असत् शब्दके तीन अर्थ हैं, सद्भावका प्रतिषेध, और अर्थान्तर तथा गर्हानिन्दा। वस्तुके स्वरूपका अपलाप करनेको सद्भावका प्रतिषेध कहते हैं। यह दो प्रकारका है। सद्भूत पदार्थका निषेध तथा असद्भूत पदार्थका

निरूपण। जैसे "नास्ति आत्मा" आत्मा कोई स्वतन्त्र पदार्थ नही हैं, अथवा "नास्ति परलोक", परलोक-मरणके वाद जीवका अन्य भव धारण करना वास्तविक नहीं है। इत्यादिक भूतनिन्हव है। क्योंकि इससे सद्भूत पदार्थका अपलाप होता हैं। आत्माका परलोकमें भवान्तर धारण करना वास्तविक सिद्ध पदार्थ है। युक्तियुक्त और अनुभवगम्य है। इसका निषेध करना सद्भूतका अपलापनामक मिथ्या वचन है। आत्माको श्यामाकतण्डुल-सामकके चावल की तरह छोटे प्रमाणमें बताना, अथवा अगूठेके पोरवे के बराबर समझना, या यह कहना कि-आदित्य वर्ण है, निष्क्रिय है, इत्यादि सव वचन अभूतोद्भावन नामक असत्य वचन हैं। क्योंकि इस तरहके वचनों द्वारा आत्माका जो वास्तविक स्वरूप नहीं है, उसका उल्लेख किया जाता है।

पूर्णज्ञानविभासेन, विना नो याति सम्भ्रमः ॥ ८० ॥

**यथालाभ सन्तोष कर, चहे न कछु दिल वीच ।**
**या विधि सुख अति अनुभवे, ज्यों न फँसे दुःख कीच ८१**
यो यथालाभ सन्तुष्टो, वाञ्छा चित्ते न यस्य वै,
दुःखपङ्के न मग्नो यः, सोऽतिसौख्यं लभेद्ध्रुवम् ॥ ८१ ॥

**मोह जनित दुःख विकल पन, अथवा सुखको रूप ।**
**गिने दुहुं सम धीर धर, तौ न परे भवकूप ॥ ८२ ॥**
मोहजदुःखवैकल्यं, यद्वा तज्जसुखं ह्यपि ।
मन्यते य. समं धीरो, भवकूपे न मज्जति ॥ ८२ ॥

**अपने अपने गुणनमें, थिर हैं सब ही वस्तु ।**
**तू पुनि थिर कर अपनकौं, तो सुख लहे समस्त ॥ ८३ ॥**
सर्व्वाण्येव हि वस्तूनि, स्थिराण्यात्मगुणेषु च ।
स्थिरं कुर्यास्त्वमात्मानं, लभेथा सर्वसौख्यकम् ॥ ८३ ॥

**सुखदुःख दोनों फिरत हैं, धूप छांह ज्यों मीत ।**
**हर्ष शोक क्यों करहिं मन! धीरज धार नचीत ॥ ८४ ॥**
छायाऽऽतपनिभे मित्र! भ्राम्यते सुखदु.खके ।
दृष्ट्वा ते कुरुषे कि त्वं, हर्षशोकौ धृतिं धर! ॥ ८४ ॥

**अनहोनी होवे नहीं, होनी नाहिं टलात ।**
**दीखी परसी आगले, ज्यों होनी जा साथ ॥ ८५ ॥**
अभाव्य नो भवेदत्र, भाव्यनाशो न कर्हिचित् ।
यस्मिन्क्षणे तु यद्भाव्यं, द्रक्ष्यते वा तदाग्रतः ॥ ८५ ॥

चाह किए कछु ना मिले, करिके जहँ तहँ देख।
चाह छांडि धीरज धरहु, पद पद मिलत विशेष ॥ ८६ ॥

इच्छयाऽऽप्नोति नो किश्चित्पश्य कृत्वा तु मानव !
विहायेच्छा कृते धैर्ये, विशेषाप्तिः पदे पदे ॥ ८६ ॥

सुनि उझले मति रे जिया! कर विचार चुप साध।
यही अमोलिक औषधि, मेटे भव दुःख व्याध ॥ ८७ ॥

श्रुत्वोत्पत मनो मा त्वं, मौनं धृत्वा विचारय।
अमूल्यमौषधं ह्येतद्भवतापाऽऽमयाऽपहम् ॥ ८७ ॥

रे चेतन! संसार लखि, दृढ कर नेक विचार।
जैसी दे तैसी मिले, कूपकी गुंजार ॥ ८८ ॥

चेतन! वीक्ष्य संसार, कुरु धृत्वा विचारणाम्।
लभ्यतेऽत्र यथादत्तं, कूपप्रतिध्वनिर्यदा ॥ ८८ ॥

चञ्चलताकौं छांडीकै, काट मोह गल फांश।
सम दम यम दृढता किये, निज गुण होय प्रकाश ॥८९॥

त्यक्त्वा चापल्यमाच्छिन्धि, गलपाशं च मोहजम्।
शमे दमे यमे दार्ढ्ये, कृते स्वगुणभासनम् ॥ ८९ ॥

अभिलाषाकौं त्यागिके, मनकौं रख मजबूत।
तब कुछ सूझे अगमकी, यह सांची करतूत ॥ ९० ॥

अभिलाष परित्यज्य, मानसं कुरु निश्चलम्।
तदायत्यासुकर्तव्यं, द्रक्ष्यते च यथार्थत ॥ ९० ॥

वो तो ह्यां ही वस्तु है, जाकी तेरे चाय।
क्षण इक धीरज धारले, सहजे ही मिलजाय ॥ ९१ ॥

अभिलाषोऽस्ति ते यस्य, तद्वस्त्वत्रैव विद्यते।
क्षणं धैर्य्यं कुरु स्वान्ते, विनाऽऽयासेन लप्स्यते ॥ ९१ ॥

मतकर परगुणमें रमण, ज्यौं न लगे गल तोप।
निश्चल रह निज गुणनमें, आपही होगी मोक्ष ॥ ९२ ॥

रमस्वाऽन्यगुणे मा त्व, येन दोषो भवेन्नहि।
निश्चलः स्वगुणे भूया , स्वतो निर्व्वाणमेष्यसि ॥ ९२ ॥

**निश्चलतासुं होयगा, रे जिय! ब्रह्म समान ।**
**तृण का ही घृत होत है, गाय चरे पय पान ॥ ९३ ॥**
स्थैर्य्येण भविता जीव! ब्रह्मतुल्यो ह्यसंशयम् ।
सर्पिस्तेन तृणं स्यायद्गौश्चरति जलेन च ॥ ९३ ॥

**जो तू चाहे अमर पद, करि दृढता अखत्यार ।**
**बाल न वांका होयगा, जीवत ही मनमार ॥ ९४ ॥**
यद्यमरपदेच्छा ते, धैर्य्यमङ्गीकुरुष्व वै ।
जहि मनस्तु जीवद्दा, नैवं केशस्य वक्रता ॥ ९४ ॥

**धीरज गुण धारण किये, सब ही दुःख कट जाय ।**
**जैसे ठंडे लोहसे, तत्ता लोह कटाय ॥ ९५ ॥**
धृतधैर्य्यगुणे सर्वं, दुःखं नश्यति सत्वरम् ।
यथा शीतेन लोहेन, तप्ताऽऽयश्छिद्यते ध्रुवम् ॥ ९५ ॥

**जल जिम निर्मल मधुर मृदु, करत तप्तको अन्त ।**
**इम धीरज गुण चार लखि, करो ग्रहण वुधवन्त ॥९६॥**
निर्मलं मधुरं वारि, मृदुस्तापविनाशनम् ।
एवं चतुर्गुणं धैर्य्यं, वीक्ष्य गृण्हीत वै वुधाः ॥ ९६ ॥

**कला घटत अरु वढत है, नहीं शशिमण्डल जान ।**
**जन्म मरण गति देहकी, यों लखि धीरज ठान ॥ ९७ ॥**
हानिवृद्धी कलायाश्च, नहीन्दुमण्डलस्य वा ।
देहस्यैवं गतिं जन्म, मृत्युं वीक्ष्य धृतिं धर ॥ ९७ ॥

**सुखदुःख दोनों एकसे, हैं समझणको फेर ।**
**एक शब्द दो अर्थ ज्यों, लाख टकेकी सेर ॥ ९८ ॥**
सुखदुःखे समे वै तु, वोधभेदस्तु लक्ष्यते ।
लोके "*लाख टकाकी सेरेदं द्व्यर्थकवाक्यकम् ॥ ९८ ॥

---

* "लाख टका की सेर" इदं वाक्यं लोके द्व्यर्थकमस्ति, तद्यथा—पणद्वयेन लाक्षा प्रस्थमिता मिलतीति प्रथमोऽर्थः । लक्षसंख्याकपणयुग्मैः किञ्चिज्ज्ञानवस्तुप्रस्थपरिमितं मिलति, इति च द्वितीयोऽर्थः ।

सुखदुःख दोऊ वेदे मति, वेदे तो सम भाव।
जैसे मकरी जालकौं, पूरै अरु खा जाय ॥ ९९ ॥
सुखदु.खानुभूति मा, कुरु नो चेत्समानत ।
लूताजालं यथा पूर्णं, कुरुतेऽश्नासि तच्च वा ॥ ९९ ॥
समताको धारण किये, क्यों न डटे मन लहर।
भरणी सुण २ कर मिटे, स्यांपां हंदा जहर ॥ १०० ॥
समताधारणे किं वा, मानसोर्मिर्न शाम्यति ।
पश्य सर्पविषं श्रुत्वा, गारुडीं नश्यति ध्रुवम् ॥ १०० ॥

इति धैर्य्याङ्गम्

### अथानुभवविचारज्ञानाङ्गम्

कूकस विषय विकार सम, मति भखि मूढ गवाँर।
अनुभवरस तू चाखिले, गुरु मुख करि निर्धार ॥ १०१ ॥
मूढ ! ग्रामीण ! मा भुङ्क्ष्व, भोगान्कूर्चकसन्निभान् ।
गुरोर्मुखात्तु सम्प्राप्य, ह्यनुभूतिरसं पिव ॥ १०१ ॥
किये पाठ अनुभव विना, न मिटे भीतर पाप।
वाहर शीशी धोयके, करी चहै तू साफ ॥ १०२ ॥
अनुभूत्या विना पाठात्पापं नश्यति नान्तरम् ।
काचकूर्पीं वहिर्धौत्वा निर्मला कर्तुमिच्छसि ॥ १०२ ॥
अलपभार पाषाणको, जिमलागत जल माहिं।
तिमि अनुभव विच कर्मको, वहुवन्धन ह्वै नाहिं ॥१०३॥
अल्प एवाश्मनो भारो, यथा तोये प्रतीयते ।
अनुभूत्या तथा कर्मवन्धो भूरिर्न जायते ॥ १०३ ॥
मन वच-तन थिरतैं भयो, जो सुख अनुभवमाहिं।
इन्द नरिन्द फनीन्दके, ता समान सुख नाहिं ॥ १०४ ॥
स्थैर्ये देहमनोवाचामनुभवे तु यत्सुखम् ।
तादृक् सुखं न शक्रस्य, मानवेन्द्रफणीन्द्रयो. ॥ १०४ ॥
अनुभवसौं प्रभु मिलतहै, अनुभव सुखको मूल।
अनुभव चिन्तामणि तजि, मति भटके कहुं भूल १०५

अनुभूत्याः प्रभोः प्राप्तिः, सैव मूलं सुखस्य च ।
त्यक्त्वा चिन्तामणिं मूढाऽनुभूतिं क्वापि मा भ्रम ॥ १०५ ॥

**अति अगाध संसार नद, विषय नीर गम्भीर ।**
**अनुभव विन पार न लहत, कोटि करहु तदवीर ॥१०६॥**

भवो नदोऽस्त्यगाधोऽत्र, विषया वहु वारिवत् ।
कोट्युपायेऽपि पारं नो, यात्यनुभूतिमन्तरा ॥ १०६ ॥

**जिहिं विचारतें पाय है, मनकौं थिर सुखठौर ।**
**ताकौं अनुभव जानिये, अनुभव नहिं कुछ और ॥१०७॥**

मन स्थैर्य्ये सुखस्थानं, येनाऽऽप्नोति विचारतः ।
वुध्यस्वानुभवं तं च, परन्त्वनुभवो न हि ॥ १०७ ॥

**विना विचारे ज्ञानके, तू जङ्गलको रोझ ।**
**मिथ्या यों ही पचत है, क्यों न करे अव खोज ॥ १०८ ॥**

विना ज्ञानविचारेण, आरण्यगवयो ननु ।
व्यर्थं खेदमवाप्नोषि, कुरुषे किं न विचारणाम् ॥ १०८ ॥

**मन मतङ्ग वश करनकौं, ज्ञानाङ्कुश चित धार ।**
**क्षमाथंभसे वांधकर, लज्जा शृंखल डार ॥ १०९ ॥**

मनो गजं वशं कर्तुं, चित्ते ज्ञानशृणिं धर ।
क्षमा स्तम्भेन वध्वा च, क्षिप लज्जां सुशृङ्खलाम् ॥ १०९ ॥

**भ्रमतो मन रवि डाटिले, ज्ञान मुकुरके स्यान ।**
**विंदु सुभ उपयोगसे, कर्म तूलकी हान ॥ ११० ॥**

भ्रमन्मनो रविं रुन्धि, ज्ञानदर्प्पणके सखे ।
विन्दुना सूपयोगेन, कर्मतूलविनाशनम् ॥ ११० ॥

**सीसा सम संसार है, गुरु कृपा आदित्य ।**
**ज्ञान नेत्र विन किम लखे, आपनपो सुपवित्र ॥ १११ ॥**

संसारो दर्प्पणाभस्तु, भास्करोऽस्ति गुरोः कृपा ।
विशुद्धात्मत्ववोधस्तु, ज्ञाननेत्रं विना न हि ॥ १११ ॥

**विषय-वासना करत जो, आवे ज्ञान जगीश ।**
**त्रेशठका उन समयमें, छिनमें होय छत्तीस ॥ ११२ ॥**

भोगाना वासनायां चेज्ज्ञानमुद्द्योतते सखे !
सद्यस्त्रिषष्टिसङ्ख्याया., षट्त्रिंश जायते ध्रुवम् ॥ ११२ ॥

**जो तू चाहे ज्ञान सुख, तो विषियन मनफेर।**
**और ठौर भटके मती, अपने ही में हेर ॥ ११३ ॥**

व्यावर्तय मनो भोगाद्बोधसौख्यं यदीच्छसि।
रे रे! त्वं भ्राम्य माऽन्यत्र, तदाऽऽत्मनि च मार्गय ॥ ११३ ॥

**ज्ञानरूप दीपक कने, न वचे कर्म पतङ्ग।**
**जो रहे तो दोनोनमें, झूठो एक प्रसङ्ग ॥ ११४ ॥**

अन्तिके ज्ञानदीपस्य, नो कर्म्मशलभ स्थिर.।
तिष्ठतो यदि तौ द्वौ वा, मृषैकस्तु प्रसङ्गक ॥ ११४ ॥

**ज्ञान सञ्चरे जिहि समैं, न रहे कर्म समाज।**
**और न पंछी उट सकै, जहां बसेरा वाज ॥ ११५ ॥**

यदा सञ्चरति ज्ञानं, कर्मजालं तु नो तदा।
श्येनवासो भवेयत्र, तत्र तिष्ठन्ति नो खगाः ॥ ११५ ॥

**घर नहिं छूट्यो एकसौं, छूट्यो कर्म कुढंग।**
**ज्ञान तणे सत्सङ्गथी, देखो ठाणायंग ॥ ११६ ॥**

गृहं त्यक्तं न चैकेन, त्यक्त कर्म तु कुत्सितम्।
सत्सङ्गोत्पन्नबोधेन, पश्य स्थानाङ्गसूत्रकम् ॥ ११६ ॥

**क्षण इक ज्ञान विचारले, विषय दृष्टि कौं फेर।**
**मेरी मेरी त्यागदे, यौं होवे सुरझेर ॥ ११७ ॥**

भोगादृष्टिं परावृत्य, क्षणं चिन्तय बोधकम्।
त्यज सद्यो ममत्वं च, सर्वं सम्यग्भविष्यति ॥ ११७ ॥

**आठ पहर ढिंग राखले, ज्ञान सरूपी ढाल।**
**मोह अरीके विषय शर, लगे न ताकी भाल ॥ ११८ ॥**

संरक्षाष्टासु यामेषु, ज्ञानरूप तु चर्म्मकम्।
विषयेषुर्न-मोहारेर्मस्तके न लगिष्यति ॥ ११८ ॥

**माया मोह निवारके, विषयनसौं मनखींच**
**जो सुख चाहे आपणा, तो रहो ज्ञानके बीच ॥ ११९ ॥**

मायामोहं निवार्य्यैवं विषयेभ्यो मनो हर।
वाञ्छस्यात्मसुखं चेद्धि, ज्ञाने विहर मे सखे! ॥ ११९ ॥

**भेद लहे विन ज्ञानके, मत भूंसे जिम स्वान।**
**लोग गडरिया चाल तज, आपनपो पहिचान ॥ १२० ॥**

मा कुरु भषणं श्वेव, ज्ञानभेदाप्तिमन्तरा।
लोकमेषीगतिं त्यक्त्वा, स्वात्मानं परिवोधय ॥ १२० ॥

**कामधेनु अरु कल्पतरु, इण भव सुख दातार।**
**इणभव परभव दुहुनमें, ज्ञान करत निस्तार ॥ १२१ ॥**

कल्पद्रुः कामधेनुश्च, लोकेऽत्रैव सुखप्रदौ।
निस्तारयति वोधस्तु, जगत्यत्र परत्र च ॥ १२१ ॥

**जगत् मोह फांसी प्रवल, कटै न और उपाय।**
**सत्सङ्गति कर ज्ञानकी, सहज मुक्ति हो जाय ॥ १२२ ॥**

मोहपाशो दृढो लोके, च्छिद्यते नान्ययत्नतः।
कुरु वोधस्य सत्सङ्गं, मुक्ति. स्यात्स्वयमेव हि ॥ १२२ ॥

**चित्र पारस अरु ज्ञानके, अन्तर जान महन्त।**
**यह लोहा कञ्चन करत, वह गुण देय अनन्त ॥ १२३ ॥**

पारसाश्मनि वोधे च, जानीहि महदन्तरम्।
लोहं स्वर्णं करोत्येव, स त्वनन्तगुणप्रदः ॥ १२३ ॥

**प्रथम ज्ञान पीछे दया, यह जिनमतको सार।**
**ज्ञान सहित किरिया करूं, तव उतरूं भव पार ॥ १२४ ॥**

जैनसिद्धान्तसारोऽयं, पूर्वं ज्ञानं ततो दया।
सज्ञाना चेत्क्रिया कुर्या, तदा स्या भवपारगः ॥ १२४ ॥

अथोपसंहारः

**अति आलस परमादियो, भज्जुलाल मुझ नाम।**
**ज्ञानोद्यम कछु ना वने, किम सुधरे मुझ काम ॥ १२५ ॥**

अहं च भज्जुलालाख्य, प्रमत्तश्च सुसायकः।
ज्ञानोद्यमो न मे कश्चित्कथं कार्यं तु सेत्स्यति ॥ १२५ ॥

**दर्शन पुनि निश्चल नहीं, नहिं निश्चल चरित्र।**
**मन भ्रमतो निशिदिन रहे, नहिं ठहरे एकत्र ॥ १२६ ॥**

सम्यक्त्वं निश्चलं मे नो, चारित्रमपि नैव चं ।
नित्यं भ्राम्यति चित्त तु, तदेकत्र न तिष्ठति ॥ १२६ ॥

**ऐसी करी विचारणा, रे जिय! अबतो चेत।**
**चार वरण गुरु 'रतनजी', ऐसो करि सङ्केत ॥ १२७ ॥**

एवं जाते विचारे तु, चेत जीव ! किलाधुना ।
चतुर्वर्णगुरु 'रतनजी', सङ्केत कृतवानिमम् ॥ १२७ ॥

**चार वर्ण गुरु 'रतनजी', तास भेद चौवीस।**
**तामें भेद जु तेरवें, करी ज्ञान बकसीस ॥ १२८ ॥**

चातुर्वर्ण्यगुरू 'रतनजी', तद्भेदा युगविंशतिः ।
त्रयोदशे तु भेदे च, ज्ञानदानं व्यधादसौ ॥ १२८ ॥

**ज्ञान पाय हुलसी मती, शुक्ला छठ मधुमास।**
**संवत् रस६ अग्नि३ के९ भू१, रच्यो शान्ति परकाश ॥ १२९ ॥**

ज्ञानं प्राप्य मतिर्हृष्टा, रसाऽग्न्यङ्केन्दुरब्दके ।
सिते षष्ठ्या मधौ "शान्तिप्रकाशो" रचितो मया ॥ १२९ ॥

आशिर्वचनम्

**अरिहंत-सिद्ध-गण-ईशजी, उपाध्याय सब साध।**
**पंच परमगुरु दीजिये, निर्मल ज्ञान समाध ॥ १३० ॥**

अर्हन्सिद्धोऽथवाऽऽचार्य, उपाध्यायो मुनिस्तथा ।
पञ्चैते गुरवो दद्युः, शुद्धबोधसमाधिकौ ॥ १३० ॥

**इति श्रीमज्जैनाचार्यभज्जुलालकृतशान्तिप्रकाशः समाप्तः ॥**

**"सुसंस्कृतानुवादस्तु, कृतः पुष्पेन्दुभिक्षुणा**
**शान्ते वीररसं प्राप्य, मोक्षः सञ्जायते ध्रुवम्"**

# वीरस्तुति-परिशिष्ट नं० ६

## वीरस्तु भगवान्स्वयम्

जैनेशं निखिलाऽमराऽऽनुतपदं सर्व्वान्तरायापहं, हार्दध्वान्तरविं च योगसदनं श्राद्धैकगम्यं परम् । ससारार्णवपोतमत्र निखिलाऽऽनन्दालयं तापहं, ध्यायेऽहं मनसा धिया च सततं श्रीवर्धमानं जिनम् ॥ १ ॥ महावीरंनमस्कृत्य, स्याद्वादगी-पतिं जिनम् । निगदे तज्जन्मवृत्त, भव्यानां हितहेतवे ॥ १ ॥ भवार्णवोद्धारकरः, श्रीवीरभगवान् प्रभुः । पवित्रं शासन यस्य, तदुत्थाने मनोऽर्प्पय ॥ २ ॥ अतश्च शासनोत्थाने, भवन्त. पक्षपातिनः । सम्बन्धादिति विज्ञेयाश्चोत्थानस्तबके मुदा ॥ ३ ॥ सज्जितं भाविस्वोत्थानकुसुमं स्ववशं नय । सम्भवेऽस्ति त्रिरत्नादिजलसेचनकैरपि ॥ ४ ॥ स्वल्पत्वादुपचारस्य, चास्मिन्नुत्थानरूपके । सौरभाभावहेतोश्च, मनो मधुकरो न हि ! ॥ ५ ॥ भवल्लोभगतं चेदं, निशामय ततः परम् । स्तवकस्य प्रभावेण, हठात्स्ववशमानयेत् ॥ ६ ॥ कृपाकटाक्षं जानीत, भगवत्तत्त्वचिन्तका । अस्त्वेतावन्न चैतस्य, स्वल्पत्वं किञ्चिदस्ति हि ॥ ७ ॥ अस्य विश्वासमात्रेण, प्रयत्ने करणे पुनः । साहसत्वं न सञ्जातमस्मिन्नवसरेऽपि न ॥ ८ ॥ शासनोत्थानपुष्पान्तर्गतो निरतिशायकः । मकरन्दः कियानस्ति, प्रोत्थानरूपपुष्पके ॥ ९ ॥ 'वीरस्तु भगवान् स्वय'मिति स्वादे रसस्य हि । अभिलाषो यदोत्पन्नस्तदा पाठकसङ्घकः ॥ १० ॥ किञ्चिद्धारय धैर्य्यं तु, मत्तः सर्वं प्रयासतः । निबन्धस्यास्य सम्बन्धे, कथनीयं कियन्मया ॥ ११ ॥ प्रथमं प्रतिपाद्यस्य, विषयस्येदमस्ति हि । सिद्धि प्रमाणतो ज्ञेया, सिद्धान्तस्येति सम्मतम् ॥ १२ ॥ सौत्र-सिद्धान्त-शास्त्रस्य प्राचीनेयं सुपद्धतिः । जैनशास्त्रेषु सूत्रेषु, मुख्यत्वेन सुवर्णितम् ॥ १३ ॥ 'सम्यग्ज्ञानं प्रमाणं' च, प्रत्यक्षेतरभेदत. । द्विविधं शास्त्रतो ज्ञेय, श्रुतिज्ञानाद्धि भावय ! ॥ १४ ॥ अवधिमन पर्य्ययावेकदेशप्रत्यक्षकौ । केवलं सर्व्वप्रत्यक्षं, परोक्षे मतिश्रुतेऽपिच ॥ १५ ॥ इति नीत्या सुविज्ञेयं, प्रमाणद्वयसम्मतम् । प्रत्यक्षं च परोक्षं वा, नान्यदस्ति पृथक् पुनः ॥ १६ ॥ एतद्द्वयप्रमाणे वै, अन्तर्भावोऽन्यकस्य हि । अतश्चैतद्द्वयस्यैव, निबन्धेऽस्मिन्नियोजनम् ॥ १७ ॥ हि केषांचिन्मते न स्यादेतयोरन्तरं पुनः । मान्यतयाऽनयाभावे, वार्ता किं बहुलेखतः ॥ १८ ॥ सुसकेतोपलब्धिभ्या, शंका विषयजा पुनः । निवा-

रणीया यत्नेन, नात्र कार्या विचारणा ॥ १९ ॥ वार्ताऽन्याप्यस्ति चात्रैव, लेखवृद्धिः प्रजायते । वास्तवज्ञानशून्यं स्यात्काठिन्यं विदुषा भवेत् ॥ २० ॥ इति शंका भिया नैव, प्रत्येकविषयस्य हि । प्रमाण स्पष्टरूपेण, न निर्दिष्टमिह स्फुटम् ॥ २१ ॥ जिज्ञासूनां विजिज्ञासा, दृढाय ह्यनुरूपतः । तदा तेषां विनिर्देशोऽवश्यं स्यात्प्रकटं पुन· ॥ २२ ॥ हेतुस्तृतीयो ज्ञातव्यो, विवेचनमवाप्स्यति । प्रस्तुतविषयस्यापि, *सम्प्रदायानुसारतः ॥ २३ ॥ लक्ष्ये विशेषं संस्थाप्य, सूक्ष्ममात्रैकदृष्टित· । प्रत्येकस्यात्र लेखस्याऽनुभवाच्छास्त्रतस्तथा ॥ २४ ॥ सर्वसिद्धान्तत· सार्वभौमस्य व्याप्तिरूपतः । अस्ति सम्भावना चास्य, ज्ञानं सम्यक्त्वपूर्वकम् ॥ २५ ॥ कस्यचिद्धेतुतश्चित्ते, शङ्कोत्पत्तिर्भवेन्न हि । विचारानन्तरं तेषा, शङ्का स्यान्निर्मूलिका ॥ २६ ॥ सर्वत्र मेऽस्ति विश्वासो, नैवं शंका कदापि हि । चतुर्थी च सुवार्तेयं, कस्याऽपि विषयस्य च ॥ २७ ॥ प्रतिपादयितुं शश्वत्कयापि भाषया भवेत् । चतुर्विधत्वं सामग्र्या, अपेक्षा जायते ध्रुवम् ॥ २८ ॥ विज्ञेया सा च सामग्री, निम्नलेखक्रमेण च । निर्णयस्तत्वसंधाना, प्रथमानुयोगरूपतः ॥ २९ ॥ विचारार्थं च वस्तूनां, साक्षाद्विषयवर्णनम् । कथनोपकथनाच्चेति, नान्यो हेतुर्मनागपि ॥ ३० ॥ शास्त्रे पूर्वानुयोग च, धर्मकथानुयोगकम् । कथ्यतेऽत्र विचारेण, तत्वज्ञानार्थिभिर्मुदा ॥ ३१ ॥ "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् । पूर्ववृत्तकथोपेतमितिहासं प्रचक्षते" ॥ ३२ ॥ दृष्ट्यैतयेतिहासोऽपि, चेतसा कथ्यतेऽधुना । स्थानाङ्गेऽपि कथा सेयं, चतुर्धाऽभिनिगद्यते ॥ ३३ ॥ मुख्य फलं कथायाश्च, तत्वनिर्णयमेव हि । य शब्दो यत्परश्चास्ते, तदर्थोऽपि स एव हि ॥ ३४ ॥ लक्ष्ये धृत्वा पदार्थं यं, शब्दस्य कस्य चैव हि । प्रयोगं यदि कुर्वीत, स शब्दश्चार्थवान् भवेत् ॥ ३५ ॥ सर्वेषा सम्मतं चेदं, सिद्धान्तं सस्फुट सदा । तदा सम्पद्यते भाव , सर्वत्रैवं विचारय ॥ ३६ ॥ वक्ता बोधयितुं यं हि, वाञ्छयोच्चार्य्यतेऽसकृत् । श्रोत्राऽपि शब्दः स एव, ज्ञायतेऽर्थसमन्वित· ॥ ३७ ॥ ततोऽन्यार्थप्रतीतेश्च, श्रोतुर्भवति विभ्रम· । भोजनावसरे यद्वत्सैन्धवेति पदात्ततः ॥ ३८ ॥ जन्यते लवणाऽऽबोधो न चान्योऽर्थोऽप्रतीयते । प्रस्थाने हयबोधश्च, तद्वल्लक्ष्ममधारय ॥ ३९ ॥ श्रोत्रैवं सुविचार्य्यार्थो, नान्योऽर्थ· प्रतिपद्यते । अबोधार्थज्ञापकत्वे, सति शास्त्रप्रमाणकम् ॥ ४० ॥ प्रमाणं तु तदेतत्स्यात्प्रमाण-

---

* गुरुप्रदत्तज्ञानानुभवानुसारत इत्याशय· ॥

विषयस्य च । वास्तविक च *सत्यं च, येन ज्ञानं प्रजायते । आत्मानन्दे परं योऽर रमतेऽहर्निशं पुमान् । तत्पदाम्भोजयुग्मेऽस्तु त्रिकालं मम वन्दना ॥ ४१ ॥ अस्यालौकिकविश्वस्य, दृष्टंसद्दृश्यमुत्तमम् । स्फुटं विज्ञायते विश्वं, विश्वमानन्दपूरितम् ॥ ४२ ॥ आनन्दापेक्षया विश्वे, विश्वस्यैकताऽस्ति च । जगतो हि जगद्धर्मो भिन्नभावं गतोऽस्ति न ॥ ४३ ॥ एकैकप्राणी विश्वस्याऽस्त्यानन्दमय एव हि । अस्त्यानन्द प्रियस्तेषामतस्तत्तृषितस्तथा ॥ ४४ ॥ अधिगन्तुं तमानन्दं विश्वधर्मा हि साधनम् । तान् धर्मान् प्राणिनो नैजानन्दायैवोदपीपदन् ॥ ४५ ॥ आनन्दापेक्षया सन्ति, प्राणिनः सदृशाः समे । व्यक्तित्वापेक्षया किन्तु, नरा उत्कृष्टप्राणिन ॥ ४६ ॥ आनन्दस्याभिवृद्ध्यर्थं, मानवा सुमनोहरान् । आकर्षकानुपायाश्चाऽनेकान् विरचयन्ति ते ॥ ४७ ॥ आत्मानन्दवृद्ध्युपायेषु, मनुष्यरचितेषु च । सर्वोत्कृष्ट उपायस्तु, धर्म एवास्ति केवलम् ॥ ४८ ॥ आनन्दस्य स्वरूपं हि, तुल्यं प्रत्येकप्राणिनाम् । सामर्थ्यमात्मनस्तुल्यमस्ति प्रत्येकदेहिनाम् ॥ ४९ ॥ तुल्यं वास्तविकं रूपमस्ति प्रत्येकदेहिनाम् । भवेत्साधनधर्मस्य, सत्येवं तुल्यतोचिता । समानमेव सम्पूर्णमस्त्येतदनुसारतः ॥ ५० ॥ मनुष्यस्तादृश प्राणी, प्रवीणकरणोऽस्ति यत् । आत्मानन्दाभिवृद्धिं स, कर्तुं शक्नोति निश्चितम् ॥ ५१ ॥ एतावदेव न परमन्यच्छृणुत सज्जना. । अनन्तानुभवं प्राप्ता, आत्मानन्दस्य ये नरा. । ते स्वपश्चाद्भविष्यन्त्या, नरजाते कृते खलु । प्राप्तात्मसाधनाधर्मं, स्मृत्यै त्यक्त्वा दिवं गता॰ ॥ ५२ ॥ तेन धर्मस्वरूपेण, साधनेनेतरा नरा । आत्मनो लौकिकानन्दमवाप्तुं शक्नुवन्ति च ॥ ५३ ॥ लोकेऽन्यप्राणिनश्चास्य, प्रत्यक्षजगतः खलु । अलौकिकप्रभापुंजैर्भवत्यानन्दतुन्दिला॰ ॥ ५४ ॥ परन्त्विह मनुष्याख्यदेहिनस्तु स्वयं किल । निजानन्दमया भूत्वा, तन्निजानन्दसम्पदा ॥ समस्तविश्वाप्रतिमाऽऽनन्दवृन्दाभिवर्धनम् । उपादेयं सुरम्यं च, विधानं पारयन्ति च ॥ ५५ ॥ यो धर्मोऽस्ति नृणा सैवालोकिकानन्दसम्पदा । अभिवृद्धेरिहादर्शरूपोऽस्तीति विभाव्यताम् ॥ ५६ ॥ इयं सृष्टिरनाद्यनन्तकालात्तदनुबन्धिनी । अनन्ततत्वरूपेषु, यथावत्संप्रवर्तते ॥ ५७ ॥ आत्मीयानन्ततत्त्वेषु, सा सृष्टिर्ध्रुवरूपतः । अलौकिकस्वरूपे चानन्ततत्त्वस्वरूपतः । अनन्तकालपर्यन्तं सत्यशाश्वतरूपतः ।

---

* अथ सत्यस्य हार्दम्—

अलौकिकानन्दरूपे, नित्याऽवस्थाऽस्य ते स्थिरा ॥ ५८ ॥ विचित्ररूपेयं सृष्टिरस्त्यलौकिकवस्तु च । स्थिरा नित्या च साऽस्तीति, सृष्टिमीमासका जगुः ॥ ५८ ॥ अस्त्यालौकिकसामर्थ्यभूतालंकरणेषु च । सर्गस्य धर्म एवैकं, सर्वोत्कृष्टं विभूषणम् ॥ ६० ॥ धर्ममीमासका लोकेऽनेके समभवन्निह । ते लौकिकपरिष्काररूपेण हितकाक्षिण ॥ नैजधर्मविचारात्मकप्रसादेन मञ्जुना । एतन्महीतलं चाल, चक्रिरेऽलं कृपालवः ॥ ६१ ॥ इदानीं समये चैषामलौकिकप्रसादिनाम् । निम्ननिर्दिष्टनामानो, भवन्तीक्षणगोचरा ॥ ६२ ॥ वेदान्त• सांख्ययोगौ च मीमासा द्वितयी पुनः । न्यायो वैशेषिको शैवो, वैष्णवस्तान्त्रिकास्तथा ॥ स्वामीनारायणो जैनो, बौद्धो मोहम्मद• पुन । ईशायी पारसीयश्च, यहूदीयादय परे ॥ ६३ ॥ एषा तदितरेषाञ्च, भिन्नभिन्नमताश्रिताम् । धर्मालङ्कारभूतानामुद्देश्यं त्वस्ति केवलम् । आत्मानन्दाधिगमनमित्थं तत्वविदो विदु ॥ ६४ ॥ उद्देश्ये सर्व्वधर्माणामेकीभावमुपागते । तत्साधनानि सर्व्वाणि, भजन्तीहैकरूपताम् ॥ ६५ ॥ पृथक् पृथक् देशकालावाधारीकृत्य ते ननु । अन्योऽन्यभिन्नरूपैश्च, सम्प्रवृत्ता भवन्ति च ॥ ६६ ॥ तत्रार्हताना तूद्देश्यं, ज्ञानं केवलमात्मन• । किं च तस्य हि कैवल्यप्रापण केवलोदयात् ॥ ६७ ॥ एतदेवाभिमन्यन्ते, योग-वेदान्ति-वैष्णवा । स्वामिनारायणश्चापि, जैनेनेत्थमिहोच्यते ॥ ६८ ॥ "जे एगं जाणइ से सव्वं जाणइ" एकं जानाति यो नाम, सर्व्वान् जानाति स ध्रुवम् ॥ ६९ ॥ वेदान्तीया भगवती, श्रुतिरप्याह तद्यथा । "आत्मनि विज्ञ ते सर्वमिदं विज्ञातं भवति" ज्ञाते सत्यात्मनं ज्ञातं, भवतीदमशेषत• ॥ ७० ॥ "अप्पा सो परमप्पे"ति, जैना अभिदधत्यथ । वेदान्तकान्तसिद्धान्तभारतीत्थमुदीर्य्यते ॥ "अहं ब्रह्मास्मि" "तत्वमसि" "प्रज्ञानं ब्रह्म" "अयमात्मा ब्रह्म" ॥ ७१ ॥ अहं ब्रह्माऽस्म्यसि त्वं तत्, प्रज्ञान ब्रह्म कीर्त्यते । अयमात्माऽपि तद्ब्रह्म, सच्चिदानन्दरूपि यत् ॥ ७२ ॥ सन्ति वेदस्य चत्वारो, भागास्तेषु चतुर्षु च । अस्त्येकैकं महावाक्यं, दर्श्यते तद्यथाक्रमम् ॥ ७३ ॥ "अहं ब्रह्मास्मि" 'यजुष' साम्नस्तत्वमसीति च । "प्रज्ञानं ब्रह्म", ऋग्वेद' "स्यायमात्मेत्यथर्णव•" ॥ ७४ ॥ चतुर्ष्वेतेषु वाक्येषु, वाक्यं तत्वमसीति ह । उपयोगितरं शश्वन्मननीय च विद्यते ॥ ७५ ॥ जैनानेकान्तसिद्धान्तनियमश्चायमस्ति च । "नाणे पुण नियमा आया" ज्ञानेतु नियमेनात्मा, वर्वर्तीति विदेदिमम् ॥ "प्रज्ञानं ब्रह्म" इत्येतद्वेदान्तेनाभिधीयते

॥ ७६ ॥ आर्हतैरुच्यते जन्ममृत्युरूपा तु संसृतिः । कर्म्मद्वारा प्रचलति, तच्च कर्म्म जडं स्मृतम् ॥ ७७ ॥ कर्म्मणोऽस्य नियन्तात्माऽस्तीत्येवं सर्व्वसम्मतम् । अधिष्ठानं कर्म्मजन्यं, सृष्टेरात्माऽयमस्ति च ॥ ७८ ॥ वेदान्तेनोच्यते माया-द्वारं जन्मादिसम्मतम् । आत्मरूपेश्वरश्चास्यानियामकमुदीर्य्यते ॥ ७९ ॥ स्याद्वादिनो वदन्त्येवं, कर्म्मोपाधौ लयं गते । आत्माऽयं जन्ममरणबन्धनान्मुच्यतेतराम् ॥ ८० ॥ वेदान्तकान्तसिद्धान्तवागत्रेत्थं प्रवर्तते । मायोपाधौ लयं प्राप्ते, भवादात्मा विमुच्यते ॥ ८१ ॥ जैनेनाऽ'पुणरावित्ती'त्युक्तेत्थमभिधीयते । भवत्यपुनरावृत्तिर्भवे मुक्तस्य चात्मनः ॥ वेदान्तोऽभिदधात्यात्मा, पुनरावर्तते न हि । गीतायां कृष्णचन्द्रेण, प्रोक्तमित्थं महात्मना ॥ "यद्गत्वा न निवर्तन्ते, तद्धाम परमं मम" ॥ ८२ ॥ "एगे आये" ति वाक्येन, जैनस्त्वित्थं प्रभाषते । 'एकोऽस्त्यात्मा'-गुण-द्रव्य-पर्यायापेक्षया खलु ॥ "एकोऽहमिति" वेदान्तोऽप्यत्रार्थे कृतसम्मति. ॥ ८३ ॥ जैनाना च मते *तर्को, नात्मान वेत्ति तत्त्वत. । तथा धीश्चात्मरूपं हि, नाप्तुं शक्नोति वास्तवम् ॥ ८४ ॥ †यतो निवर्तते वाणी, सहैव मनसा मुहु । जैना वदन्ति चाखण्डं, परिपूर्णतमं परम् ॥ ८५ ॥ जानयन्ति ये च ‡तद्वत्कैवल्यं प्राप्नुवन्ति ते । वेदान्तिनोऽखिले चास्मिन्भवे ब्रह्म सनातनम् ॥ ८६ ॥ व्यापकं सच्चिदानन्दस्वरूपं वर्णयन्ति च । शास्त्रेऽच्छेद्यमभेद्य च, तथाऽदाह्यमशोष्यकम् ॥ ८७ ॥ अवध्यमस्मिञ्जगति, नात्मा नैव प्रदृश्यते । कदाचिच्चर्मचक्षुर्भ्यां, मृत्युजन्म विवर्जित ॥ ८८ ॥ सच्चिदानन्दरूपश्च, जीवात्मा हि स्वभावतः । क्षित्याद्याकाशभूतेषु, नक्षत्रेष्वपि सर्वत. ॥ ८९ ॥ परिपूर्णतमस्तद्वच्चैतन्यगुणसयुतः । जीवात्मा चैतनारूपसच्चिदानन्दविग्रह' ॥ ९० ॥ न तद्रिक्तं किञ्चिदपि, स्थानं चास्ति भवे क्वचित् । चैतन्याश्रयजीवस्य, दृष्ट्या सर्वं चिदात्मकम् ॥ ९१ ॥ स्वयमात्मा च सर्व्वज्ञ, इति वेदान्तिनोऽब्रुवन् । तथा जैना वदन्तीत्थमात्माऽनन्तश्च ज्ञानयुक् ॥ ९२ ॥ सनातनं व्यापकं च, ब्रह्मवेदान्तिनो विदुः । स्वयं शुद्धो विशुद्धश्च, निजात्मानन्दरूपभाक् ॥ ९३ ॥ सर्व्वज्ञ. सर्वदर्शीति, जैनाश्चैवं वदन्त्यद । §वल्लभा-

---

* "तक्का जत्थ ण विज्जइ, मइ तत्थ ण गाहिता ।" † "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" । ‡ "कैवल्यपदमस्तु ते" । § 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो, निश्चेतनात्मकशरीरगुणैश्च हीन । आनन्दमात्रकरपादमुखोदरादि, सर्व्वत्र च त्रिविधभेदविवर्जितात्मा ॥ १ ॥

चार्यसिद्धान्ते, स्थितिरेषा सनातनी ॥ ९४ ॥ निर्दोषः पूर्णगुणवानात्मानन्द-गुणाश्रितः । स्वतन्त्रः सर्ववित्साक्षी, शरीरगुणवर्जितः ॥ ९५ ॥ तथात्मा करपादादिमुखादीन्द्रियवर्जितः । स चावयवादिभेदेन, कल्पनाकरणेऽपि च ॥ ९६ ॥ सदानन्दमयो नित्यो, वासनारहितो विभुः । श्लोकोक्तात्मतत्वस्य, कल्पनावयवस्य च ॥ ९७ ॥ केवलानन्दरूपश्च, नास्त्यत्र च विकल्पनम् । जन्म-मृत्युजरादिभ्यो, व्यतिरिक्तश्च सर्वदा ॥ ९८ ॥ जन्मोत्पत्तिप्रभङ्गादिभेदशून्योऽस्ति निर्मलः । जन्मादित्रिविधो भेदस्तद्भिन्नं चात्मरूपकम् ॥ ९९ ॥ वल्लभा-चार्यस्य मते, ज्ञेयं तत्तत्वदर्शिभिः । सज्जैनमतसिद्धान्ते, नात्मा कर्तेति निश्चयः (निश्चयनयेनेत्याशयः) ॥ १०० ॥ साङ्ख्यशास्त्रविदश्चाहुः, *कर्ताऽहङ्कार एव च । न कर्तृत्वं चात्मनश्च, निर्लेपत्वादविक्रियात् ॥ १०१ ॥ किन्तु पुरुषोऽकर्तेव, प्रवदन्ति मनीषिणः । ईश्वरः सर्ववित्त्रित्यो, रागद्वेषादिवर्जितः ॥ १०२ ॥ ज्ञानविज्ञानसम्पन्न, इत्येवं वर्णयन्ति च । जैनाश्चेत्थं योगशास्त्रं, †क्लेशकर्म-विपाकतः ॥ १०३ ॥ आशयेनापरामृष्टश्चेश्वरः पुरुषोत्तमः । रागद्वेषादयो भावा, न स्पृशन्ति सदीश्वरम् ॥ १०४ ॥ ‡सर्वज्ञत्वमीश्वरे चास्ति, आत्मा चैतन्यरूपवान् । एवं निगद्यते शास्त्रे, चानन्तो निष्कलोऽव्ययः ॥ १०५ ॥ निर्विवादः सदात्मास्ति, चैतन्यगुणः संयुतः । निष्क्रियो निष्कलस्तद्वद्व्या-पको गुणतः पृथक् ॥ १०६ ॥ तन्माया जगतां कर्त्री, चिच्छक्तिगुण-विग्रहा । §**सत्यज्ञानमनन्तञ्च, ब्रह्मेति** श्रुतिसम्मतम् ॥ १०७ ॥ ब्रह्म-स्वरूपे पापपुण्ये, न स्तो दुःखसुखे तथा । नास्ति किञ्चिज्जगत्यस्मिन्व्यापकत्वं विना स्थितम् ॥ १०८ ॥ सच्चिदानन्दरूपेण, §शिवोऽहं नेतरः क्वचित् । केवलज्ञानसम्पन्नोऽत्रैव मोक्षानुभावकः ॥ १०९ ॥ इति जैनमतं शश्वज्जागर्ति प्रभुरीश्वरः । इदमेव मतं ज्ञेयं, **सहजानन्दस्वामिनः** ॥ ११० ॥ अक्षर-स्थानमात्मैव, स्वयं चाक्षयरूपवान् । **आत्मानं च विजानीयादक्षरं परमं परम्** ॥ १११ ॥ **तज्ज्ञानं सत्यमित्युक्तं, तदन्यत्सकलं मुधा ।**

---

* "अहङ्कारः कर्ता न पुरुषः इति साङ्ख्यः" । † "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।" ‡ "तत्र सर्वज्ञबीजम् ।" § सत्यं ज्ञानमनन्तं ब्रह्म । § न पापं न पुण्यं न दुःखं सुखं न, चिदानन्दरूपं शिवोऽहं शिवोऽहम् ॥

आकाशादिस्थले यच्च, ज्ञानं मिथ्यामयं च तत् ॥ ११२ ॥ प्रणामिमार्गश्रयिणो, देवचन्द्रादयो मुहु । स्वसम्प्रदायके नित्यं, निजानन्दमतं जगु ॥ ११३ ॥ दृष्ट्याऽनया दर्शनेन, भारतेऽत्र सुधर्मिणाम् । जनानामात्मतत्वस्य, सिद्धान्तप्राप्तये मुदा ॥ ११४ ॥ **माहम्मदो**ऽपि वदति, भवेऽस्मिन्यत्प्रतीयते । चैतन्यमेव तत्सर्व्वं, नान्यत्किञ्चिद्विभाव्यते ॥ ११५ ॥ खुदा निरञ्जन. साक्षी, निराकारोऽतिशक्तिमान् । तेजोमयो ह्यनन्तश्च, सर्वज्ञ इति निश्चयः ॥ ११६ ॥ **मोमिनाख्यश्च** सततं, कृपालुं स्वसमीपगम् । पश्यत्येव खुदाऽहं च, खुदाहोर्थो निजात्मन. ॥ ११७ ॥ **जिसिसक्राइष्टमतं**, तद्वच्चतुर्थाकाशकापरि । विभुर्विराजते स हि, भक्तात्मा परिकीर्तित. ॥ ११८ ॥ भक्ताश्च तं प्रपश्यन्ति, तथा भूमण्डलेऽखिले । विख्यातकीर्तिर्**बुद्धो**ऽपि, स्पष्ट समुक्तवानिति ॥ ११९ ॥ **"प्रेमैवात्मा"** जगत्यस्मिन्, प्रत्येकं प्राणिनो मुदे । स्थापनीय च प्रेमैवाभेदभावसमाश्रयैः ॥ १२० ॥ तत्वज्ञानस्य दृष्ट्या तु, दर्शनेन प्रतीयते । जैनो वेदान्तयोगौ च, साख्यबौद्धौ तथा पुन. ॥ १२१ ॥ **अनुभवं चैकतायाः, कुर्व्वन्तीति** विभावय । नेतुं वै चैकतायास्तु, तथानन्दविवृद्धये ॥ १२२ ॥ भिन्नं च साधनं कर्तुं, भिन्नधर्मस्तथा पुनः । भिन्नो देशस्तथा कालो, विभिन्ना पद्धति पुन ॥ १२३ ॥ मीमासकैर्विनिर्दिष्टा, विभिन्नं सर्वसाधनम् । अत एव वहिर्दृष्ट्या, ज्ञायते मतकर्मणाम् ॥ १२४ ॥ भेदाभेदक्रिया सर्वा, तथापि तत्क्रियान्वयम । कुर्यात्त्वभेदभावं च, भजते प्रेमभावत' ॥ १२५ ॥ जैनाश्चाहुर्महाव्रतं, **बौद्धा**स्तत्पञ्चशीलकम् । *योगे पञ्चात्मक प्राह, यमं शमदमादिकम् ॥ १२६ ॥ **वेदान्ते** प्रवर्तनीयो, नियमोऽपि महात्मभि' । प्रत्येकं धर्मनीतिर्हि, दयापरोपकारिता ॥ १२७ ॥ प्रेमादिसामान्यमिति, सर्वसामान्यनिर्णये । नियमोऽपि गृहस्थानां, तथा धर्मे समानता ॥ १२८ ॥ उपयोगितोपभोगश्च, कुर्व्वन्तीति निसाम्यताम् । **वैराग्यलक्षणं तद्वत्समत्वं तुल्यमेव च** ॥ १२९ ॥ सर्वत्र प्राप्य चैकमेवमिति सन्धार्यता मुहु । ज्ञानिना वर्तने दृष्ट्या, **जैनानां** वर्तनं तथा ॥ १३० ॥ †सर्वप्राणिभिरित्येवं, मम भावसमानता । स्थापनीया न न्यूनाधिभवितव्या नियमस्तथा ॥ १३१ ॥ ‡ब्रवीति

---

* "शमदमोपरतितितिक्षाश्रद्धादयः समाधानाः ।" †"मित्तिमे सव्वभूएसु" ‡"आत्मवत्सर्मभूतेषु" मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ॥ यजुर्वेद १८–३ ॥

नियमं चैव, ज्ञायतामित्यत पुनः । **सर्वं मित्रवदापश्येदात्मवत्सर्वे-प्राणिषु** ॥ १३२ ॥ ज्ञानी जनो निजात्मान, जीवात्मान तथैव च । एकी-भावेन सम्पश्येदिति प्राह श्रुतिर्मुहुः ॥ १३३ ॥ देहमीमांसकानां च, अने-कान्तिकदृष्टित. । औदारिकं तेजस च, कार्मणं यच्च कथ्यते ॥ १३४ ॥ शरीरं चैव वेदान्तमतालम्बनतत्परा । स्थूलं सूक्ष्मं कारण च, त्रिविधं वर्णयन्ति च ॥ १३५ ॥ ज्ञानविज्ञानयोर्यच्च, कारणं प्रोच्यते बुधै. । **जैना** यज्जाग्रतं स्वप्नं, तुरीय प्रवदन्ति च ॥ १३६ ॥ **वेदान्ते**ऽपि तथैवास्ति, त्रिधाऽवस्था स्वरू-पतः । तथा **संसृतिमीमांसाज्ञानज्ञाः** प्रवदन्ति च ॥ १३७ ॥ मनसः परिणामेन, बन्धो मोक्षो हि जायते । **सृष्टिः सङ्कल्पतो ज्ञेया,** वेदान्तम-तशालिन· ॥ १३८ ॥ मानसिकं तु **जैनानां,** *परिणाममथाऽपि वा । अध्य-वसाय च वेदान्ते, सकल्पं चैकमेव हि ॥ १३९ ॥ प्रत्यक्षं दृश्यते चैक·, साधनाभेदभावत· । साध्यश्चात्मा हि प्रत्यक्षं, ज्ञायतेऽभेद एव हि ॥ १४० ॥ अनुभवेऽप्येवमेवं, प्रत्येकं च मुमुक्षुभि· । **जीवात्मनि प्रेमभावः, स्थापनीयं** सदैव हि ॥ १४१ ॥ सर्वावस्थासु सर्वत्र, ममैवास्ति स्वरूपकम् । पठित्वेदमभे-देन, प्रेमैव स्थाप्यतां सदा ॥ १४२ ॥ एतत्प्रमाणतश्चात्मानन्दाप्तिः साधनानि च । कुर्व्वन्समन्वयं सर्व्वाभेदभावेन सर्व्वदा ॥ १४३ ॥ चलँस्तिष्ठन्नुपविशन्पिबन्खा-दन्स्वसन्स्वपन् । सर्वक्रियासु सर्वत्र, शुद्धश्चैतन्यरूपवान् ॥ १४४ ॥ अह-मात्मा चेदृशी वै, भावना स्थाप्यता मुहु । न चैतावद्धि विज्ञान, भूतमात्रं मदीयकम् ॥ १४५ ॥ स्वरूप प्रत्युतैव च, ज्ञातव्य च विशेषतः । ज्ञातव्यं प्रतितान्भक्त्या, प्रेमभावप्रवर्षणम् ॥ १४६ ॥ कर्तव्यमित्थं ये चैव, पुरुषा जगतीतले । स्थापयन्त्यभेदभाव, वीतरागास्त एव हि ॥ १४७ ॥ पूर्णाश्च कृतकृत्याश्च, ते सन्ति भुवि चोत्तमा । वीतरागो देवदेवो, महावीर प्रताप-वान् ॥ १४८ ॥ धन्योऽस्ति योहि निष्पक्षपातेन सुन्दरो मुहु । मार्गोऽभेदा-त्मको भावो, दर्शितो जनतामुदे ॥ १४९ ॥ विनि स्वार्थतया यो हि, प्रकटं कृतवान्मुहु । सत्यस्वरूप एवास्ति, स एव परतः परः । स्वतन्त्रत्वस्य यश्चास्ति, द्वारमेतत्प्रधार्य्यताम् ॥ १५० ॥ **भावार्थः**—जो पुरुष केवल आत्मा-नन्दमे ही अहर्निश रमण करते हैं, उनको त्रिकाल वन्दना है। इस

---

*परिणामे बधो, परिणामे मोक्खो ।

अलौकिक विश्वके सुरम्य और सौन्दर्यपूर्ण दृश्यकी ओर दृष्टि फैलनेपर स्पष्टतया नजर आता है कि अखिल विश्व आनन्दसे परिपूर्ण है। अर्थात् अखिल विश्वमें आनन्दकी अपेक्षासे एकता है। जगत्से उसके धर्म भिन्न नहीं हैं, विश्वके प्रत्येक प्राणी आनन्दमय हैं, उन्हें आनन्द ही प्रिय है अतः उसीकी इच्छामें तन्मय हैं। उस आनन्दको प्राप्त करनेके लिये साधन रूप ही विश्वके धर्म हैं, और उन धर्मोंको प्राणियोंने अपने 'आनन्द' के लिये ही उत्पन्न किये हैं, और आनन्दकी अपेक्षा जगत्के सब प्राणी समान हैं। तथापि व्यक्तिकी अपेक्षासे यदि देखा जाय तो मनुष्य एक उत्कृष्ट प्राणी है, और वह आनन्दकी अभिवृद्धिके लिये अनेक आकर्षण एवं सुरम्य उपायोंकी रचना करता रहता है। मनुष्यके रचे हुए आत्मानन्दकी अभिवृद्धिके उपायोंमें धर्म ही एक सर्वोत्कृष्ट उपाय है। प्रत्येक प्राणीके अन्तर्गत आनन्दका स्वरूप समान है। प्रत्येक प्राणीके आत्माका सामर्थ्य समान है। प्रत्येक प्राणीका वास्तविक स्वरूप भी समान है। तव तो इस अपेक्षासे साधन रूप धर्मोंका होना भी समान ही ठीक है, और उसके अनुसार सम्पूर्ण समान ही हैं। मनुष्य कुछ ऐसा प्राणी है कि वह आत्मानन्दकी अभिवृद्धि बहुत जल्दी कर सकता है। इतना ही नहीं बल्कि जो जो मनुष्य आत्मानन्दका अनन्त अनुभव प्राप्त कर चुके हैं वे वे मनुष्य अपने पीछेकी अर्थात् भविष्यकी मनुष्य जातिके लिये पाया हुआ आत्माका साधन रूप धर्म भूतलवासी मनुष्य जातिके लिये स्मारक रूपसे छोड गये हैं। उस धर्म रूपी उपकरण या साधन द्वारा इतर मनुष्य आत्मानन्दके अलौकिक आनन्दत्वको प्राप्त कर सकते हैं। जगत्के अन्य प्राणी इस प्रत्यक्ष विश्वकी अलौकिक प्रभासे आनन्दित होते हैं। परन्तु मनुष्य सज्ञाका प्राणी तो स्वय निजानन्दमय वन कर उस अपने आनन्द द्वारा अखिल विश्वके अप्रतिभ आनन्दमें सुरम्य तथा उपादेयकी अभिवृद्धि कर सकता है। मनुष्योंका जो धर्म है वही अलौकिक आनन्दकी अभिवृद्धि बानगी रूप है। यह सृष्टि अनन्त कालसे अनन्ततत्त्वके रूपमें ज्योंकी त्यों चली आ रही है, और ध्रुव रूपसे अनन्त तत्त्वमें अनन्त तत्त्व रूपसे अलौकिक स्वरूपमें अनन्त काल तक शाश्वत स्वरूपमें ही—सत्य स्वरूपमें ही अलौकिक आनन्द रूपसे स्थिर और नित्य रहेगी। सृष्टि मीमांसक शास्त्री भी यही कथन करते

हैं कि यह सृष्टि अलौकिक वस्तु है, और यह नित्य तथा शाश्वत है। इस सृष्टिके अलौकिक सामर्थ्योंसे भरपूर अलंकारोंमें धर्म ही एक सर्वोत्कृष्ट अलंकार है। जगत्में अनेक धर्ममीमासक हो गये हैं, और वे अलौकिक अलंकार रूपसे अपने धर्मविचाररूप प्रसादीसे इस भूतलको अलकृत कर गये हैं। इन अलौकिक प्रसादियोंमें इस समय वेदान्त, जैन, बौद्ध, साख्य, योग, न्याय, वैशेषिक, पूर्व मीमांसा, उत्तर मीमांसा, शैव, वैष्णव, स्वामी-नारायण, मुस्लिम, इसाई, यहूदी, पारसी आदि मुख्यतासे दृष्टिगोचर होते हैं। इनका तथा इनके अतिरिक्त और और अनेक धर्मालंकारोंका हेतु केवल आत्मानन्दको ही प्राप्त करनेका है। सर्व धर्मका हेतु एक होकर उनके साधन भी एक ही हो जाते हैं, और वे अलग अलग देश कालपर आधार रखकर अलग अलग रूपोंमें प्रवृत्त हो रहे हैं। जैनका हेतु केवल आत्माका पहचानना और उसे मोक्ष तक ले जाना ही है। वेदान्तिक, वैष्णव, स्वामीनारायण, तथा योगीजन भी यही कहते हैं। जिनमें जैन कहते हैं कि—'एगं जाणइ से सव्वं जाणइ' जो एकको जानता है वह सबको जानता है। वेदान्तकी भगवती श्रुति भी कहती है—'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति।' एक आत्माके जाननेसे यह सब कुछ जाना जा सकता है। जैन कहते हैं कि—"अप्पा सो परमप्पा" आत्मा ही पर-मात्मा है। तब वेदान्त कहता है कि—'अहं ब्रह्मास्मि, तत्वमसि, प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म।" 'मैं ब्रह्म अर्थात् परमात्मा हूं' 'तू भी वही है' प्रकर्ष तया सम्यग्ज्ञान ही ब्रह्म है' 'यह आत्मा ब्रह्म है'। वेदके चार खंड हैं, इन चारों खडोंमें एक एक महावाक्य है। 'प्रज्ञानं ब्रह्म' यह ऋग्वेदका, 'अहं ब्रह्मास्मि' यह यजुर्वेदका, 'अयमात्मा ब्रह्म' यह अथर्ववेदका-और 'तत्त्वमसि' यह सामवेदके छान्दग्योपनिषद्का महावाक्य है। जैन सिद्धान्तका नियम है कि—"नाणे पुण नियमा आया।" 'ज्ञानमें नियमसे आत्मा है' वेदान्त भी यही कहता है कि—"प्रज्ञानं ब्रह्म" 'प्रज्ञान ही आत्मा है' जैन कहते हैं कि—जन्ममृत्यु रूपक ससृति कर्मके द्वारा चलती है, और वे कर्म जड हैं। इन कर्मोंका नियामक आत्मा है। यानी आत्मा कर्मजन्य सृष्टिका अधिष्ठान है। वेदान्त कहता है कि—मायाके द्वारा ये जन्मादि हैं और इसका नियामक आत्मारूप ईश्वर है। जैन कहते हैं कि—कर्मो-

पाधिका प्रलय होनेपर आत्माका मोक्ष होता है । वेदान्त कहता है कि मायो- पाधिका प्रलय होनेपर आत्माका मोक्ष है । जैन कहते हैं कि—आत्माका मोक्ष होनेपर 'अपुणराविति' संसारमें पुनरागमन नहीं होता अर्थात् आत्माको फिरसे जन्म मरणके चक्रमें नहीं आना पडता । वेदांत कहता है कि—"न पुनरावर्तते" आत्माकी पुनरावृत्ति नहीं होती । गीताजीमें भी कृष्णचन्द्रजीने कहा है कि—"यद्गत्वा न निवर्तन्ते, तद्धाम परमं मम" 'जहां गये बाद फिर आना नहीं पडता' वही मेरा परमधाम है । अर्थात् पर- मात्माके धामको परमधाम कहते हैं या मोक्ष कहते हैं । वहा जानेपर फिर वापस नहीं आना होता । जैन कहते हैं कि—'एगे आया' आत्मा द्रव्य गुण पर्यायकी दृष्टिसे एक है । वेदान्त कहता है कि "एकोऽहम्" मै एक हू । जैन कहते हैं कि—"तक्का जत्थ ण विज्जइ, मइ तत्थ ण गाहिता' तर्क आत्माके स्वरूप तक नहीं पहुंच सकता, और मति उस आत्माके स्वरूपको ग्रहण नहीं कर सकती' । वेदान्त कहता है कि—"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" जहासे वाणी वापस फिर जाती है वह आत्म स्वरूप मन द्वारा अप्राप्य है । भावार्थ यह है कि—मन और वाणी उस आत्मा का वर्णन नहीं कर सकते । जैन कहते हैं कि—आत्माको सम्पूर्ण या अखंड रूपमें जानने वाले मनुष्य कैवल्य ज्ञानको पाते हैं । वेदान्त कहता है कि—"कैवल्यपदमस्तुते" आत्मा कैवल्य पदका अनुभव करता है । वेदान्त कहता है कि—अखिल विश्वमें सच्चिदानन्द परब्रह्म सर्वव्यापक है । जैन कहते हैं कि—अखिल विश्वमें मारनेसे मरता नहीं, जलानेसे जलता नहीं, काटनेसे कटता नहीं, भेदन करनेसे भेदित नहीं होता, और चर्म- चक्षु द्वारा दीख नहीं सकता, ऐसा सच्चिदानन्द स्वरूप जीव स्वाभाविकतासे सघन रूपमें भरे पडे हैं । आकाश, पर्वत, पृथ्वी, नक्षत्र आदि कोई भी स्थान जीवसे खाली नहीं है । अर्थात् चैतन्यलक्षणयुक्त जीवकी दृष्टिसे देखनेपर चैतन्यदेव समस्त लोकमें भरपूर है । वेदान्त कहता है कि आत्मा स्वयं सर्वज्ञ है, जैन भी यही कहते हैं कि आत्मा अनन्त ज्ञानमय है । वेदान्त कहता है कि ब्रह्म सनातन है । जैन कहते है कि आत्मा स्वयं शुद्ध-बुद्ध आनन्द स्वरूप है और सर्वज्ञ तथा सर्वदर्शी है । वेदान्त और सांख्यादि भी यही कहते हैं । वल्लभाचार्य मतप्रवर्तक कहते हैं कि—**निर्दोष-**

**पूर्णगुणविग्रह आत्मतन्त्रो, निश्चेतनात्मकशरीरगुणैश्च हीनः। आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च त्रिविधभेदविवर्जितात्मा ॥**
आत्मतन्त्र अर्थात् मात्र आत्म-स्वरूप निर्दोष है। पूर्णगुण विग्रह है। पुनः जडात्मक शरीर और गुणसे भिन्न है। इस आत्म स्वरूपके हाथ, पैर, मुख, उदर इत्यादि अवयवोंकी कल्पना करने पर मात्र आनन्द ही हैं अर्थात् सम्पूर्ण आनन्दमय भेद भाव रहित है। आत्म-तत्वके अवयवोंसे श्लोकमें की गई कल्पनामें केवल आनन्द ही इसके अवयव हैं। यह स्पष्टतासे समझमें आ जाता है। इस आत्म-स्वरूपमें जन्म, जरा और मृत्यु रूपी भेद नहीं है। उत्पत्ति, स्थिति, प्रलय रूप त्रिविध भेदसे यह आत्म-स्वरूप भिन्न है। जैन कहता है कि—निश्चय नयसे तो आत्मा अकर्ता ही है। सांख्य शास्त्र कहता है कि—"अहंकारः कर्ता न पुरुषः।" कर्ता, धर्ता अहंकार है पुरुष नहीं, अर्थात् आत्मा कुछ नहीं कर्ता, प्रत्युत अकर्ता है। जैन कहता है कि—"ईश्वर सर्वज्ञ होता है, तथा उसमें राग द्वेष आदि कुछ भी नहीं हैं। योग शास्त्र कहता है कि—"**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।**" क्लेश, कर्म, विपाकके आशयोंके साथ असस्पृष्ट-अलिप्त है, वही पुरुष विशेष पुरुषोत्तम और ईश्वर है यानी ईश्वरको राग द्वेष क्लेश कर्मविपाक नहीं छू सकते। "**तत्र सर्वज्ञबीजं**" उस ईश्वरमें सर्वज्ञत्व होता है। आत्मा अनन्त तत्व रूप है। वेदान्त कहता है कि—"सत्यं ज्ञानमनन्तं ब्रह्म।" ब्रह्म स्वरूपमें पाप, पुण्य, सुख या दुख नहीं है। पुनः वेदान्त कहता है कि—"**न पापं न पुण्यं न दुःखं सुखं न। चिदानन्दरूपं शिवोऽहं शिवोऽहं ॥**" "मेरा आत्म-स्वरूप शिव है, और उस शिवस्वरूप आत्मामें पाप, पुण्य, सुख दुःख नहीं है, क्योंकि वह सच्चिदानन्द रूप है। जैन कहते हैं कि—केवलज्ञानी यहां ही मोक्षका अनुभव करते हैं। इसीसे मिलता जुलता स्वामीनारायण मत प्रवर्तक श्री सहजानन्द स्वामीका भी यही मत है कि—'अक्षर धाम यहीं है, आत्मा स्वयं अक्षर स्वरूप है। जो आत्माको यहांके लिये भी अक्षरधाम समझता है उसीकी समझ सच्ची है, और जो अक्षरधामको किसी अन्य स्थल आकाशादिमें समझते हैं उनकी समझ मिथ्या है। प्रणामीपंथ अर्थात् खीजडापंथ प्रवर्तक महेराज ठाकुर तथा श्री देवचन्द्रजी

अपनी सम्प्रदायको निजानन्द सम्प्रदाय कहते हैं। इस दृष्टिसे देखनेपर पता चलता है कि भारतके धर्मात्मा पुरुषोंका सिद्धान्त आत्मानन्दके पानेका ही है। **मुहम्मद साहब** भी यही कहते हैं कि जगत्में जो भी कुछ चैतन्य प्रतीत होता है वह खुदाकी रवानी है, खुदा निरंजन, निराकार, तेजोमय और सर्वशक्तिमान् तथा सर्वज्ञ है। **मोमिन** तो कृपालु खुदाको अपनें पास ही देखते हैं। खुदाका अर्थ भी खुद ही होता है। **जिसिसक्राइस्टका** भी यही उपदेश है कि चौथे आसमानपर प्रभु विराजमान हैं। वह प्रभु भक्तोंका आत्मा है, और परम भक्त उस प्रभुको प्राप्त करते हैं। अखिल भूमण्डलमें सर्वोत्कृष्ट कीर्तिको पानेवाले **बुद्धदेव** भी स्पष्ट कह गये हैं कि प्रेम ही आत्मा है। अत॰ जगत्के प्रत्येक प्राणीमें अभेद प्रेम रक्खो। तत्त्वज्ञानकी दृष्टिसे देखा जाय तो जैन, वेदान्त योग, सांख्य, बौद्ध आदि सव एकताका ही अनुभव करते हैं। एकता पानेके लिये अर्थात् आत्मानन्दमें अभिवृद्धि करनेके लिये साधनोंको भिन्न भिन्न धर्म मीमांसकोंने भिन्न-भिन्न देश कालमें भिन्न-भिन्न पद्धतिसे समझाया है। अतएव वहिर्दृष्टिसे देखा जानेपर उन मतोंकी क्रियाओंमें भेद जान पडता है। तथापि उन क्रियाओंका समन्वय किया जाय तो वे भेद भी अभेद भाव भजने लगते हैं। जैन जिसे पॉच महाव्रत कहते हैं, वौद्ध उन्हें पाच शील कहते हैं, और योगी उन्हें पाच यम कहते हैं। वेदान्तके शम, दम, उपरति, तितिक्षा, श्रद्धा और समान भी ऐसे ही हैं। परमहंसोंके वर्तन करने योग्य नियम भी अन्तमें एक ही हैं। प्रत्येक धर्मके नीति, दया, परोपकार, प्रेम आदिके सामान्य और सर्वमान्य नियम भी गृहस्थ धर्ममें समानता तथा उपयोगिताका उपभोग करते हैं। समतादि वैराग्यके लक्षण भी सवमें समान रूपसे ही पाये जाते हैं। ज्ञानी पुरुषोंके वर्तावकी ओर दृष्टि डालते हुए जैनोंका वर्ताव **"मित्ति मे सव्व भूयेसु"** सव प्राणिओंके साथ मित्रता अर्थात् समान भाव रखना चाहिये न्यूनाधिक न होना चाहिये। वेद भी कहता है कि— **"मित्रस्य चक्षुपा सर्वाणि भूतानि समीक्षे।"** 'सवको मित्रकी दृष्टिसे देखना चाहिये।' **'आत्मवत्सर्वभूतेपु'** ज्ञानी पुरुप अपनी आत्माके समान सव जीवोंको देखते हैं। देह मीमांसकोंकी तरफ दृष्टि डालनेपर जैन मुख्य-

तासे, औदारिक, तैजस, कार्मण शरीर कहते हैं। इसी प्रकार वेदान्ती भी उन ही शरीरोंको स्थूल, सूक्ष्म और कारण शरीर कहते हैं। जैन जिसे जाग्रत, स्वप्न, सुषुप्ति और उजागर या तूर्यावस्था मानते हैं, उन अवस्थाओंका वर्णन वेदान्ती भी उसी प्रकार करते हुए सन्तोष प्रगट करते हैं। संसृति मीमांसकोंके कथनको देखते हुए जैन यह कहते हैं कि–"**परिणामो बन्धो परिणामे मोक्खो** ।" "मनके परिणामसे ही बन्ध और मोक्ष है।" वेदान्ती सकल्पसे सृष्टि मानते हैं। जैनोंका मानसिक अध्यवसाय और परिणाम तथा वेदान्तका संकल्प एक ही बात है। इन प्रमाणोंसे आत्मानन्दकी अभिवृद्धिके साधनोंका यानी धर्मोंका समन्वय करते हुए वे सब अभेद भावमें प्रत्यक्ष समाये हुये दीखते हैं। साधन अभेद होनेसे साध्य आत्मा भी प्रत्यक्षमें अभेद ही समझा जाता है, और अनुभवमें भी यही आता है। अत. प्रत्येक मुमुक्षु जीवको प्रत्येक जीवमें प्रेम भाव रखना चाहिये, और सब जगहोंमें ही सर्वत्र मेरा ही स्वरूप है, यही पाठ पढकर अभेद प्रेम रखना चाहिये। हलते, चलते, उठते, बैठते, खाते, पीते इत्यादि सब क्रियाओंमे शुद्ध चैतन्य आत्म-स्वरूप हूं यही भावना रखनी चाहिये। इतना ही नहीं, बलिक—जगत्के सब भूत भी मेरे ही स्वरूप हैं। यह जानकर उनके प्रति अभेद प्रेमकी वर्षा करनी चाहिये। इस प्रकार जो पुरुष सब जगत्पर अभेद भाव रखते हैं, वे ही वीतराग हैं, पूर्ण हैं, और कृतकृत्य हैं। धन्य उस वीतराग देवको है कि जिसने निष्पक्षपातसे ऐसा सुन्दर अभेद मार्ग जगत्के कल्याणके लिये निस्वार्थभावसे प्रगट किया है।

ज्ञातार्थस्य पदार्थस्य, ज्ञानं प्रबोधनाद्भवेत् ॥ १५१ ॥ तदनुवादरूपं हि, विज्ञेयं न प्रमाणता । प्रबन्धस्याथ शास्त्रस्य, निर्णेतुं यस्य कस्यचित् ॥ १५२ ॥ विचारोऽत्र प्रकर्तव्यो, नान्यथा सिद्धिरुच्यते । यथोपक्रमप्रारम्भावुपसहार-समाप्तिकौ ॥ १५३ ॥ अभ्यास स हि विज्ञेयो, यद्विचारं समभ्यसेत् । अपूर्वं नूतनं किञ्चिद्यद्ग्रन्थो विनिरूपितम् ॥ १५४ ॥ फलं सुपरिणामं चाप्यर्थवा-दस्तथैव च । प्रशसात्मकवाक्यं च, सोपपत्त्युपपादनम् ॥ १५५ ॥ सम्प्रधार्यैकवाक्यं च, प्रकृतमकरन्दकम् । तद्रसास्वादनं सम्यक्, कर्तव्यं रसतत्त्ववत् ॥ १५६ ॥ कृतस्समस्तजीवास्तु, भव्यमुख्यरसस्य हि । आस्वादनार्थमेवात्र, प्रवृत्ताश्च तृषार्दिता ॥ १५७ ॥ सुवार्तेयं द्वितीयाऽस्ति, तच्चेष्टा करणेऽपि च ।

आप्यते नाऽपि गौणेन, लभ्यते खादनं ततः ॥ १५८ ॥ तदेदमपि ज्ञातव्यं, गौणतोपाधिकारणम् । पुद्गलस्यैव सम्बन्धाज्जायते न च वस्तुतः ॥ १५९ ॥ सच्चित्सुखे तु गौणत्वमेतदर्थमवेक्ष्यते । यदानादिस्वभावेन, वहिरङ्गत्वमेव हि अन्तरङ्गत्वदृष्ट्या तु, केवलानन्दरूपकः ॥ १६० ॥ आत्मानन्तकार्मणवर्गणा सन्धितो भवेत् । 'गुणविकाराः पर्याया.' पर्यायेण समन्वितः ॥ १६१ ॥ कार्मणवस्तु सर्वत्र, सर्वदा परिवर्तते । परिवर्तनं पर साक्षान्नानुकूलमिदं भवेत् ॥ १६२ ॥ तत्रेष्टाऽनिष्टयोर्योगश्चान्योऽन्यं मिश्रितः स्थितः । प्रवृत्तेरात्मन्यतः संविभावादेव दु खकः ॥ १६३ ॥ सम्बन्धवन्धकाभावान्निवृत्तिः स्वस्य भावना । कार्यं करोति सर्वत्र, ज्ञेयं सर्वं विचारतः ॥ १६४ ॥ सच्चिदानन्दकन्दस्य, सत्तायाश्चेति वोधनम् । सुगमत्वेन ससिद्धेर्द्विषयेऽखिलभ्रान्तिता ॥ १६५ ॥ अनुमानापमानस्य, करणं जायते तत । परिणामस्य यस्यास्ति, निग्रहत्वं ततः स्फुटम् ॥ १६६ ॥ अतो यस्मिँश्च कार्मणवर्गणानामवाधत । अत्यन्ताभाव एव स्याद्विशुद्धं भगवत्पदम् ॥ १६७ ॥ लभ्यते तद्धि परमं, नान्यथा कोटियत्नत. । परं यत्र नृदेहेन, सहितो भगवत्सपि ॥ १६८ ॥ चतुष्टयमनन्तं च, भाति तद्भगवत्पदम् । अर्थान्सर्वानतीतादीन्, ज्ञातव्योऽवश्यमेव च ॥ १६९ ॥ यस्मिन्नैश्वर्यवीर्ये च, यशो धर्मश्च ज्ञानकम् । श्रीवैराग्यं तथा मोक्ष, इमे षट्संख्यका गुणाः ॥ १७० ॥ समुदायस्य शास्त्रेषु, 'भगसंज्ञा' प्रकीर्तिता । भगवच्छब्दकस्याऽस्य, लक्षणं समुदाहृतम् ॥ १७१ ॥ **कुण्डिनेशनरेशस्य, सिद्धार्थनन्दनेन च । त्रिशलाङ्गजवीरेण, त्रिजगद्गुरुणा मुहुः** ॥ १७२ ॥ सम्पूर्णरीत्या विज्ञातस्तेन तत्रास्ति लक्षणम् । इति विवेचनेनैव "वीरस्तु भगवान् स्वयम्" ॥ १७३ ॥ इत्यस्याक्षरशश्चार्थो, भविष्यति समर्थनम् । निरूपणं तथा तस्य, समेष्यति विचारतः ॥१७४॥ **"ऐश्वर्यस्य समग्रस्य"** इत्यस्यार्थोऽनुक्रमतः । भगवद्वीरदेवस्य, जन्मकालात्ततो मुहु ॥ १७५ ॥ निर्व्वाणपदप्राप्त्यन्तं, जन्मकालादनुक्रमात् । निखिलस्येतिहासस्य, प्रत्येकं लघुभावतः ॥ १७६ ॥ सिद्धोऽस्तीति महावीरो, भगवानादिपूरुष । सम्प्राप्य पूर्णरूपेण, चतुष्टयमनन्तकम् ॥ १७७ ॥ अनन्तशक्तियोगेन, सर्वैश्वर्य्यं तथाप्तवान् । अनन्ततेजस्तद्वच, प्रथमयाऽवस्थया मुदा ॥ १७८ ॥ सकलैश्वर्य्यस्वत्वेन, युक्तश्चासीन्निशामय । स्वर्गजातकपर्य्यायपूर्तिं कृत्वाऽथ नाकत. ॥ १७९ ॥ स्वर्गात्पूर्णश्च देवायु., शरीरं वैक्रियं तथा । एवमाहारसम्पूर्ण, कृत्वा राज्या सुकुक्षितः

॥ १८० ॥ त्रिशलाया. समुद्भूय, चतुर्दशविधं पुनः । महास्वप्नं प्रदृष्टं च, स्वर्णवृष्टिरसंख्यका ॥ १८१ ॥ जन्मोत्सवं सुराणा वै, शक्रस्यागमनं तथा । विधातुमुत्सवं सर्वे, सुरेन्द्रसेवनं पुन ॥ १८२ ॥ प्रतिक्षणसपर्यायाः, सामग्र्या च मुहुर्मुहुः । नेयमल्पस्य वीर्यस्य, वार्तास्ति सुप्रबुध्यताम् ॥ १८३ ॥ स्वसयमस्य वेलाया, तेनानन्तस्ववीर्यत । ऐश्वर्यस्यानुकूलत्वप्रतिकूलत्वयातना ॥ १८४ ॥ इति परिषहं जित्वा, सम्प्राप्य विजयं तथा । जिनत्वं तेन संलब्धं, तदाऽसख्यसुरासुरैः ॥ १८५ ॥ नरैर्नरेन्द्रैर्देवेन्द्रै·, समुत्कृष्टक्षयोपशमात् । एत-द्वारैव सद्भावाऽनुभवश्च कृतो महान् ॥ १८६ ॥ "स्वयन्तु भगवान् वीर" इति निश्चित्य मानसे । रागाद्यान्तरिकाञ्शत्रून्, विनिर्जित्य विभुर्जिन ॥ १८७ ॥ अतश्चानन्तरूपेण, प्राप्त्यनन्तरमेव हि । भगवद्वीरदेवस्य, समग्रैश्वर्यरूपकम् ॥ १८८ ॥ सुस्पष्टं लक्षणं चास्ति, विवरणत्वं तदाधिकम् । निरूपणत्वमेवं च, नावश्यं तस्य वर्णनम् ॥ १८९ ॥ "**समग्रस्य च धर्मस्य**", लक्षणं सनि-रूप्यते । तया साधनसामग्र्या, धर्मो नाम्नोच्यते बुद्धै· ॥ १९० ॥ दुर्गतौ पतमान यो, जीवं धारयते मुहु । स एव धर्मो विज्ञेयो, यतोऽनन्तसुखोद्भवः ॥ १९१ ॥ दुर्गतौ पतितं तद्वदुदन्तं जीवमित्यपि । सरक्षत्युन्नतिपथि, तिरो भावं करोति न ॥ १९२ ॥ "स चात्मपुरुषार्थस्य, धर्म इत्युच्यते बुधै·।" तदाऽऽत्मपुरुषार्थस्य, धर्मसज्ञा ब्रुवन्ति च । एतद्दृष्ट्या तु भगवान्, सदा वीरो हितावहः ॥ १९३ ॥ धर्ममूर्तिस्तथा साक्षादभूदिति निशामय । "परमेष्ठी परज्योतिर्विरागो विमल· कृती । सर्व्वज्ञोऽनादिमध्यान्तः सार्व्व. शास्तो-पलाल्यते ॥" इत्युक्त्यनुरोधेन, भूत्वा सर्व्वोपदेशक· ॥ १९४ ॥ सच्छास्त्र-द्वादशाङ्गस्य, गिरा प्रख्यानकं पुनः । विधाय शास्त्ररूपे च, कृतवान् परिणतं मुदा ॥ १९५ ॥ "आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् । तत्वोपदेशकृत्सार्व्वं, शास्त्रं कापथघट्टनम् ॥" शास्त्रमित्थं च निरवद्यं, प्रदाय भगवान् जिनः । स्वीयामृतमयं रूपं, तथेष्टं सकलं पुनः ॥ १९६ ॥ अनेकान्तं समाश्रित्य, श्रेष्ठो-पदेशकैरपि । तथाऽऽदर्शमयाऽनन्तं, चरित्रं न. प्रदर्श्य च ॥ १९७ ॥ एवं चानुपमं दिव्य, श्रावकश्रवणार्हकम् । गृहिधर्ममनागारं, साधुधर्मरहस्यकम्, ॥ १९८ ॥ कृतकृत्यं भव्यसृष्टे·, कृतवान् य समासतः । विनिर्व्वाणपथादर्शो, भूत्वा भव्यात्मना मुहुः ॥ १९९ ॥ कार्मणवर्गणानां च, भारमुत्तार्य यत्नतः । लघूँस्तान् कृतवान् सर्वान्, वर्धमानो नयान्वितः ॥ २०० ॥ त्रयात्मकं यथो

द्दिष्टं, रत्नं नयप्रमाणकम् । तत्वनिक्षेपसंज्ञं वै, गभीरत्त्वं महत्वकम् ॥ २०१ ॥ परिपूर्णं तदाऽप्यासीद्यल्लघुत्वमहत्वयोः । चतुरस्रेण वै तद्व्याख्याने लेखने तथा ॥ २०२ ॥ वर्णनं क्वचिदस्तीह, ज्ञेयमन्यद्विचारणात् । स्थालीपुलाकन्यायेन, प्रत्येकं लघुभावतः ॥ २०३ ॥ किञ्चिन्मुख्यत्वभावेन, दिग्दर्शनमतोऽकरोत् । निगद्यते पुनः स्पष्टं, भगवद्वीरस्वामिनः ॥ २०४ ॥ निर्व्वाणं परमार्थेन, सह व्यवहारिकी दशा । कियदुन्नतिरूपेण, तथा पुष्कलभावत. ॥ २०५ ॥ आसीद्यतः सहस्रेषु, जगत्सम्बन्धमात्रतः । गार्हस्थ्यजीवनं तेषां, समुज्वलतयाऽस्ति चेत् ॥ २०६ ॥ तत्प्रमाणाङ्गभूतं हि, उपासकदशाङ्गके । सूत्रेऽपि विद्यते तावद्धीमता तत्र दृश्यताम् ॥ २०७ ॥ गृहाश्रमे वहुविधे, कार्यादर्शकरूपिणि । कुर्व्वन् परिणतं त्वासीत्स्वयं तच्च निशामय ॥ २०८ ॥ (१) 'वीरस्तु भगवान् प्रभु', पितरावभितः प्रति । पूर्वं गर्भाशये मातुर्जनकस्य च सेवनम् ॥ कृत्वाऽथ दर्शनायैवं, ज्ञानानुभवतस्तथा ॥ २०९ ॥ स्वयं प्रतिज्ञा कृतवान्, यावन्मे जननी पिता । जीवतस्तावदत्यन्तमर्हद्दीक्षा सुसंयमम् । योगाभ्यास न चाहं वै, स्वीकरोमि कदापि हि ॥ २१० ॥ यतो मे जनको माता, मोहदृष्ट्याऽनुरागवान् । न तु समतया दृष्ट्या, इति चिन्तापरोऽभवत् ॥ यतोऽहमनयोस्सत्त्वे, संन्यासं संयमं व्रतम् ॥ २११ ॥ चरिष्यामि प्रसगेऽपि, न हेयोऽप्यनयोर्नयः । हृदये पुनराघातः, स्यान्महानिति मे मति ॥ २१२ ॥ दु साध्यं च भवेत्तस्मात्सहनं चेतसा कुतः । जीवनस्याऽनया रीत्या,, ससारसार्वदैशिकी ॥ २१३ ॥ घटनयाऽनया शिक्षा लभ्यते नो निशामय । पित्रोराज्ञा विना तद्वदौदासीन्यं न कर्हिचित् ॥ २१४ ॥ कोऽपि त्यक्त्वा गृहारम्भं, मुनिचर्या न धारयेत् । घटनयाऽनया तेषा, यदाज्ञापालनं तयो ॥ २१५ ॥ विज्ञायावश्यकत्वेन, सेवायाश्च कियत्फलम् । संसाध्य दर्शनं तस्य, मौलिकं च विभावयेत् ॥ २१६ ॥ तीर्थङ्करोऽपि भगवान्, प्रथमे जीवनेऽपि यत् । सेवाधर्मस्थापनं वै, कुरुते विश्वभावनः ॥ २१७ ॥ कथ्यतां किं च वीरस्य, स्वामिनश्चेदमद्भुतम् । आदर्शरूपं सेवाया॰, पितृणा किमनल्पकम् ॥ २१८ ॥ महत्वं विपयश्चास्ति, सूक्ष्मदृष्ट्याऽवलोक्यताम् । प्रतिज्येष्ठं भ्रातर च, अत्युग्रोदारशीलता ॥ २१९ ॥ नन्दीवर्धननामानं, भ्रातरं भगवान् रहः । एकस्मिन् दिवसेऽवोचत्, मदीयोऽभिग्रहोऽधुना । समाप्तोऽभूद्यतश्चाद्य, भवदाज्ञा प्रगृह्य च ॥ २२० ॥ दीक्षितेक्ष करोम्यद्य, तदा ज्येष्ठोऽब्रवीद्वचः । निर्मोहं च प्रभुं ज्ञात्वा, स्वयं तु मोहपीडित॰

॥ २२१ ॥ भवन्तं ज्ञायते शुद्धं, स्वर्गारोहणयोगत॰। पितुर्मातु॰ स्फोटकोर्ध्वे, लवणक्षेपणे॰ सम॰ ॥ २२२ ॥ भविष्यति न सन्देह, इति कृत्वा दया भवान्। मदीयकथनेनैव, समुषित्वा गृहे पुनः ॥ २२३ ॥ अब्दद्वयसुपर्य्यन्त, दर्शनार्थमुदारताम्। दर्शयेच्चेन्महान् देवानुग्रह॰ स्यान्मयि प्रभो! ॥ २२४ ॥ तथैव भगवान् वीर, कृतवान्नान्यथा क्वचित्। भ्रातु पूज्यतमस्यापि, चेच्छया वापि सम्मत ॥ २२५ ॥ त्यागोऽनुकूलगमनं, नोचितोऽथ निवृत्तित॰। तथापि भगवान् वीर, स्वयं च जगदीश्वर ॥ २२६ ॥ ज्येष्ठो भ्राता दर्शनेन, विनयेन च तोषित॰। तद्वच्च सुखिनः कृत्वा, ज्येष्ठभ्रातु॰ सुसेवनै ॥ २२७ ॥ पाठोऽपि पाठितस्तेन, वर्षद्वयमभूद्गृही। भ्रातुराज्ञानुरोधेन, दीक्षाऽपि नैव धारिता ॥ २२८ ॥ एवं सयमसकल्प, हित्वा निर्वाणदं ध्रुवम्। प्राशुकभोजी भूत्वा च, गृहमेवाश्रयत्पुन ॥ २२९ ॥ धन्योऽसि! भगवँस्त्वं हि, नाऽप्रसन्न॰ कृतोऽनुज। अत॰ पाठमिमं लोक, स्वयमाप विना श्रमम् ॥ २३० ॥ भगवद्वीरवत्स्वस्य, भ्राता पितृसम स्मृत। इति ज्ञात्वा सेवया च, सुखिनं तं विधाय च ॥ २३१ ॥ सन्तुष्टत्वेन सस्थाप्यस्तथा मान्योऽनुजो मुहु। तेऽपि रक्ष्या॰ प्रयत्नेन, धर्मोऽयं व्यावहारिक ॥ २३२ ॥ तद्गार्हस्थ्ये च वैराग्यमष्टाविंशतिसख्यके। वयस्येव सुसम्पन्ने, पित्रो॰ स्वर्गतयोस्तदा ॥ २३३ ॥ तदा वर्षद्वयं स्थित्वा, गृहेऽध्यात्मस्वरूपके। चिन्तनं योगिचर्याया, समारम्भोऽप्यकारि च ॥ २३४ ॥ तेनास्माद्योगतः सम्यग्बोधिता दीक्षणेप्सवः। दीक्षाधारणत॰ पूर्वं, गृहिधर्मे समभ्यसेत् ॥ २३५ ॥ विशेषतो योगचर्यां, यया विशदया सदा। चर्यया च सुभाविन्या, स्यान्निवृत्तिर्यथाक्रमम् ॥ २३६ ॥ इत्थं तस्या॰ स्वयं ज्ञानं, जायेत तदनन्तरम्। सहिष्णुतायास्त्यागस्य, भवेज्ज्ञानं तथा पुनः ॥ २३७ ॥ अद्यावधिकियज्ज्ञातमुदारोत्तीर्णता यदि। अभिप्रायोऽस्ति मे चाद्य, सच्चर्याया विपाकतः ॥ २३८ ॥ भूत्वा दृढस्तत पादौ, धर्तव्यस्साधुसाधने। न तु पूर्वं ततश्चैवं, विज्ञानां गतिरीदृशी ॥ २३९ ॥ (३) **राजनैतिकशिक्षायाः, शिक्षको** यत्र कालके। अमात्यनृपतीनां च, पुत्राणां भूभुजां पुन॰ ॥ २४० ॥ यदाऽभूज्ज्ञानमेत्तद्धि, नरराजसिद्धार्थकात्। महिष्या त्रिशल्याऽदर्शि, स्वप्नश्चतुर्दशविधः ॥ २४१ ॥ यौवने सार्वभौमश्च, चक्रवर्ती भविष्यति। एतद्वृत्तान्तश्रवणाच्छ्रेणिकेन्दुप्रद्योतनौ ॥ २४२ ॥ दधिवाहनप्रभृतिराजपुत्रा॰ समागता॰। भगवद्वीरसेवायां, संलग्नाश्च मुहुर्मुहुः ॥ २४३ ॥ क्षत्रिया॰

ह्रोचिता सेवा, ततोऽतिरिक्ते शिक्षणे । प्रवृत्ता भावुकत्वात्ते, सुश्राद्धोचित-कर्म्मणि ॥ २४४ ॥ तेभ्योपि भगवान् वीरो, गृहस्थक्षात्रयोरपि । वोधयित्वा च सद्धर्म्मं, सदैतान् सम्प्रयुज्य च ॥ २४५ ॥ व्यवहारेऽथ न्याये च, निपुणत्वं स्वधर्मणि । नियुक्ता राजपुत्रास्ते, चान्तरज्ञस्वभावतः ॥ २४६ ॥ जातावबोधस्तेनायं, धर्मधीश्चतुरन्तक । चक्रवर्ती तथाऽस्य हि, भविष्यति न संशयः ॥ २४७ ॥ तन्निरीहविचारोप्राप्तान्प्रतिस्वर्णवद्रुत. । प्रभावस्तेन ते सर्वे, स्वराज्ये सुकलत्रकम् । परिग्रहे च सन्तोषं, प्राप्याऽऽगता यथागृहम् ॥ २४८ ॥ राज्यशासनकर्मादौ, दक्षं प्रशासको ह्यभूत् । प्रजारक्षणनिष्ठावान्, भूत्वा तद्-वनं कृतम् ॥ २४९ ॥ "दमनं तु शठाना चावनमशठाना तथा । समाश्रिताना भरणं, **राज्यचिह्नमिति स्मृतम्** ॥ २५० ॥ चरितार्थमेतदुक्ते, करणे जातं निरन्तरम् । अथातः सम्प्रवक्ष्यामि, वार्षिकदानमुत्तमम् ॥ २५१ ॥ **अथ सांवत्सरिकदानम्**—दीक्षाधारणतः पूर्वमेकवर्षप्रमाणत. । त्रिंशद्वर्ष-समारम्भे, जिताचारसुभावत ॥ २५२ ॥ निरीहत्वेन यद्दानं, दीयतेऽनुपकारिणे । इत्यादिदानधर्मस्य, प्रारम्भं कृतवान् मुदा ॥ २५३ ॥ वर्षावधि सुभव्येभ्यो, मानवेभ्यः प्रदत्तवान् । पुष्कलत्वेन दानं यत्सर्वे तेनाऽनृणा कृता ॥ २५४ ॥ केऽपि कस्यापि न जाता, ऋणिन इति सुप्रथा । तथा पुद्गलवर्गे च, ममत्वं तु ह्यपाकृतम् ॥ २५५ ॥ रीत्याऽनया पुनस्तेषां, न मोहस्मृतिविभ्रम । न जातं च ततश्चेयं, शिक्षा नः स्थापिता पुरा ॥ २५६ ॥ नीत्वा सन्यासमैश्वर्यं, भौतिकाच्च तथैयती । समुत्तीर्य पदार्थात्तु, यतो भाविनिकर्म्मणि ॥ २५७ ॥ नात्मावरोधो जायेत, तथारम्भपरिग्रहात् । निवृत्तोऽप्रतिवद्धश्च, भूत्वाऽध्यात्मन्य-मायया । ततो विलीनो भावाच्च, भवेदत्र न संशयः ॥ २५८ ॥ **अथ शैशवे निर्भयक्रीडनम्** । वस्तुतोऽन्तकपर्य्यन्तं, निर्भयत्वेन संस्थित. । परं भयं न वाल्येऽपि, कृतवान् स कदापि हि ॥ २५९ ॥ विषान्वितोरगं रज्जुमिवो-त्थाप्य प्रक्षिप्यते । श्वापदाजीवसङ्घाँश्च, सदासक्तान्स्वतेजसा ॥ २६० ॥ करोति स भवन्तं च, दृष्ट्वैव दूरमाव्रजन् । महतो भयङ्करान्देवानसुरान् राक्षसाँस्तथा ॥ २६१ ॥ वलिनो विद्विषस्तद्वदनायासेन लीलया । विजित्य जयमाप्नोति, संशयं नात्र कर्हिचित् ॥ २६२ ॥ **अथावोधाभीरकप्रकरणम्**—अवोधाऽऽ-भीरवन्यानां, गोमहिष्यादिचारिणाम् । कस्मिन्देशे च तेषा वै, सञ्ज्ञा 'पाली' ति कथ्यते ॥ २६३ ॥ त्रलद्भिर्मनुजै. साकं, मुधैव वहुधर्षणम् । अज्ञान

क्रोधकरणं, क्षेत्रविध्वंसनं तथा ॥ २६४ ॥ प्रतिद्वन्द्विनामिदं कर्म, तेषा सुगम-मस्ति हि । ध्यानमग्नो वने संस्थ, कायोत्सर्गे व्यवस्थित ॥ २६५ ॥ तत्क्षणेऽ-ज्ञानावस्थाश्च, रज्जुभिस्ताडयन्ति च । निर्माय तस्य पार्श्वे तु, चुल्हिका पायसं यदा ॥ २६६ ॥ पाचयन्ति क्षणे तस्मिन्, तापयन्त्यमितस्तथा । स च वीरतया सर्वं, सोढवान्न च दु खभाग् ॥ २६७ ॥ एकमेव कोप्यवोधो, विनोदेन शला-कया । वंशस्य तीक्ष्णया कर्णे, भेदितो रक्तधारया; आप्लुतश्च तत कायें, दुर्वलत्वमजायत । तथाऽप्यनुग्रहस्तस्मै, कृतस्तेन महात्मना ॥ २६८ ॥ नानिष्टं प्रोक्तवाँस्तस्मै, किञ्चिदपि च दु·खत । दृष्ट्या समानया तद्वत्समभावनया तथा ॥ २६९ ॥ यातना सहनशीलोऽप्यभूदादित एव सः । ध्यानावस्था दृढा जाता, मानसीवृत्तिरीदृशी ॥ २७० ॥ मेरुवत्तस्य सञ्जाता, ध्यानवृत्ति सुनिश्चला । सागरवच्च गम्भीरा, सूर्यवत्सा प्रकाशिका ॥ २७१ ॥ सहिष्णुता समुत्पन्ना स्वर्गेऽपि तत्प्रशंसनम् । सभायां शक्र इन्द्रोऽपि, प्रशंसा कृतवान्मुहु ॥ २७२ ॥ दुर्विदग्धा सभाया ये, ज्ञानशून्या· सुरास्तथा । विश्वास नैव कुर्व्वन्ति, दर्शना-शेन वर्जिता ॥ २७३ ॥ देवाङ्गनासहस्राणि, गृहीत्वैक समाययौ । परीक्षार्थं भगवत, संङ्गमश्चाब्रवीत्सुर ॥ २७४ ॥ "ध्यानव्याजेत्यादि" चेति, वाक्यं तद्विबुधाधमे । ध्यानं तु केवलं देव! व्याजमात्रं प्रदर्श्यते ॥ २७५ ॥ नेत्रे सम्मील्य भगवन्! प्रियां कामपि ध्यायसे । देव! त्वदग्रे कामोऽपि, हावभावसु-विभ्रमै ॥ स्त्रिय. कटाक्षपात हि, कुर्व्वन्ति स्म मनोहरम् ॥ २७६ ॥ किञ्चिदु-न्मील्य नेत्रे च, दृश्यता नो जगत्प्रभो! कामबाणार्दितास्तास्तु, सम्पीड्य हृदयं मुहु । स्थिता क्षिप्रं गृहीत्वैव, वाहुं स्ववशमानय ॥ २७७ ॥ भवान् दयालुः षट्कायरक्षणे सम्प्रवर्तते । परं नो मन्मथो देव! सन्तापं कुरुते रह ॥ तत्प्रतीकारहेतुश्च, भवानेव हि दृश्यते ॥ अतो वयं भगवत, शरणं च समा-गता. ॥ २७८ ॥ वचनार्थमत. स्वामिन्! तवाङ्के पतिता वयम् । देहि नो स्थानं भगवन्! ज्ञात्वा त्वा हि कृपानिधिम् ॥ २७९ ॥ शरणागता इति ज्ञात्वा, दीनाना त्राहि भारतः । महान् खेदस्य विषयो, यन्न वा रक्षतीश्वर! ॥ २८० ॥ न किञ्चिच्छ्रूयतेऽस्माकं, न चोत्साहं प्रदीयते । त्राता भूत्वा न कुरुते, रक्षामपि दयापर· ॥ २८१ ॥ सुस्पष्टं ज्ञायतेऽनेन, मिथ्याकारुणिको भवान् । वर्षतस्ते वयं कुर्म., सेवा न त्वं प्रसीदसि ॥ २८२ ॥ कर्णान्ते ते न यूकाऽपि, चलते किमतः परम् ।वयं पराजयं मत्वा, ज्ञातवन्तस्ततोऽधिकम् ॥ २८३ ॥ नान्योऽ-

तिनिर्घृणतरो, कठोरहृदयोऽपि च । त्वत्समो नास्ति संसारे, परिपक्को दयानिधे! ॥ २८४ ॥ एवमुक्त्वा चालयन्तो, ध्यानादुद्विग्नमानसा. । समाश्रित्य स्वमार्गं ता, गता स्वसदनं प्रति ॥ २८५ ॥ अतोऽस्माकमियं शिक्षा, सामायिके च संवरे । प्रौषधे प्रतिक्रमणे, समाराधनके क्षणे ॥ २८६ ॥ रचनीये दृशी चर्या, यत· स्यादचलाऽनघा । भूत्वा विषयतस्तद्वद्विजयःस्यादनुक्रमात् ॥ २८७ ॥ इत्युपदेष्टा सञ्जातो, ज्ञायतां मनसा हृदा । **अथ शरणागतान् रक्षणम्**—अथार्तान्छरणापन्नान्प्रति वीरस्य सद्गुरोः । छद्मावस्था त्यागपर, निष्कामजीवनं तत· ॥ निर्वाह्यति ससारे, तपश्चर्याव्रतेन च ॥ २८८ ॥ आर्तासन्तापिताश्चान्यैर्यदा तच्छरणागता· । तेषामाव्हानमादौ हि, शृणोति च यथा श्रुत ॥ २८९ ॥ तत्का ध्यानं तपश्चर्यां, तेषां रक्षा कृताऽनिशम् । महतोऽसाध्यकष्टाच्च, सुरक्षयति तान् श्रमात् ॥ २९० ॥ स चमेन्द्रो हि शक्रस्य, ह्यपमानं विधाय वै । पलायतोऽशनिपाताद्रक्षनार्थं च तस्य हि ॥ २९१ ॥ शरणं पादपद्मस्य, समागत्य स्वजीवनम् । शक्नोम्यहं न जेतुं तं, तेनेत्युक्तं यदा प्रभु· । ततो रक्षितवॉस्तं च, **वीरः सदयवान् जिनः** ॥ २९२ ॥ एकदा मगधे देशे, मस्करीस गोशालकः । यदा तत्पृष्ठगो जातो, वीक्ष्यमेकं तपस्विनम् ॥ २९३ ॥ परस्तु वृक्षशाखाग्रे, लम्बमानमध शिरः । कृत्वोर्ध्वपादं यश्चोग्रं, तपस्तपति नित्यश· ॥ २९४ ॥ तज्जटाजूटतो यूका, निस्सृत्य पतिता भुवि । तदा ता दयया युक्त, पुनः स्वकचमण्डले । स्थापयति च तं दृष्ट्वा, गोशालश्च प्रहस्य वै ॥ २९५ ॥ उवाच नेदृशो दृष्टो, यूकाशय्यातरस्तथा । इति दुष्टस्वभावेन, ह्यवज्ञा कृतवान्पुन· ॥ २९६ ॥ शठं प्रति च शाठ्यं वै, कुर्यादिति विचार्य च । कोपावेगसमाविष्टस्तपस्वी स्वतपोबलात् ॥ २९७ ॥ नेत्रद्वारैव प्रति त, तेजोंऽशतीक्ष्णरश्मयः । पातिता येन तडितो, यातनेवातिदु सहम् ॥ २९८ ॥ प्राप्य दु·ख ददाहाथो, स्वरमन्देन प्राह च । शरणागतं च मा त्राहीत्येवं वाचं जगाद सः ॥ २९९ ॥ तदा पितामहश्चैवं, दयां कृत्वा स्वनेत्रत· । हिमवच्छीतला लेश्या, तस्योपरिप्रक्षिप्तवान् ॥ ३०० ॥ तमनार्थं मृत्युपाशान्मुक्तवान् कृपया मुहु· । विभो! त्वं हि धन्यतरस्त्वदीयेयं कृपा मयि ॥ ३०१ ॥ न कृत्रिमा वास्तविकी, स्फुटं मे सुप्रतीयते । श्रीमद्भगवतश्चेदं, चरित्रं शिक्षणप्रदम् ॥ ३०२ ॥ प्रविष्टमिति तच्चित्ते, षट्कायप्रतिपालकम् । शंकटान्मोचनीयं च, प्रथमं चोपदेशनम् ॥ ३०३ ॥ कृतवांश्च स्वयं साक्षा·

हृदये चावधार्य्यताम्। अपुनरावृत्य भावस्य, पन्था तेनैव दर्शित॰ ॥ ३०४ ॥ **अथ मनुष्यवन्मूकपशुरक्षणम्**–मनुष्यवन्मूकपशूनरक्षयत्स्वयं जिनः। यदा हि वाममार्गोणा, प्रसारमधिकं ह्यभूत्।, तदा ते दयया हीना, व्याजाद्यज्ञाच्च कोटिश॰। पशवो वहवस्तैश्च, हता मूका निरागसा॰ ॥ ३०५ ॥ तस्मिन्काले च शमिना, घातकास्ते तपोवलात्। अवरुद्धाश्च वीर्येणानन्तशक्त्या तथा पुनः ॥ ३०६ ॥ न हन्तव्या न हन्तव्या, घोषणेयं मुहु कृता। अवरुध्य भीषणं काण्डं, ससारस्थितप्राणिनाम् ॥ ३०७ ॥ रक्षिताश्चानन्तजीवास्तथाऽसिघातनादपि। तस्यायमुपकारस्तु, धर्मोऽयं च पुरातन॰ ॥ ३०८ ॥ मुद्राङ्किता॰ कृतास्तेन, तत्स्मृतिर्वर्ततेऽधुना। महोदयो **वालगङ्गाधरतिलकसंज्ञकः** ॥३०९॥ **नेता श्रीभारतस्यासीद्धन्यवादं प्रदत्तवान्।** जैनसमाजवृन्देभ्यो, नैतच्चाल्पमहत्वकम् ॥ ३१० ॥ अपकर्तृपशूद्धारो, मनुष्य इव सत्कृत॰। हिंसकादेरपकर्तुः, पशोरप्यपकारणम् ॥ ३११ ॥ सदोपेक्षैव सद्भावा, कृता तेतिति संस्फुटम्। हिंसावृत्तिरताना तु, पशूनां वृत्तिपाशवीम् ॥ मोचयित्वा समाधेश्च, दत्वा वोधमनामयम् ॥ ३१२ ॥ सदाचाराधिकार च, ददाति स्म न संशयः। यथा चण्डकौशिकेन, विषाक्रान्तमहोरगे ॥ ३१३ ॥ वेदना दंशजा शश्वच्छान्त्या सर्वं विशोढवान्। कृपया तं च सन्मार्गे, सदाचारे तथा पुन॰ ॥ ३१४ ॥ स्थापयित्वा प्रवोधेन, श्रीमुखेन च भाषितम्। चण्डकौशिक! वुध्यस्व; शान्तियुक्तो निशामय ॥ ३१५ ॥ शब्दा एवं प्रकथिता, नरकाद्येन रक्षित॰। पतनतोऽवनं जातो, जगद्गुरुप्रसादतः ॥ ३१६ ॥ शान्त्यैवं सुवोधितोऽपि, सुप्तावस्था गतोऽप्यसौ। क्षिप्त जागरितो वुद्धो, विवेकसमशक्तितः ॥ ३१७ ॥ साधयति स्म कार्यं च, किं मया श्रूयतेऽधुना ॥ एवं विचारितस्तेन, कि शब्दोऽयं कृपामय॰ ॥ ३१८ ॥ पूर्णा दया च तस्याऽस्ति, न वा चेति विचार्य्यते। एतद्वाक्यकदम्वाना, न जाने स्वाशयं पृथक्। एतद्रुधिरपानेन, सितां च शर्करामपि।, तिरस्करोति स्वादेन, नो लब्धा चेदृशी मया ॥, ज्ञाते मयाद्य संचार॰, शान्तेरस्य च नाडिषु ॥ ३१९ ॥ आशा नामापि नास्त्यत्र, मृत्युभयस्य का कथा। परमस्ति क्षमायास्तु, पराकाष्ठेति धारय ॥ ३२० ॥ अपकारकारिण्यपि, क्षमा स्वाभाविकी कृता। आवश्यकाधिकानन्ता, शान्त्याख्यकवचोपरि ॥ ३२१ ॥ सन्मार्गे मां च ह्यानेतुं, कियच्छ्लाघ्यो महानपि। समालोचनपूर्वं हि, तस्मै स्वदर्शनं ववौ ॥ ३२२ ॥ जातिस्मृतिकं सञ्जातं, ज्ञानं गतजन्मसार-

कम् । क्रोधोऽयं चातिपापात्मा, सच्चरित्राच्च मां पुनः ॥ ३२३ ॥ पातितवानत्र योनौ, निकृष्टायामिति स्थितिः । जन्मत्रयेणात्र बद्धो, विभो ! वन्दिगृहाच्च माम् ॥ ३२४ ॥ भीषणाद्यंत्रणाच्छीघ्रं, मोचय मामिति प्रार्थना । प्राप्य चैवं विसवादं, विवेकपद्धतिं गतः ॥ ३२५ ॥ सम-संवेद-निर्वेदं, वलादध्यात्मकं रसम् । पिवन्नास्ते सुखेनैव, आयुरन्तिमकान्तकम् ॥ ३२६ ॥ श्वासोच्छ्वासकपर्यन्त, परमुत्कृष्टसमाधिना । सल्लेखनायाः प्रारम्भं, कृतवान् शान्तितत्परः ॥ ३२७ ॥ अभ्यस्तपारीणमहानागः पञ्चमके दिने । मृत्वाऽष्टमसहस्रारस्वर्गातिथिरजायत ॥ ३२८ ॥ धन्योऽस्ति भगवॅस्त्वं हि, पशूनपि मनुष्यवत् । श्राद्धधर्माधिकारं च, दत्वा तेभ्योऽपि तान्पुन. ॥ ३२९ ॥ भव्यात्मकॉस्तथा चक्रे, भावुकानथ भावत । घटनयाऽनया स्पष्टं, सिद्धं जातं पुरातनम् ॥ ३३० ॥ यथा मम प्रिया. प्राणास्तथाऽन्येषा हि देहिनाम् । इत्युक्तेन प्रकारेणाऽहिंसाणुव्रतधारणे ॥ ३३१ ॥ "क्रोधाद्बन्धच्छविच्छेदोऽधिकभाराधिरोपणम् । प्रहारान्नादिरोधश्चा, हिंसाया. परिकीर्तिता" । जीवान्स्थापितवॉल्लोके, तेभ्यश्चात्मतपोवलात् । शिक्षामप्यात्मयोगस्य, दत्तवान्न्याययोगतः ॥ ३३२ ॥ यतस्ते भवतो मुक्ता, पशूनामिति ज्ञायताम् ॥ **अथास्पृश्यानामुद्धारम्**–पतितोऽस्पृश्यकोद्धार, इति सिद्धान्तभावनाम् । संस्थाप्य सर्व्वजातीना, मनुष्येषु स्वयं प्रभु ॥ ३३३ ॥ तुल्यधर्माधिकारश्च, सुप्रदत्तो विधानत । "शूद्रो भवति धर्मात्मा, शश्वच्छान्ति नियच्छति" इति कृत्वाऽनुवादं च, उच्चावचविभागशः ॥ ३३४ ॥ स्पृश्याऽस्पृश्यविचारस्य, ससारात्स्थानमुद्गतम् । स च निर्मलसङ्घे स्वे, 'हरिकेशवलो' यथा ॥ ३३५ ॥ जात्या चाण्डालयोनिस्थो, मुनिसङ्घे स्थानमाप्तवान् । ऐतिहासिकदृष्ट्या तु, शासनेऽद्यापि तस्य हि ॥ ३३६ ॥ उत्तराध्ययनसूत्रेषु, सुवाक्यगौरवेण च । दृश्यते श्रूयते चापि, तत्र हेतुरयं पुनः ॥ ३३७ ॥ यथा 'तेन्दुक' देवोऽपि, तदपारां भक्तिमकृत । तस्येदमेव मन्तव्य, गुणस्थानप्रतिक्षणम् ॥ ३३८ ॥ यश्च कश्च समारूढो, न शेषं तस्य पातकम् । यद्गुणस्थानसवृद्धिरुत्तरोत्तरभावतः ॥ ३३९ ॥ स हि तावच्च निर्व्वाणापुनरावृत्तिसन्निधिम् । गतोऽतो धार्मिके तद्व्यावहारिकगे पुनः ॥ ३४० ॥ नो विचारोऽस्ति जात्यादेः, कर्हिचित्तन्निधनाऽनया । शासनस्य ध्वजावद्यः, सौकरः पशुघातकः ॥ ३४१ ॥ जातीयस्याप्यभेदेन, विश्रामो मिलितस्ततः । भावोऽयं तस्य विज्ञेय., स्पृश्यास्पृश्यस्य बन्धनम् ॥ ३४२ ॥ शिथिलत्वं प्रदायैव,

समूलं तद्विनाशितम् । प्राचीनव्यवहारस्य, सन्मतेन स्थिरं पुरा ॥ ३४३ ॥ विश्वाखिलावतारैस्तैरेवं निर्वहणं कृतम् । यथा शासनपतेर्वीरभगवतः शासनादनु ॥ ३४४ ॥ अयं सारतरश्चेत्थं, विचारस्य हृदा पुनः । **अथ शत्रूणामुपस्यपि-परोपकारिता**-शत्रुं प्रत्युपकारस्य, करणे रक्तान्स्वयं प्रभु । सङ्गमः शूलपाणिश्च, व्यन्तरीकटपूतना । दानवै पशुभिश्चैवोपसर्गं च महत्कृतम् ॥ ३४५ ॥ इति शत्रुगणैर्दत्तां, यन्त्रणा दारुणा तथा । सहित्वा साम्यभावेन, कृतं परिषहे जयम् ॥ ३४६ ॥ षण्मासान्तं च सततं, ददन्कष्टं महाऽसुर. । तदाऽवस्थगितो भूत्वा, हारितः स गतस्तथा ॥ ३४७ ॥ तदा तन्नयनाम्भोजादश्रुविन्दुद्वयं त्रिकम् । पतितं च यथा न्याये, इत्यवेहि च मानसे ॥ ३४८ ॥ "कृतापराधेपि जने" इत्याद्युक्तं पुरैव च । अभिप्रायोस्ति तस्यायमपराधगुरुस्तथा ॥ ३४९ ॥ पात्रोऽयं सञ्चितस्यास्य, कुत्सितस्य च कर्मण· । भावि तत्परिणामं हि, कथं सक्ष्यति कुत्र वा ॥ ३५० ॥ दुस्सहं यद्भवेच्चैतदेतदर्थं निशामय । अहो विज्ञायते चाद्य, शत्रूपरिशिवस्पृहाम् ॥ ३५१ ॥ कृतमाध्यस्थभावेनौदार्यगाम्भीर्य्यशौर्य्यकम् । इति गुणसमूहाना, वैलक्षण्यं क्षमा वरा ॥ ३५२ ॥ महिमा चेति नान्यस्मिन्वीराद्भिन्ने प्रदृश्यते । अनार्यदेशेऽपि तथा, विहारो भ्रमणं तथा ॥ ३५३ ॥ निरन्तरं नावरुद्धं, धर्मात्मसदृशं मुहु. । दर्शनमनार्य्यसघेभ्यो, धर्म्मकोटिनयाय च ॥ ३५४ ॥ म्लेच्छदेशेऽपि तस्यासीदनिवार्य्यभ्रमण मुहु· । तत्राऽपि च भवन्तं हि, कश्चिज्जानाति दूरग. ॥ ३५५ ॥ देशान्तरस्थ कश्चिच्च, भेदक तस्करं तथा । ज्ञात्वा घ्नन्ति च वध्नन्ति, कूपाधो लम्बयन्ति च ॥ ३५६ ॥ ते केचित्तच्छरीरे च, मृगयारसिका मुहु· । 'सारमेयानवोधाश्च, लगयन्ति च ते पुनः ॥ ३५७ ॥ स्वतीक्ष्णनखाघातैर्दन्तैश्च तच्छरीरके । क्षतं कुर्व्वंश्च जातास्ते, सशङ्का स्थगिता रह. ॥ ३५८ ॥ परं स्वयं स गिरिवदचलोऽभूदवनीतले । तथाऽधमा नराश्चेदं, दृष्ट्वा धैर्य्यं सहिष्णुताम् ॥ ३५९ ॥ प्रभावाद्भाविता भूत्वाऽऽश्चर्ययुक्ताश्च तेऽभवन् । ततः पराजिता जाता, पतितास्तत्पदाम्बुजे ॥ ३६० ॥ ततश्च श्रद्धया जैने, भूत्वा श्रद्धालवो मते । महाव्रताऽणुव्रतयोर्लीना· ससाधने मुदा ॥ ३६१ ॥ अनन्ता यातनां भुक्त्वा, मिथ्यावादिष्वनार्यकेष्वनिवार्यजनेष्वत्र, जैनधर्मस्य चोत्तमा ॥ संस्कारः स्थापितस्तेन, सत्यं सत्याग्रहात्मनाम् । कठोरहृदयानां च, लब्धवान् विजयं तथा ॥ ३६२ ॥ चर्य्ययाऽनया नश्च, शिक्षा सञ्जायते परा । भगवतो वीर-

देवस्य, सुपुत्रो निर्भयो भवेत् ॥ ३६३ ॥ अनार्य्यमतिना शश्वल्लोकानां वीरस्वामिनः । धर्मेऽध्ययनादिसङ्घेऽपि, गत्वा च प्रसरेदिति ॥ ३६४ ॥ तत्रावोधनरास्तद्वद्धर्म्मसत्कर्म्मवञ्चिता । प्राणिनो ये च तत्रापि, धर्मोऽनैकान्तिकस्य हि ॥ ३६५ ॥ संस्थापितो मूलतरस्तांश्च श्रीवीरस्वामिनः । सुधर्मस्याप्यनुगामिनः, कृतवान्स दयापर. ॥ ३६६ ॥ हठादिदमहं वक्ष्ये, मदीया मुनिभ्रातर. । न दत्तं ध्यानमत्रापि, कदापि न हि सम्मतम् ॥ ३६७ ॥ भूत्वा प्रत्युतदेशस्य, ग्रामस्य नगरस्य च । पिण्डोलको मोहवशे, ममताया प्रमादके ॥ ३६८ ॥ कृत्वा कलङ्कितं स्वं च, नोचितं म्लानता गतम् । तत्रैतत्कारणं ज्ञेयं, प्रार्थनाथ मुनेरिदम् ॥ ३६९ ॥ वाराणसीति पार्श्वस्य, क्षेत्रं भगवत. परम् । वीरस्य कुण्डिनपुरी विख्यातं मगधे पुन. ॥ ३७० ॥ विहारशरीफ़नाम्नश्च, मण्डले वर्तते च या । पुष्कळत्वेन नायातं, मुनिश्रमणमित्यपि ॥ ३७१ ॥ धर्मप्रचारः श्रवणे, नायातश्च यदानये । भगवतो वीरदेवस्य, चैकविंशसहस्रकम् ॥३७२॥ शासनस्य प्रचार· स्यात्तदा किं कारणं वद । तच्छासनसमृद्ध्यर्थं, नाम्नि तस्य च पूज्यवान् । प्रसक्ता ये जनाश्चासँस्तज्जन्मभुवि मानवा. ॥ ३७३ ॥ तेषु धर्मप्रचारोऽपि, न भवेदिति चिन्तने । शोचनीया सुवार्तेयं, सङ्घाग्रगण्यभ्रातर. । एतदुन्नतिकालेऽपि, भवन्तश्चेन्मतं परम् । जैनं तस्य नोदनार्थं, यद्यस्ति परिचयो महान् ॥ ३७४ ॥ ज्ञातव्यं भवतां नाम, सनश्यति गजेन्द्रवत् । अतो हि विदुषां तद्वत्क्रियाऽऽपन्नसुनीनपि ॥ ३७५ ॥ बुधरत्नप्रसिद्धानां, वक्तॄणां सर्वसम्मते । व्याख्यानवाचस्पतीना', सन्यासधारिणा तथा ॥ ३७६ ॥ चिन्तयामि सदा सम्यक्स्वप्रचारस्य क्षेत्रकम् । भगवता वीरदेवेन, समं कुरु विशालकम् ॥ ३७७ ॥ जैनधर्म्मं तथा शश्वद्विश्वव्याप्यं तथा कुरु । भवन्तो तेऽपि चास्यैव, रोगस्य परिमार्जका. ॥ ३७८ ॥ सन्त्यौपधिकराश्चात्र, न वा चेति विचार्य्यताम् । अथ भक्तःगृहस्थान्प्रति–स्वभक्तान्गृहस्थान्प्रति जीर्णक-सौकरिकादिकम् ॥ ३७९ ॥ पूर्णीयेति स्वधर्म्मे च, दृढश्चेति वितृष्णक· । सरलैव तथा चासीत्तत्प्रशंसा च वर्णिता ॥ ३८० ॥जीर्णस्य भक्तिभावना, पूर्णीयस्य सामायिकम् । सुविक्रेतुः पूनिकेति, सदास्ति जीविका पुनः ॥ ३८१ ॥ सामायिकं पवित्रं च, सौरिकस्याऽप्यणुव्रतम् । जैनं ससारकल्पान्तं, न हि तद्विस्मरिष्यति ॥ ३८२ ॥ इतोऽतिरिक्ते तस्यास्ति, शुभागमनसूचना ।

यदा भव्यानुभावेभ्यो, भक्तेभ्यश्चापि जायते ॥ ३८३ ॥ नगराच्च बहिर्देवो, निर्जने कानने स्वयम् । वीरश्च भगवान्स्वामी, समायातोऽतिपुण्यत ॥ ३८४ ॥ शक्रादिदेवै सर्वैश्च, समवसरणनिर्मितम् । महान् कलरवो जातो, नगरेऽपरिमिता जना. ॥ ३८५ ॥ धर्मानुरक्ताः श्रोतारो, जिज्ञासव इतीतरे । तेभ्योऽतिरिक्तपश्वादिश्वापदा· पक्षिणस्तथा ॥ ३८६ ॥ आयान्ति समितौ ते तु, रचिते समवसरणके । महत्सम्मेलनं जातं, तदा ते जातिभावनाम् । स्वाभाविकं पाशविकं, त्यक्त्वा हि वैरभावनाम् । शान्तिच्छटा नीतवन्तो, जातास्ते धर्म्मतत्पराः ॥ ३८७ ॥ उपदेशानन्तरं भूपा , सार्वभौमास्तथाऽपरे । राज्यसत्ता परित्यज्य, गृहीतमुनिसुव्रता· ॥ ३८८ ॥ गृहिणोऽपि गृहे स्थित्वा, पञ्चाणुव्रततत्पराः । तृष्णाभार समुत्तार्य, सम्यक्त्वभावमागता· । जीवनं सफलं जाता, कुर्वन्तस्ते पदं परम् । औदासिन्य रूक्षभावं, भोग्यं कर्मोपभुज्य च ॥ ३८९ ॥ अन्ते निवृत्तिमार्गं च, लब्ध्वाऽक्षयसुखं पुन· । अनेकानि प्रमाणानि, लभ्यतेऽनेकशस्तथा ॥ ३९० ॥ **अथ शास्त्रार्थप्रकरणम्**–अथ शास्त्रार्थवृत्तीना, वादिना प्रतिवादिनाम् । ऋजुवालुकानद्याश्च, तटे श्यामाकक्षेत्रगे ॥ चतुष्टयानन्तमापन्ना, सद्धर्म्मप्रतिपत्तये ॥ ३९१ ॥ गोरखमण्डले ग्रामे, 'पडरोणेति' विश्रुते । पावापुर्यां चोपवने, आजवे स जगत्प्रभु ॥ स्याद्वादमहावाचा, महानादेन शब्दिता ॥ ३९२ ॥ दिशा· कुर्वंस्तदा काले, कस्यचिद्ब्राह्मणस्य हि । महाध्वरोत्सवो जातस्तत्रैकादश पण्डिता· ॥ ३९३ ॥ आहूतास्तेनेन्द्रभूतिर्महामान्यश्च वेदग· । आसीत्तस्याभवंश्छात्राश्चत्वारिंशच्छतसहस्रगा· ॥ ३९४ ॥ वेदाध्ययनसम्पन्ना, विद्यार्थिन इति स्फुटा । अगणितानां च देवानामायव्ययाद्धि गौत्तम ॥ ३९५ ॥ ज्ञानं जातं तथैवात्राऽनेकान्तवादवित्तथा । समायातो जिनेन्द्रश्च, सर्व्वज्ञो विश्वरक्षकः ॥ ३९६ ॥ शास्त्रार्थं तेन सार्कं वै, शर्म्मा समवसरणकम् । गच्छति स तदाऽऽयान्तं, दृष्ट्वा तं जगत प्रभु· ॥ ३९७ ॥ आगन्तुकस्य सद्विष्टाचारं शिक्षणाय च । स्वभाविगणधरस्य, **स्वागतं** चेन्द्रभूतये ॥ ३९८ ॥ तत्कमानसिकं भावं, तस्य संशयशंसिनम् । तन्निवृत्ति कृता तेन, तथा संवेदिनी मुहु ॥ ३९९ ॥ शिक्षा दत्ता प्रभावोत्था, चार्हती चोपकारिणी । तदिन्द्रभूतये तद्वद्वेदवेदमिताय च ॥ ४०० ॥ महानुभावश्रेष्ठेभ्य सुप्रदत्ता गरीयसी । हेयं ज्ञेयमुपादेयमिति च त्रिपदी मता ॥ ४०१ ॥ ज्ञानोत्पादयित्री सा, सोत्पादव्ययध्रौव्यकम् । षड्द्रव्यात्मकं चैव, द्वादशांगिगिरा सह ॥ ४०२ ॥ चतुर्दशात्मकं पूर्वं, यदुक्तं

तद्विशालके । ज्ञाने परिणतं कृत्वा, स्थविरान् रुद्रसंख्यकान् ॥ ४०३ ॥ गणधर-पदे सम्यक्स्थापिता सर्वसंयतै । प्रथमं चेत्यमनिशं, स्वकीयानन्तज्ञानके ॥ ४०४ ॥ लाभमुत्पाद्य तेभ्यश्च, खखदिद्गिग् ४४०० द्विजातये । दत्वा निर्वाण-मार्गं च, तत्पथि पथिका कृता ॥ ४०५ ॥ **अथानाथवालिकोद्धरणम्**—अथा-नाथवालिकाया, उद्धरणं कृतं स्वयम् । सार्धद्वादशवर्षाणा, तथा पञ्चदशे दिने ॥ ४०६ ॥ [ छद्मावधौ दुष्करं च, तप कुर्वंश्च विश्वदृक् ] तदैकस्मिँस्तु कालेऽथ, त्रयोदशविधात्मक । कृतो भीष्माभिग्रहश्च, कृतवान् पणधारणम् ॥ पण्मासान्तं न यत्पूर्णं, न शक्यं भवितुं पुन. ॥ ४०७ ॥ परन्त्वयं त्वचलितस्तस्मात्पणमया-त्प्रभु. । प्रयागमण्डलतद्वत्कौशाम्वीं नगरीं ततः । भ्रमन्सँश्चन्दनाख्याया, वालाया कर्तुमुत्सुक । सूद्धारं धनवाहस्य, श्रेष्ठिनश्च गृहाङ्गणे ॥ ४०८ ॥ समा-गत्य स्थिरश्चाभूद्गृहस्यास्य सुकोष्ठके । द्वाराग्रे च सती वाला, चन्दनाऽतीव-भक्तित ॥ ४०९ शृङ्खलानिगडैर्वद्धा, तिष्टतीति विलोक्य च । अन्वेषते तथा मार्गं, भगवतो धर्म्मतत्परा ॥ ४१० ॥ अनाथा वन्दिनी वीरं, भगवन्त निरीक्ष्य च । सुहर्षं प्रकटं कृत्वा, कुर्वती भाववन्दनाम् ॥ ४११ ॥ प्राह जगद्गुरो ! देव ! सूर्पे लोहमये पुन. । माषान्नवाकुली चास्ति, तद्गृहीत्वा च मां पुन. ॥ ४१२ ॥ कृतकृत्या द्रुतं कुर्या, इति मे प्रार्थना शृणु । समयेऽत्र तस्याश्च, प्रफुल्लितमुखा-म्बुजम् ॥ ४१३ ॥ पर भगवतश्चास्यां, स्वल्पमस्मिन्नभिग्रहे । तथाऽप्यश्रुप्रवाहस्य, न्यूनत्वं चात्यवर्तत ॥ ४१४ ॥ स्वयं स च परावृत्य, चलवानीषद्गतिस्ततः । चन्दनाऽपि तदाऽपश्यद्भाग्यहीना गृहं मयि ॥ ४१५ ॥ स्वयं देववरो भानु', समागत्यालयं मम । स्वप्रकाशं समाहृत्य, पश्यन्त्या मे गतोऽस्तकम् ॥ ४१६ ॥ अस्यां दशायां दीनायाश्चावलायाः प्ररोदनम् । विनाऽन्यद्दर्शनं तस्यै, नास्ति कस्य प्रयोजनम् ॥ ४१७ ॥ चक्षुर्भ्यां यमुनागङ्गाप्रवाहो वहति द्विधा । महादयालुवीरस्या-भिग्रहं पूर्णता गतम् । स्वाभिग्रहस्य दृष्ट्वा तु, स्वादूर्ध्या भक्तितत्परा । सदा सक्तानुरक्तायाः [ करात् ] माषधान्यस्य वाकलाम्* । गृहीत्वा दानातिशयाद्देवैर्मुक्ताश्च वन्धनात् । केवलज्ञानभवनात्पश्चादार्यात्वमाप्स्यति ॥ ४१८ ॥ दत्वा स्वतन्त्रता तस्यै, जीवन्मुक्तत्वयोगत' । कथितश्चातियत्नेन, त्यक्त्वा तत्कायमुत्तमम् ॥ ४२० ॥ शेषमायुं प्रभुक्त्वा च, निर्वाणपदमागतम् । वीरस्येति प्रभावाद्या, कल्याणमात्मकं

---

* अग्निपक्वाक्षतधान्यस्य वाकलासंज्ञेति भाषायाम् ।

कृतम् ॥ ४२१ ॥ निजाधीनो जनो यश्च, न कुर्यात्स्वसमं नरम् । स धनी निन्दितो ज्ञेय, इति जानीहि संस्फुटम् ॥ ४२२ ॥ **अथ सदाचारिशिष्यान्**– सदाचारवत. शिष्यान्, प्रति जागयते पुन॰ । यस्तस्य चरणाम्भोजसमीपं सुसमाहितः ॥ समागत्य च दीक्षाया भागवत्याः प्रसादकम् ॥ ४२३ ॥ भगवत॰ प्राप्तवान्शश्वत्तमेवामेदभावत । कुर्यात्तमुन्नतं चैव, भाविनं सोऽपि स्वस्य च ॥ ४२४ ॥ अध्यात्ममार्गं सम्मार्ष्टुं, योग्यत्वमुपलब्धवान् । तथाऽभयकुमारस्य, धन्यस्य च महामतेः ॥ ४२५ ॥ शालिभद्रातिमुक्तस्याद्योरुदाहरणानि च । श्रेणिकेन नृपेणैव, मगधेशेन चैकदा ॥ ४२६ ॥ उत्कृष्टक्रियायाश्च, साधना धन्यस्वामिन. । दृष्ट्वा च भगवान् पृष्टो, धन्यनाम्नो मुनेरथो ॥ ४२७ ॥ सुक्रियोत्कृष्टपात्रस्तु, मुनीश. सम्प्रतीयते । परं भगवता चेदं, गदितं तन्निशामय ॥ ४२८ ॥ श्रुतचारित्रपारीणचतुर्दशसहस्रकम् । मुनीना सपरिवाराणा, मुक्तमालामणेर्निभम् ॥ ४२९ ॥ यथोचितमिदं श्रुत्वा, चोत्तरः श्रेणिकस्य हि । समस्तमुनिसङ्घे च, जाता श्रद्धा समा धिया ॥ ४३० ॥ **अथ पितुर्मित्रं प्रति**—मित्रं प्रति पितुश्चैकवारं छद्मदशास्वपि । भूमण्डले भ्रमन्नस्मिन्नेकसन्यासिनो मठे ॥ ४३१ ॥ निवसितुं निशामात्रमिच्छया समुपागतः । मठाधीशो मित्रपुत्रं, ज्ञात्वा तत्प्रेमरश्मिना ॥ ४३२ ॥ बद्धो भूत्वा बाहुपाशे, गृहीत्वा तं च सङ्गतः । तथेयं च कृता तेन, प्रार्थना भगवन् ! पुनः ॥ ४३३ ॥ भवान्मित्रं च सिद्धार्थराजस्य तनयोऽस्ति च । अतो मनस्तनुश्चेयं, स्थानं चेद तवैव हि ॥ ४३४ ॥ अतश्चागामिनि वर्षे, चातुर्मास्यव्रतं महत् । अत्रैव कृत्वा पूतं हि, कुरु स्थानं मदीयकम् ॥ ४३५ ॥ मौनावस्थास्वपि भगवान्, ददौ वै स्वीकृतिं पुनः । शेषकालं यापयित्वा, तन्मठस्य च सन्निधौ ॥ ४३६ ॥ तृणमयीं कुटीं स्थित्वा, कृत्वा ध्यानं स्थिर पुनः । कायोत्सर्गे लयो जातश्चातुर्मास्येषदेव हि ॥ ४३७ ॥ व्यतीते दिवसे जातो, दुर्भिक्षस्तु महाँस्तत॰ । तृणाभावाच्च पशव , क्षुधार्ता वेदनोदये ॥ ४३८ ॥ तदा तत्पर्णशालायास्तृणपुञ्जं मुहुर्मुहु । निष्कास्य भक्षयामासुस्ते तदा कालयोगत. ॥ ४३९ ॥ नावरुद्धा मठाधीशो, दृष्ट्वेदं वृत्तमद्भुतम् । आश्चर्ययुक्तोऽभूत्तस्मिन्नैतादृशं कदापि हि ॥ ४४० ॥ निस्पृहत्वं मया दृष्टं, न कृतं गृहरक्षणम् । पर तस्य मनोभावं, ज्ञातवान् क्रमश्च प्रभु. ॥ ४४१ ॥ ज्ञात्वाऽप्रियकरं स्थानं, विहारं झगिति कृतम् । शान्तिर्भङ्गा न मे भूयादिति तेन विचारितम् ॥ ४४२ ॥ "संकडे सकडं ठाणं", दूरतः परिवर्जयेत् । सिद्धान्तस्येति सारं वा, स्थापनं कृतवान्मुहु. ॥ ४४३ ॥ **अथ धर्माद्विचलितान् प्रति**—

यातनातो धर्म्मकाण्डाच्चलितान्किञ्चिन्निगद्यते । कस्मिँश्चित्समये राजगृहाधीशः सुश्रेणिकः ॥ ४४४ ॥ तनयस्तस्य चैकोऽस्ति, मेघकुमारनामकः । श्रुत्वोपदेशं वीरस्य, सवेगात्प्रतिजगृहे ॥ ४४५ ॥ दीक्षोत्तमा तदा तस्य, दीक्षितस्य नवस्य च । सर्वमुनीना पश्चात्तु, तदाऽऽसनमवेशयत् ॥ ४४६ ॥ परन्त्वावश्यकं कार्यं, कर्तुमायान्ति यान्ति च । मुनयोऽनुपयोगत्वान्निशाया. समयस्तथा ॥ ४४७ ॥ तेषामीर्याभङ्गवशात्पादस्पर्शो मुहुर्मुहुः । जातस्तत पराभूय, व्याकुलोऽभून्महामनाः ॥ ४४८ ॥ निद्राऽभावसमापन्नो, विचारे तत्परोऽभवत् । किं मेघायुर्मदीयं च, पादप्रहरणाद्गतम् ॥ ४४९ ॥ प्रसह्यैवं व्यतीतं स्यान्नह्येतस्मै मुनिर्व्रतः । प्रातरेव हि दत्वेदं, धर्म्मोपकरणं मुदा । गत्वा च जननीं स्वा च, मिलिष्यामि सुप्रेमतः ॥ ४५० ॥ साधुरद्यैव सम्भूय, रुलित पादलग्नत । नेत्थं विनिर्वहेच्चाद्य, प्रदृष्टं पूर्वमेव तत् ॥ ४५१ ॥ सदा चायाति भक्त्यैव, तदाऽप्यादरतोऽवदत् । अद्य भूत्वा सुसयमवान्न जानन्ति कथंचन ॥ ४५२ [ न जानन्ति कथं चाद्य, किमाश्चर्यमतः परम् ] निदानन्त्वत्र प्रातर्हि, **मुनिर्मेघकुमारकः । वीरस्य चरणाम्भोजवन्दनार्थं समागतः** ॥ ४५३ ॥ गुरोः प्रष्टुं समुत्पन्ना, लज्जा तस्य मुनेरदः । नतं शिरश्चकाराशु, कुमार. क्षत्रियस्य च ॥ ४५४ ॥ स त्वन्तेवासी भूत्वा च, तस्य च सद्बलाश्रय । ससारतारको वीरो, निशावृत्तं च ज्ञातवान् ॥ ४५५ ॥ सर्ववृत्तं निशाजन्यं, निगद्य पुनरुक्तवान् । रात्रौ वत्स ! मुनीना च, पादप्रहारतस्त्वया ॥ ४५६ ॥ लब्धा निद्रा न स्वान्तर्वै, तेनार्तध्यानमागतम् । अतो निद्रा सुविच्छिन्ना, निशाऽतीताऽतिकष्टदा ॥ ४५७ ॥ परं विवेकपन्थानं, मार्गयस्व समागत । तदा स्यात्पूर्वकं ज्ञानं, जन्म पाशविकं तव ॥ ४५८ ॥ तत्र कष्टं महत्किं वा, निशापादप्रहारकम् । एतावन्तं प्रतिश्रुत्य, मेघनाम्नो मुनेर्द्रुतम् ४५९ जातिस्मरोऽभवत्पूर्वजन्मद्वयगतस्य च । तिर्यग्भावगता वार्ता, समारूढा स्मृतेः पथम् ॥ ४६० ॥ पूर्वसवेदिनी तद्दृशा जातेत्थमद्भुता । तदा योगी पुनर्जातो, दीक्षादानविधानतः ॥ ४६१ ॥ तथैकमासपर्य्यन्तं, वृत्वा सल्लेखना गुरो. । अन्ते द्वाविंशतिस्वर्गस्याहमिन्द्रोऽभवत्ततः ॥ ४६२ ॥ कम्पमाननगं चेमं, सुस्थिरं कृतवान्पुनः । भगवान्वीरदेवश्च, ज्ञातव्यमुत्तमं तप. ॥ ४६३ ॥ प्राणभृतामसख्यानामित्थं भ्रमरजालके । मग्ना नौरुद्धृता वीरदेवेन भवचक्रतः ॥ ४६४ ॥ भवाम्भोधेस्तारकत्वात्तारकः परिगीयते । निपुणः शक्तिमत्त्वाच्च, कर्तेत्यपि च कथ्यते ॥ ४६५ ॥ **अथ स्वदृरं प्रति**–यदानन्दकामदेवादिकानां गृहमेधिनाम् । गृहिणः

श्रावका ये च, जैनधर्मानुगास्तदा ॥ ४६६ ॥ *वस्त्रात्मकविधौ स्थूलसूत्रज वसनं मुदा । तत्तत्सामयिका लोका, धारयन्ति स्म तन्मुहु ॥४६७॥ तत्क्षौमयुगलं प्राहुस्तत्कालीना नरा भुवि । निर्माय वसनागारं, स्थूलसूत्रस्य तै· पुनः ॥४६८॥ ततोऽन्यद्वर्जयित्वा च, धार्यतेस्म तदेव हि । प्रति ससारिण सर्वान्नरान्स्वस्य स्वकीयकम् ॥ ४६९ ॥ द्विसप्ततिमिताब्दान्त, चायुरुक्तं समासतः । सज्ज्ञानानन्ततेजोभिश्चतुर्थसमयस्य हि ॥ ४७० ॥ सृष्टिमुल्लासयामास, भव्याना कोटिशो विभुः । शंकाऽऽकाङ्क्षा विरहिता, विचिकित्सा विवर्जिता ॥ ४७१ ॥ अमूढदृष्ट्युपगूहश्च, स्थितिभावस्तथेतर । स्ववात्सल्यमहिम्नैतान्, कृतवान्स प्रभावितान् ॥ ४७२ ॥ स्त्रियः शूद्रास्तथा नीचास्तथोच्चाश्चेत्यभेदताम् । धर्मसाधनसमानाधिकारत्वं स्थिरीकृतम् ॥४७३॥ तन्महत्वं कियच्चेति, विचारय मुहुर्धिया । भगवन्महावीरेण, यत्किंचिद्दर्शितं खलु ॥ ४७४ ॥ आदर्शरूपं तस्यायतुलना कर्तुमक्षम । इतिहासपुराणादिजाते भुवि गवेषणे ॥ ४७५ ॥ नान्यत्र कुत्रचिल्लाभो, दृश्यते तस्य नैव हि । प्रत्येकस्य समुल्लेखो, लक्षश कोटिशस्तथा ॥ ४७६ ॥ व्याख्यानस्य निबन्धस्य, जायते रचना वहु । कोऽनन्तसुगुणान्वक्तुं, प्रभो शक्तो भवेन्नर ॥ ४७७ ॥ अतोऽस्य लेखने शश्वद्विषयो न प्रपूर्यते । एतदर्थं केवलं च, समुल्लेखनक कृतम् ॥ ४७८ ॥ कृत्वा चाशामहं कुर्व्वे, दृष्टान्तैरेभिरन्वहम् । पाठका स्फुटरूपेण, ज्ञायेरन्सर्वथा यथा ॥ ४७९ ॥ भगवाँश्च महावीरो, वर्धमानस्तथापर । शासनाधिपतिस्तद्वद्धर्म्ममूर्तिर्जिनेश्वर ॥ ४८० ॥ तीर्थङ्करो वीतराग , साक्षाद्धर्म्मप्रवर्तक । जगदुद्धारकश्चासीत्सन्मतिश्च स एव हि ॥ ४८१ ॥ सन्ति संसारगा· सर्वे, समवसरणे स्थिता । यदा मुन्योर्द्वयोस्तेजोलेश्यया च विहिंसनम् ॥ ४८२ ॥ हातुं तेजस्तदेवाशु, भगवन्तमुपरि तदा । न क्षमो निर्घृणश्चास्य, गोशालस्य विशेषत ४८३ शत्रुभावं गतस्यापि, क्षमादृष्टि· स्वभावत । कृता यैरादर्शरूपो, देवाधीशोऽप्यसख्यया ॥ ४८४ ॥ दयादेव्या· सारकोऽयं, सन्देहो नात्र कस्यचित् । **'धर्मस्य च समग्रस्य'**, लक्षणं तत्र वर्तते ॥४८५॥ न वा पूर्णतया चेदं, विचारेण विभाव्यताम् । समग्रस्य च धर्मस्य, लक्षणं प्रतिपादितम् ॥४८६॥ **अथ यशसश्च समग्रस्य**-भगवन्महावीरस्य, दिगन्तव्यापिनी शिवा । कीर्तिर्या वितता लोके, तद्विषये निगद्यते ॥४८७॥ पारमार्थिकदृशा वक्तुं, शक्यते चेदृशं पुन· । न केऽपि सन्ति ससारे, प्राणिना भगवद्गुणैः ॥ ४८८ ॥ मुग्धभावं न जायन्ते, न

* यदाधुनिकभाषाया 'खद्दर'श्चेति गीयते ।

गायन्ति ? च तद्गुणान् । बुद्धकल्पा जनाश्चापि, वहवः सम्मुखेन वै ॥ ४८९ ॥ ज्ञातपुत्रमहावीरस्तदनन्तचरित्रकम् । मुक्तकण्ठेन तस्यापि, सर्व्वज्ञत्वं प्रशंसिरे ॥ ४९० ॥ आध्यात्मिकस्य तत्त्वस्य, पदार्थे तत्त्वचिन्तका । ये ये प्रसिद्धा लोकेऽस्मिन्महानुभावभाविताः ॥ ४९१ ॥ यान् यान्साहित्यविपये, ग्रन्थान्प्रति सुधीमतः । भगवन्महावीरस्यादर्शजीवनरूपकम् ॥ ४९२ ॥ चरितोपदेशकाना यः, प्रभावः पतितो भुवि । सूचीपत्रविनिर्मातुं, सर्व्वथा तदसम्भवः ॥ ४९३ ॥ एतावद्धेव सङ्क्षेपात्कथितं च महोदयैः । एतादृशो जनः श्रेष्ठस्तथा साहित्यतत्वविद् ॥४९४॥ संसारे विरलश्चास्ति, ज्ञात्वाऽज्ञात्वा विशेषतः । भगवन्महावीरस्य, जिनस्य प्रतिवासरम् ॥ ४९५ ॥ अनेकान्तवादतत्त्वस्य, सेतिहासोपदेशकैः । लाभो नोत्थापितो लोकैर्ज्ञायतां परमार्थतः ॥ ४९६ ॥ यत्र श्रीवर्धमानस्य, जिनस्य न हि दृश्यते । चिन्हं किञ्चिन्मत्स्वल्पं, सर्वत्रैवं विचारय ॥ ४९७ ॥ साधारणात्मव्यक्तीनां, महत्व न वचस्स्वपि । परं भारतवर्षस्य, यावन्तश्चेतिहासके ॥ ४९८ ॥ महान्तो मनुजा जातास्तेऽवश्यं वीरस्वामिनम् । येन केन प्रकारेण, स्मृतवन्तो मुहुर्मुहुः ॥ ४९९ ॥ इति वार्तातिरिक्तं च, सिद्धं जातमिति स्फुटम् । विद्वांसः पूर्वकालीना, वर्धमानजिनस्य च ॥५००॥ चरिते स्याद्वादकस्य, सिद्धान्तस्य प्रकाशनम् । पतितं परमाधिक्यं, नानाख्यानान्वितं पुन. ॥ ५०१ ॥ पठनाद्यस्य ज्ञातारो, ज्ञास्यन्तीति विशेषत । पाश्चात्यैर्निखिलैर्लोकैर्नामैशुक्तस्तस्य गृह्यते ॥ ५०२ ॥ तच्चापि महावीरस्य, चरित्रे जीवनस्य हि । तथा सदुपदेशस्य, शिशुरेको लघुर्ध्रुवम् ॥ ५०३ ॥ तदा किमियमाशा वै, न कर्तुं शक्यते मया । पाश्चात्यभाविनि भवे, वीरस्य विश्वव्यापिन ॥ ५०४ ॥ प्रभावोऽद्यतनात्तुल्या, ज्ञानरूपाश्च या मुदा । प्रत्युतानन्तप्रख्यातप्रकारत्वेन सस्फुटम् ॥ ५०५ ॥ सुपाश्चात्यैर्जनैर्विश्वे, वर्णितं मुक्तकण्ठत । भगवन्तं स्वेष्टतमं, मन्यन्ते स्वानुभावत ॥ ५०६ ॥ सुतात्पर्य्यमिदं तस्य, **समग्रयशसः परम्** । लक्षणं च महावीरे, परिपूर्णसमन्वयः ॥ ५०७ ॥ **श्रियः समग्रायाः**—श्रीमाँश्च भगवान्वीरो, जन्मजन्मान्तरानुग. । स्वीयः गणधरश्चेन्द्रभूतिस्तस्मै द्विजाय च ॥ ५०८ ॥ त्रिपद्यात्मकविज्ञानं, दत्वेत्थं द्वादशाङ्गकम् । चतुर्दशपूर्वज्ञानं, तस्मै श्रीगौत्तमाय च ॥५०९॥ पूर्वधरश्रुतेऽपारपारीणं सुविधाय तम् । गणधरं मुनिपुङ्गवं, कृतवान्सदयालयः ॥ ५१० ॥ यस्यानन्तज्ञानलक्ष्म्या, नेतुं लाभं च रोहकः । गाङ्गेयादिस्तदाख्यानं, भगवत्यां पञ्चमाङ्गके ॥ ५११ ॥ कृतवाँस्तद्विशेषेण, ज्ञातव्यं सूत्रपाठके । किं

तन्मुक्तावसद्धयानां, प्राणिनां प्रेषके पतौ ॥ ५१२ ॥ मुक्तौ श्रियः समग्राया, लक्षणेति समन्वये। निरूपणे तथाऽवश्यं, यत्नः कार्यो विशेषतः ॥ ५१३ ॥ यश्च सद्धपतेश्चापि, वसुसम्पत्तितो *रद्ध । सम्पत्तिमन्तं कृतवानिति जानीत ज्ञानतः ॥ ५१४ ॥ **वैराग्यस्य समग्रस्य**—चतुष्टयाऽनन्तसम्पत्प्रातिहार्य्योयनेकधा। धर्मसम्पत्सद्धसम्पत्कीर्तिसम्पत्तथाऽपरा ॥ ५१५ ॥ अष्टैव प्रातिहार्य्याख्यासुरवैभवसम्पद । एतावन्त्यो यत्र सन्ति, भगवत्यखिलेश्वरे ॥ ५१६ ॥ तद्वार्हस्थ्योऽपि वैराग्यसम्पत्तिरुपबृंहिता । तथाऽनासक्तिसम्पत्तिर्वैरीवर्ति स तत्र वै ॥ ५१७ ॥ [तदद्भुतं चमत्कारं, को वा वर्णयितुं क्षम. ॥] पुष्कळं भोगमासाद्य, तत्रोत्पद्य स्वयं प्रभु । पङ्कजं पङ्कजमिव, पृथगेव विभाव्यते ॥५१८॥ सेयं तत्त्यागवैराग्यसम्पत्ति सिद्धिदायिनी। विद्योतते भगवति, वैराग्यस्येति लक्षणम् ॥ ५१९ ॥ **मोक्षस्याथ समग्रस्यापुनरावृत्तिरूपक** । ससन्वयो यथार्हं वै, ज्ञायते तन्निशम्यताम् ॥५२०॥ आचाराङ्गं तथा व्याख्याप्रज्ञप्त्यादिरूपका। **आधारभूतेतिहासाच्च, सिद्धं तन्निर्विवादतः** ॥५२१॥ महावीरभगवान् दीक्षादशातः पूर्वतोऽपि वा। पुद्गलस्यप्रबन्धेषु, पदार्थे बन्धने पुन ॥५२२॥ भावसयतयुक्तोऽभून्नापेक्षा विद्यते विभोः। सर्वथा ते च मुक्त्यर्थं, सचेष्टा सन्ति भावत ॥ ५२३ ॥ सम्बन्धे चात्र चैतात्वत्कथनं जातमलं तथा। अनन्तचतुष्टयमाप्य, जातः सिद्ध सक्षायिकः ॥ ५२४ ॥ जीवन्मुक्तोऽभवत्तत्र, विज्ञेयं तच्चरित्रकम्। प्राणिनस्तस्य शरणं, समायाताश्च येऽनिशम् ॥ ५२५ ॥ स्वयं तेभ्यः सुमोक्षस्य, सम्प्रदायरहस्यकम्। स्वसमास्ते कृतास्तेन, तत्सहाशु निसेवनम् ॥ ५२६ ॥ मुक्तिमूलं परं स्यात्तं, तदस्तीति विभावय। तत्र मोक्षसमग्रस्य, समन्वयप्रसक्तितः ॥ कथं प्रश्नावकाशः स्यादित्थं च बुध्यतां धिया ॥ ५२७ ॥ अतो भगवते **मोक्षसमग्रस्य** समन्वय. । षष्टमलक्षणस्याऽयं, समन्वय इति स्फुटम् ॥ ५२८ ॥ **अथोपसंहारः**—एवमुक्तषडाख्यानाऽऽलक्षणाना समन्वयात्। सिद्धो जातस्तु जगति, "वीरस्तु भगवान् स्वयम्" ॥५२९॥ अस्ति सर्वज्ञ इत्थं य., समदर्शी च वीर्यवान्। हितैषी सर्वजीवाना, तथासोऽनन्तशक्तिमान् ॥ ५३० ॥ शास्ता सार्व्वं स एव स्याज्जगद्गुरुरिहार्तिह. । अतस्तल्लक्षणं प्रोक्तं, निम्नगं तन्निबोधतः ॥ ५३१ ॥ "गुकारस्त्वन्धकारस्तु, रुकारस्तन्निरोधकः। अन्धकारविनाशेन, गुरुरित्यभिधीयते" ॥ अज्ञानं च गुशब्दस्य,

---

* आचार्याणामष्ट सम्पदिति भावः ॥

रुशब्दस्तन्निवर्तकः । मिलित्वा च द्वयोरर्थो, गुरुरित्युच्यते बुधैः ॥ ५३२ ॥ अज्ञाननाशनाज्जातो, जगद्गुरुरथोच्यते । सर्व्वज्ञश्चापि सोऽत्रैव, "वीरस्तु भगवान्स्वयम्" ॥ ५३३ ॥ यतोऽन्यदज्ञाननाशं, कृत्वा च स स्वयं प्रभु । "जिन्नाण" मित्याद्यखिलो, न्यायस्तत्र सुघट्यते ॥ ५३४ ॥ रत्नत्रयस्वरूपस्य, "वीरस्तु भगवान्स्वयम् ॥" कारयित्वा ज्ञानमदो, देवगुर्वो रहस्यकम् ॥ ४३५ ॥ तथा धर्म्मरहस्यं च, सम्प्रकाश्य स्वयं प्रभु । सर्व्वससारमुक्तेश्च, मार्गं सवरनिर्जरे ५३६ ज्ञापितोऽप्यस्ति यस्येत्थं, करणादनुभवस्य हि । मननध्यानमोक्षस्य, साधनाऽऽसक्तचेतस ॥ ५३७ ॥ जना हि निखिलाः सन्त, शीघ्रं प्रापुर्महात्मनः । अतो हि भगवान्वीरो, भवस्यास्याखिलस्य च ॥ ५३८ ॥ कालेऽवसीर्पिणीसंज्ञे, चतुर्विंशतिसङ्ख्यक । तीर्थङ्करोऽन्तिमोऽप्यस्ति, गुरुर्वन्द्योऽखिलैर्नरैः ॥ ५३९ ॥ तद्दर्शितोऽस्ति दशधा, व्याप्तो धर्म्मो दिगन्तरे । जैनधर्मः स एवात्र, सर्व्वदा नाऽपरः क्वचित् ॥ ५४० ॥ इत्थं भगवतो महावीरदेवोपदेशत । शुद्धभावेन परमस्तत्वनिक्षेपहेतुकः ॥ ५४१ ॥ पदार्थं स्वात्मनीत्येव, कृत्वा सन्धानमेव च । तदागमस्य सिद्धान्तमार्गस्य मननं तथा ॥ ५४२ ॥ कुर्व्वन्ननुभवं तद्वच्छुक्लभावाधिवेगनम् । गद्गदान्वितकण्ठेन, गायेंस्तद्गुणविग्रहम् ॥ ५४३ ॥ समयं मा प्रमादीश्चेति चर्यासमाहित । अमूल्यसमयं स्वस्य, यापयन्तु सुध्यानतः ॥ ५४४ ॥ धन्यः स एव लोकेऽस्मिन्कीर्तिमाँश्च सुधीर्गुणी । कुत स एष संसारे, स्याद्वादालङ्कृतो नर ॥ ५४५ ॥ तद्धस्तगतं सर्वमैहिक शान्तिमत्पुनः । जीवनोत्थं मोक्षरूपमपुनरावृत्तिसंज्ञकम् ॥ ५४६ ॥ समुत्थानमयं लोके, चाक्षयं बन्धवर्जितम् । कुञ्चिका सैव विज्ञेया, अव्याबाधस्य धामनि ॥ ५४७ ॥ पञ्चाङ्कनवैर्भूवर्षे, विक्रमार्कस्य संवति । मधुमासेऽथ धवले, पक्षे दशमीसत्तिथौ ॥ ५४८ ॥ निबन्धोऽयं समाप्तश्च, श्रीपुष्प-भिक्षुणा कृतः । श्रीमत्फकीरचन्द्रस्य, मुनेः शिष्येण धीमता ॥ ज्ञातपुत्रमहावीरजैनसङ्घानुयायिना ॥ ५४९ ॥

**मङ्गलं भगवान्वीरो, मङ्गलं गौत्तमः प्रभुः ।**
**मङ्गलं स्थूलभद्राद्या, जैनधर्मस्तु मङ्गलम् ॥**

शिवमस्तु सर्व्वजगतः, परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं, सर्व्वत्र सुखिनो भवन्तु लोकाः ॥ १ ॥

# वीरस्तुति-परिशिष्ट नं० ७

## ॥ अथ वीरयोगतरङ्गः ॥

### ॥ मङ्गलाचरणम् ॥

**योगाज्जानाति स्वात्मानं, योगः शान्ति प्रयच्छति। योगान्मोक्षोऽभिसंयाति, योगाद्देशसमुन्नतिः ॥ योगान्निर्वैरतामेति, समाधिरचला भवेत्। योगेन समताऽऽयाति, तस्माद्योगात्मने नमः ॥ १ ॥ योगिनां सर्वतो मैत्री, योगी सम्मुदितां गतः। करुणान्वितो भवेद्योगी, योगे माध्यास्थ्यभावना ॥ २ ॥** योगशास्त्रे तथाऽन्यत्र, योगस्य प्रतिग्राहिता। तेन योगतरङ्गस्य व्याख्या पद्येन गीयते ॥ ३ ॥ योगेन भित्वा षट् चक्रं, वायुं सस्थाप्य मूर्द्धनि। ब्रह्मरध्रस्थकमले, सहस्रदलसंवृते ॥ ४ ॥ स्वान्तमाकृष्य विषयाज्जलबुद्बुदसन्निभात्। सस्थाप्य ज्ञानतो बध्वा, ध्रुवं ब्रह्मणि निष्कले ॥ ५ ॥ द्विविधं कर्म संन्यस्य, योगी यात्यपुनर्भवम्। तस्माच्च योगमाहात्म्यं, वर्तते सर्वतोऽधिकम् ॥ ६ ॥ अतश्च योगशास्त्रस्य, महत्वं वर्णितं बुधै। तद्व्याख्यानं मयेदानी, गीयतेऽभीष्टसिद्धये ॥ ७ ॥ योगो निर्मलचेतसा वितनुतेऽप्यष्टाङ्गसिद्धिं पुनर्योगाङ्गेन मनो नियम्य यतयो याताः पदं निर्भयम्। योगोऽज्ञानमयान्धकारतरणिर्योगान्न चान्योऽपरस्तस्माद्योगमुपाश्रयन्त्वनुदिनं यो योगिनामिष्टद ॥ ८ ॥ संसारेऽत्र सुखं ग्राह्य, हेयं दु खमिति स्थितिः। इत्यनुसृत्य वाञ्छन्ति, सुखं प्रत्येकप्राणिन. ॥ ९ ॥ दु खं तत्कारणं चेति, ते नेच्छन्ति कदाचन। तस्मात्सुखाप्तये योग, सेवनीय. सुखार्थिभि ॥ १० ॥ न ह्येतावद्धि मात्रेण, प्रत्युतैवं सुखर्द्धये। नित्यं कुर्वन्त्युपायं ते, शतशो यत्नतो मुदा ॥ ११ ॥ तैरुपायैर्यदात्यन्तं, जायते सफला क्रिया। तदानन्तसुखावाप्तिं, लब्ध्वा यान्ति कृतार्थताम् ॥ १२ ॥ इत्थं मत्वा सुखाप्त्यर्थं, सर्वसाधकसाधने। मुख्यो धर्मो न चान्योस्ति, तस्माद्धर्ममुपाश्रयेत् ॥ १३ ॥ स च योगात्परो नान्यो, ज्ञातव्यो योगसाधके। एवं धर्मो धारणीय, सत्सुखाप्तिकरो यत ॥ १४ ॥ योगतो लभ्यते स्वर्गोऽपवर्गश्च महात्मभि। कायस्य चैधते कान्तिरुज्वलात्मसुखोदया ॥ १५ ॥ वर्तमाने युगे चास्मिन्ननेकमतवर्त्मनि। पार्टिवाजी सम्प्रदायसङ्घाडागच्छटोलका. ॥ १६ ॥ वर्तन्ते ये च धर्मस्य, नामोपरिचलन्ति ते। तेऽमरशहीदका भूत्वा विहरन्ति यथेच्छया ॥ १७ ॥ योगसाधनतस्ते च, विमुखा निजशिष्यके। सुखसाधनदानार्थमसमर्था भवन्ति ते ॥ १८ ॥ स्वसम्प्रदायसम्पृक्ता

निर्वाहार्थं वहुक्रिया । परम्परया विज्ञानं, वोधयन्ति सदार्थिनः ॥ १९ ॥ तथा परम्पराचक्रानुसारेणैव शिष्यका । कुर्वन्ति ता. क्रियाः शश्वन्नर्तनैर्नर्तनैर्मुदा ॥२०॥ अस्या दशायां केचित्तु, कदाचित्सुखवाञ्छया । प्राणिनश्चेदृशा सन्ति, येषां चित्तं न सुस्थिरम् ॥ २१ ॥ सन्तोष सुखसिद्ध्यर्थमसन्तोषाद्दृशेदृशी । भद्रपरिणामवन्तो, जीवा सुखविवृद्धये ॥ २२ ॥ रक्तं खेदं च कुर्वन्ति, सदैकीभावमास्थिता । रज प्रक्षेपणेऽप्येवं, न पृथग्भावमश्नुते ॥ २३ ॥ सुखं तत्साधनं तद्वत्सम ये चाप्नुवन्ति ते । नान्यथाऽभ्यन्तरोपायैर्दृश्यतामिह चार्थिभि ॥ २४ ॥ एवं प्रवर्तितं चक्रं, तदग्रे सफलीभवेत् । सत्यात्मकस्य सर्वस्य, सुखस्य साधनं वहु ॥ २५ ॥ समये प्राप्नुवन्त्येवं, न वाचेति सनातनम् । इत्थं दयामयीं तेषां, स्थितिं प्रतिसुशक्यते ॥ २६ ॥ स्पष्टं ज्ञातुं स्थायिनं च, सुखं वास्तविकं पुनः । सत्यसाधनसम्भार, कर्तुमत्रात्यवश्यकम् ॥ २७ ॥ सत्यसाधनयोगो हि, सर्वोपरि विराजते । तथाऽद्वितीयं संमान्यं, चमत्कारकरं पुन. ॥ २८ ॥ अस्ति साधनकं पुण्यं, प्राप्यते तद्गुरोर्मुखात् । उपयोगे प्रकुर्वन्त, स्वल्पकालेन तत्सुखम् ॥ २९ ॥ अवश्यमेव लब्धव्यमखण्डमव्यय ध्रुवम् । योगश्चैतादृशं वस्तु, न स्वयं ज्ञायते क्वचित् ॥ ३० ॥ योगयुक्तादात्मविद, कस्मादपि महात्मनः । ज्ञातव्यो विषयासक्तान्नाप्यते स हि योगिन. ॥ ३१ ॥ यश्चोदरभरो योगी, संसारासक्तचेतन । वाह्यत साधुवद्वृत्तिस्तस्मै योगोऽस्ति दुर्लभ ॥ ३२ ॥ एवं भूतायोगिनश्च, नाप्यते योगसाधनम् । तस्माच्छास्त्रपरोयोगः, शिक्षणीयो महात्मन ॥ ३३ ॥ योगिनोऽद्य न लभ्यन्ते, भारते योगधारका. । परं प्रयासकरणाच्छोधव्या योगिनोऽधुना ॥ ३४ ॥ सुयोगाभ्यासतो नित्यं, समाधानेन चेतसा । अथवा दूरत स्थेयं, कंचिद्योगविदं जनम् ॥ ३५ ॥ समाश्रयन्तु येन स्यात्साध्यसाधनमुत्तमम् । परन्त्वियं कर्त्तव्यं, स्मरणं साधनं विना ॥ ३६ ॥ नाप्यते सत्सुख कैश्चिदिति जानन्तु साधका. । परन्तु स्वसमीपेऽस्ति, तत्सुखं स्वात्मनि स्थितम् ॥ ३७ ॥ अन्तर्दृष्टितोऽभ्यासाज्ज्ञापयन्ति सुखं परम् । येषां सनातनस्यैवं, सुखाभीष्टोपलब्धये ॥ ३८ ॥ योगसाधनवाञ्छा चेद्योजनीयं मनो मुहुः । योगस्य योगिनां चात्र, महत्वं परमोच्चकैः ॥ ३९ ॥ गीताया तच्च कृष्णेन, सर्वमुक्तं महात्मना । तपस्विभ्योऽधिको योगी, इति श्लोकेन वर्णितम् ॥ ४० ॥ अनेकधोपवासादितपो दीर्घातिदीर्घकम् । कृत्वाऽपि च न लभ्येत, योगी कश्चिन्महोदयः ॥ ४१ ॥ अतो योगी महानस्ति, सर्वतो भारते कलौ । नयनिक्षेपदेवादेरायुष्यभङ्गकं तथा ॥४२॥

जीवादिसंख्यां संख्यातुमुत्सुका ज्ञानिना वराः। तेभ्योऽप्यस्ति महान् योगी, तथा कर्मकरादपि ॥४३॥ अतोऽर्जुन ! भव त्वं हि, योगी योगात्परो न हि। योगयुक्तो विशुद्धात्मेत्यादिश्लोकेन वर्णितम् ॥४४॥ श्रीमत्कृष्णेन महता, चार्जुनाय विदे मुहुः। तदाशयश्चेत्थमस्ति, ज्ञातव्यो योगवित्तमैः ॥ ४५ ॥ आत्मजेतेन्द्रियाहर्ता, तथा भूतेषु भावना। स्थापनीया समा शश्वदिति शास्त्रमतं सदा ॥ ४६ ॥ योगी जनः कर्म कुर्वन्निष्कर्मैव स जायते। अर्थात् कर्मलेपनाच्च, न कदापि स लिप्यते ॥४७॥ यथाऽम्भसि गतं पद्मं, न स्पृशेत्तज्जलं क्वचित्। तथैव योगसम्पन्ना, न लिम्पन्ति च कर्मभिः ॥ ४८ ॥ एवमेव च सम्प्रोक्तं, जैनशास्त्रेऽपि न्यायतः। [ अग्गं च मूलं ] चे त्यादिश्चेयं स्याद्वदकं पुनः ॥ ४९ ॥ मूलकर्म्माऽग्रकर्म्मणो, भेदं ज्ञात्वा विवेकतः। एवं ज्ञात्वा सुकर्माऽपि, निष्कर्मा साधको भवेत् ॥ ५० ॥ निष्कर्मकारिणा चेत्थ, न भवेच्च कदाचन। उपाध्युत्पातक चेति, लौकिकं सर्वकर्म च ॥ ५१ ॥ केवलं दर्शनार्थाय, दृश्यते चेदृशं क्वचित्। योगयुक्तात्मन कार्यं, योगक्षेत्रस्य वाहकम् ॥ ५२ ॥ भवेदयं च योगो हि, चिरकालात्समागतः। प्रवर्तकश्चास्य योगस्यानादे ऋषभो जिन ॥ ५३ ॥ तीर्थंकृतामादिभूत, श्रीमानृषभदेवकः। जिनराजोऽभवद्योगी योगिना प्रवरो मुनिः ॥ ५४ ॥ मनोनिग्रहणाऽऽदेशो, निर्दिष्टः पूर्वमेव च। तेनाज्ञा च प्रदत्ताऽत्र, सर्वाधिक्येन ज्ञानतः ॥ ५५ ॥ बहुजीवनिकायाना, सन्मुख जगतः परम्। दृष्टिमात्रेण यत्क्षोभं, मन प्राप्तं च यन्मुहु ॥ ५६ ॥ भूत्वाऽक्षुब्ध पुनश्चात्मसंमुखं यत्प्रवर्तितम्। पुनस्तदेवानन्तं च, लब्ध्वा प्रत्यक्षमेव वा ॥ ५७ ॥ करोत्यनुभवं तस्य, मनसोऽतो निरोधनम्। कर्त्तव्य हि तदेवास्ति, योगो योगविदा मते ॥ ५८ ॥ इदमेव हि योगस्य, लक्षणं प्रोक्तवानिति। पतंजलिमुनिश्चापि, योगसूत्रेण जायताम् ॥ ५९ ॥ **चित्तवृत्तिनिरोधाख्यो**, योगश्चोक्तः पुरातन। अत्युत्तमस्य योगस्य, पात्रं हि स्त्रीनरादयः ॥ ६० ॥ चतुर्वर्णाश्रमाणां च, लोकानामत्र चास्ति वै। अधिकारश्च योगस्य, साधनेनास्ति निर्णयः ॥ ६१ ॥ योगेनैव यशस्तेजो, वर्धते योगिना मुहुः। योगतश्चक्रषट्कं च, भित्वोर्द्धं याति साधकः ॥ ६२ ॥ निर्वाणपदमागत्य, जरामरणवर्जितः। अतोऽत्र निर्णयो नास्ति, योगे जातिभिदो मुधा ॥६३॥ जातिभेदात्मको भेदो, नावश्या प्रविचारणा। चाण्डालजातिसम्पन्नो, जनोऽपि योगवित्तमः ॥६४॥ भवितुं शक्यते योगी, महात्माऽपि स्वतन्त्रतः। पञ्चविंशतिशतात्पूर्वं, हरिकेशी मुनीश्वरः ॥ ६५ ॥ स च चाण्डालजातीयो, जातश्चेति तथाऽपि च। योगतो

लब्धवान्नूनं, पदं महात्मनां ध्रुवम् ॥ ६६ ॥ "सोवागकुल" संभूतश्चेत्युक्तं मुनिपुङ्गवैः । तदाशयोऽस्य विज्ञेयश्चाण्डालकुलसंभवः ॥ ६७ ॥ हरिकेशी मुनिर्जातः, सर्वोच्चैः पदवीं गतः । उत्तराध्ययने प्रोक्त, "सक्खं खु [चेति] दिस्सई" ॥६८॥ तदर्थोऽयं च विज्ञेयो, योगमाहात्म्यमुत्तमम् । प्रत्यक्षं दृश्यते यत्र, नास्ति जातिविचारणा ॥ ६९ ॥ हरिकेशी योगी चाण्डालो, जात्या चासीद्विशेषतः । परन्तु योगवृद्धयङ्गे, सर्वनेत्रं पिनष्टि च ॥ ७० ॥ तामसीवृत्तियुक्तानां, योगसिद्धिः कदाचन । भवितुं शक्यते तस्माद्योगो योगविजानताम् ॥ ७१ ॥ घृतक्षीरादिकं नित्यं, भोजनं सात्विकं वरम् । भगवता कृष्णचन्द्रेण, गीतायामुक्तमीदृशम् ॥ ७२ ॥ सात्विकानां जनानां तु, रसयुक्तं मृदु स्थिरम् । हृद्यं भोजनमाख्यातं, सात्विकं प्रियमात्मनः ॥ ७३ ॥ आयुष्यवलवुद्धीनां, वर्द्धनं जायते यतः । परन्त्वतिकतिक्तानां तैलादीनां न कारयेत् ॥ ७४ ॥ तामसानां पदार्थानामुपयोगं कदापि न । नात्यन्तं च कटुं तीक्ष्णं, न चाम्लं तिक्तभोजनम् ॥ ७५ ॥ परिहरेद्दूरतो योगी, नाम सयोगसाधने ॥ ७६ ॥ रतश्चावश्यकत्वे हि, नाधिकं वचनं वदेत् । प्रयोजनं विना योगी, मौनमेव समाश्रयेत् ॥ ७७ ॥ अन्यथा वाग्व्यये जाते, विकारत्वं प्रपद्यते । योगे विचारतो ब्रूयादिति योगविदो विदुः ॥ ७८ ॥ योगसाधननिष्ठानां, पुरुषाणां महात्मनाम् । सकाशात्सर्वक्रिया ज्ञात्वा, तथा तत्तालिका यतिः ॥ ७९ ॥ योगसिद्ध्यै पवित्रे च, तथैकान्ते विनिर्जने । देशे योगक्रिया शिक्षेदथवा गिरिगव्हरे ॥ ८० ॥ एकान्तातिरिक्ते च, स्थाने नैव प्रसिध्यति । अतः प्राचीनकालीनाः, पुरुषा वहवो मुहु ॥ ८१ ॥ यत्रासन्सात्विका वृक्षा, लतागुल्मादिसंवृताः । पर्वतास्तद्गुहाश्चापि, तथा सुखकराः पुनः ॥ ८२ ॥ तत्राभ्यस्तवन्तस्ते, योगसाधनिकाक्रियाम् । यत्रातिसात्विकाः शश्वद्वनस्पत्यादयस्तथा ॥ ८३ ॥ महात्मना शुद्धरज कणिका पतिता भुवि । वातावरणकं चैव, तत्र स्थानं प्रकल्पयेत् ॥ ८४ ॥ तत्र स्थले निवसतां, चञ्चलत्वं विहाय च । मनः शान्तं भवेन्नित्यं, तत्रैव वसतां नृणाम् ॥ ८५ ॥ अतस्तत्स्थानकं तेषामनुकूलं सदा प्रियम् । यत्सुखं राजभवने, धर्मयुक्ते तथा पुनः ॥८६॥ स्वप्नेऽपि नाप्यते तच्च, सुखं नान्यत्र कर्हिचित् । आनन्दानुभवं कुल्लुशिमलादिप्रदेशके ॥८७॥ हंसतीर्थे हिमागारे, गमने यच्च लभ्यते । नान्यत्स्थले कदापि स्यादानन्दानुभवस्तथा ॥ ८८ ॥ योगिनामिति तेष्वेव, स्थानेषु वसनं वरम् । कारणेन कदाचिच्चेत्तत्स्थाने नोपलभ्यते ॥८९॥ तदा स्वनगरस्यैव, प्रान्तगे रमणीयके । वनस्पतिसमायुक्ते, वस्तव्यं च शुचिस्थले ॥९०॥

योगाभ्याससंसिद्धिस्तत्रैव खलु जायते। यत्सुखं वीतरागस्य, मुनेरेकान्तवासिनः। तत्सुखं देवराजस्य, चक्रिणो न कदाचन ॥ ९१ ॥ नासनेन विना सिद्धिर्जायते न रजोवृते। रह स्थाने चेदासनस्य, ज्ञेयमावश्यकं मुहु ॥ ९२ ॥ दर्भासनं प्रशस्तं स्याद्योगिना च मुदे पुन। कम्बलेन तदाच्छाद्य, सर्वथा योगधारके। एतादृशे साधकानामासने शक्तिरुज्वला। जायते ननु कायस्य, विद्युत्कोटिसमप्रभा ॥ ९३ ॥ बुद्धिरत्युत्तमा वेति, नो विशेत्सूत्रकासने। तत्रासने साधनत्वे, योगो निष्फलतां व्रजेत् ॥ ९४ ॥ भगवत्यादिसूत्रेषु, प्रोक्त दर्भासनं शुभम्। **'दब्भ संथारगं'** चेति, सूत्रार्थेनोपवर्णितम् ॥ ९५ ॥ गणधरस्य मुनेश्च, गौतमस्य तथा पुन। केशिस्वामीत्यादिना च, स्वागतार्थं समाहितम् ॥ ९६ ॥ आगन्तुकेभ्यो नितरां, सुदर्भासनमेव हि। प्रदत्तं चोपवेशार्थमित्येव च तदासनम् ॥ ९७ ॥ प्रशस्तं सर्वासनेभ्यो, सुदर्भासनमुच्चकै.। जैनाना च तथा रीतिरेषा दर्भासनार्पणे ॥ ९८ ॥ तदभावे प्रशस्तं स्यात्कम्बलासनमेव च। दर्भासनोपरिष्टात्तु, कम्बलासनमिष्यते ॥ ९९ ॥ तत. पद्मासनं बद्ध्वा, मनसोऽप्यनुकूलत। पुनरासनेदृशे च, साधनं समुपविश्य च ॥ १०० ॥ साधयेच्छुद्धमनसा, योगं योगस्य सिद्धये। दिशि पूर्वे चोत्तरे च, मुखं कृत्वा समभ्यसेत् ॥ १०१ ॥ तदेवोक्तं **'पुरत्थाभिमुहे' 'सपलियंकनिसण्णया'** इत्येव कथितं सर्वमासन क्रमतो जिनैः ॥ १०२ ॥ कमलाख्ये वा पर्यङ्के, स्थित्वा चाप्युत्तमासने। मुखं पूर्वदिशि कृत्वा, वामहस्ते च दक्षिणम् ॥१०३॥ करं धृत्वा कटिं तद्वत्कण्ठे चैवं च मस्तकम्। सदैकपंक्तौ सस्थाप्य, साधयेदप्रमादत ॥ १०४ ॥ स्थाप्यं श्मश्रुविभागेऽधो, हनौ स्वन्तर्गते पुनः। ईदृगासनमारूढो, योगी याति परं शमम् ॥ १०५ ॥ प्रातर्दिनान्ते च पुनर्निशाया, पूर्वे परे याममये च काले। मध्याह्नवेलासुसमाहित सन्, योगी सदाऽनेन सदासनेन ॥ १०६ ॥ करोतु योगस्य सुसाधनं वै, यद्येकयामान्तसुखेन योगी। भूत्वा स्थिरो जातु सदा सुशक्यस्तदा च ज्ञेया विजयोपलब्धिः ॥ १०७ ॥ जातासने चासनसिद्धिरुग्रा, विनासनाद्धि विजयो न योग। सिद्ध्येत्पथो प्राणशरीरवृत्तौ, तदा सुदृष्टौ विजयोऽपि लभ्य. ॥ १०८ ॥ प्राणेन्द्रिये वापि तनौ सुदृष्टौ, प्राप्नोति योगी विजयं समन्तात्। सदेत्यमेवं च विना न योगमात्मोपलब्धिर्भवतीति ज्ञेयम् ॥ १०९ ॥ अतो नितान्तं श्रमतो गुरोश्च, युक्तेर्विशेषेण च प्रापणीयः। जयोऽप्यजस्रं खलु स्वासनस्य, जानन्तु सर्वे मुनयो नितान्तम् ॥ ११० ॥ जितासनानन्तरमेव शश्वद्यमादिनियमादिजयोऽपि लभ्य.। जितासनानन्तरसाधकेन, सल-

भ्यतेऽनेकक्रियाविशेषा ॥ १११ ॥ जित्वासनं दृष्टिजितार्थमेवमत्यन्तमावश्यकपूर्णभावात् । दृष्टेर्जयस्येदमवेहि लक्षणं, नेत्रापिधानं न भवेद्धि पूर्वम् ॥ ११२ ॥ निमेषमेषैर्भवतीह दृष्टिस्तेनैव योगस्य फलं प्रदिष्टम् । योगेऽस्ति यत्त्राटकसंज्ञकं च, सूत्रेष्वपि प्रोक्तमथेतरत्र ॥ ११३ ॥ उन्मेषमेषाद्यतिरिक्तभावे, प्रमाणमासलभते मुहुश्च । संसिद्धये त्राटकमुद्रयार्थं, जितार्थमीदृक् खलु दृष्टिपुष्टे ॥ ११४ ॥ प्रातर्दिनान्ते च सुसिद्धसाधकः, स्थित्वाऽऽसने प्रोक्तयथेष्टसाधनम् । स्वतः सपादात्करतस्तथान्तरे, निर्माय तूला मृदुलं सगोलम् । संस्थापनीयं परितो यथेष्टम् ॥११५॥ विनासनेनेति च योगसिद्धिं, योग विना नाऽऽसनसिद्धिमेति । द्वयोः श्रमाद्दृष्टिनिरोधनं स्याद्दृष्टेर्निरोधात्तु समाधिसिद्धिः ॥ ११६ ॥ समाधित आत्मसुखोपलब्धिस्ततो मुमुक्षुः समुपैति मुक्तिम् । मुक्तौ सदा ब्रह्मणि लीनभावे, जगद्विलीने च विभाति योगी ॥ ११७ ॥ तद्गोलके दृष्टिरुपासनीया, किञ्चिच्च काले हि यदाश्रुपातः । नेत्राद्विनिर्गच्छति चेत्तदाश्रुपातो यदाऽऽरम्भविकल्पकाले ॥ ११८ ॥ तदा त्राटकं मोचयेत्सर्वकाले, यदा स स्थिरत्वं भवेत्कायमध्ये । सदैवं मनः शान्तभाव प्रयाति, मुनेर्योगतो वाऽचला बुद्धिरेका ॥ ११९ ॥ चतुर्दिनान्तेऽष्टदिनान्तराले, सम्प्रोक्षयेदश्रुकलानिपातम् । न लोपनीयं किल त्राटकं च, श्रमो विधेयश्च सदेदृशोऽपि ॥ १२० ॥ न स्यात्कदाचिन्नयने पिधाने, कृते प्रयासे यथा शान्तिरुग्रा । समृद्धिर्भवेदनुदिनं चेत्सदा स्थापनीयं, प्रवृत्तिर्यथा स्यात्सुयोगे मुनीनाम् ॥ १२१ ॥ यदैका घटीतोऽधिका पक्ष्म पंक्तिर्निरुद्धा भवेच्चेत्तदा नूतनानाम् । महाश्चर्यरूप सुवार्तान्विताना, दरीदृश्यते योगिवर्य्यैर्मुनीन्द्रैः ॥ १२२ ॥ यदा यदैवं च प्रयाति वृद्धिस्तदा तदा तस्य च साधकस्य । सदानन्दप्राप्तिर्भवेदंशकेऽपि, विचार्य महद्भिः सदैवं विरागैः ॥ १२३ ॥ यदा यदा जेष्यति दृष्टिपातं, ततस्ततस्तन्मनसोऽपि शान्तिः । सञ्जायते दृष्टिजये मनोपि, शान्तं जयश्चापि भवेद्धि तस्य ॥ १२४ ॥ नेत्रान्तरे पक्ष्मपङ्क्तौ नितान्तं, सुसंस्थापयेद्दृष्टिरेवं विचारात् । अतः सर्वसूत्रे प्रयुक्तं च तद्वन्मुहुः पुद्गले दृष्टिपातो विधेयः ॥ १२५ ॥ शुभं त्राटकं यस्य जातं स योगी, सुसम्यक्त्त्वतत्त्वे विलीनो विभाति । निरस्याखिला भावना पौद्गलीयां, सदा प्राणिनां प्राणरक्षां विधत्ते ॥ १२६ ॥ सुदेत्थं क्रिया ध्यानयोगस्य नित्यं, महापुरुषतः शिक्षणीया प्रयत्नात् । सुदृष्टेर्जयाभ्यासमेत्यैकघंटासुपर्य्यन्तमन्यत्र ससाधकानाम् ॥ १२७ ॥ दिनस्यादिभागे गिरेः कस्यचिद्वा, जनोऽप्यूर्द्ध्वभागेऽथवा स्थापनीया । सुदृष्टिर्निशायां शशाङ्के सितस्य, कुजस्याथ तारासु संस्थापनीया

॥ १२८ ॥ अयञ्च प्रयासो यदा वृद्धिमेति, प्रकृतिप्रत्येकं पदार्थान्तरेऽपि, । तदा प्रेमवृद्धिः प्रयात्येव नूनं, तथा सृष्टिप्रत्येकमशेऽपि ज्ञेया ॥ १२९ ॥ मुदा वीतरागत्वमुत्कृष्टताया॰, प्रभावस्य स्याद्वर्तनं योगसिद्धौ । प्रयत्नोऽपि स्यादुत्कटत्वेन शश्वत्तदानीं मुहूर्तान्तमुत्थापनीय ॥ १३० ॥ ततः सृष्टिभागेऽपि स्याच्चेत्सुदृष्टि॰-सुख स्थापयित्वा च तत्रैव सृष्टि । स्थिरीभावमागत्य कायस्य स्वस्य, स्वपिण्डाद्विनिः, सृत्य दु॰ख पुनश्च ॥ १३१ ॥ मुहु॰ प्लायते तादृशावस्थया, सुखं साधके नाप्यते शीघ्रत । प्रभुनाम्नो मुहुर्भावनानामकं, जपं प्रेमतो योगजन्यं पुन ॥ १३२ ॥ तदा प्रारभेतेच्छया शब्दकोच्चारणं ॐ नमो जापमेवं जपेत् । अनेनार्हदेवं भजेत्प्रेमत , सर्वकाले तदा ॐ पदं लुप्यते, पुन॰ शश्वदेव स्वयं नामत ॥ १३३ ॥ ततश्चात्मनि प्रेमतश्चार्हति, प्रभावैक्यकारासुवृत्तिस्तत॰ । स्वय सक्षणं जायते प्रेमतो, यथा चावकाशं पर तत्वत ॥ १३४ ॥ चलंश्चोपशान्त्या भ्रमन्वा विशन्सदोत्तिष्ठमान॰ शयानोऽपि च । तथा जाग्रतो भुञ्जमानश्च तन्न ध्यानं कदाचित्सरेत्कायतः ॥ १३५ ॥ निशान्ते दिनान्ते च मध्यान्हके, निशायां सुयोग क्रियामारभेत ॥ सदाऽजापजापं जपेत्सस्मरन्नेकतो योगद्वारैव सद्भावना, दृढत्वं भवेद्योगतो नान्यतः ॥ १३६ ॥ जापमेवं जपेत्प्रेमभावेन च, तथा हि द्वयं साधनं सर्वतो । मिलित्वा मन शान्तभावं व्रजेन्मनोऽश्वो भयंकारको दु खद ॥ १३७ ॥ तथा साहसाधाररूपं भवेन्मनो रूपकाश्वस्तथा चेन्द्रियं, घोटकोऽस्ति वलिष्ठ इति ज्ञायता, पर चेदृशेन प्रयासेन च ॥ १३८ ॥ ततो मत्तता याति तेषा वहि । ततस्ते भवेयु प्रशान्ताः पुन॰ ॥ ततश्चेदृशेन प्रकारेण च, भवेत्साधकाना विवेकान्विता ॥ १३९ ॥ तथैवं च दृष्टिश्च सूक्ष्मा मुहु , सहैवानयेदात्मिकानन्दकम् । इदं साधनं स्याच्च सन्तोषकहेतुस्तदा साधका स्वस्य च, प्रवृत्तिं निवृत्तिं च सपश्यत ॥ १४० ॥ आत्मानं सारथिं विद्धि, शरीर रथमेव तु । इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव च ॥ १४१ ॥ परावृत्य यत्राटकं वाह्यवृत्या, कृतं तच्च कुर्वन्तु वाऽभ्यन्तरीया । शुभं त्राटकं दृष्टितो योगसिद्ध्यै, भवेद्योगिना साधने सम्प्रवृत्तिः ॥ १४२ ॥ श्वासोच्छ्वासकयोर्दृष्टि॰, पूर्वं स्थाप्या प्रयत्नत । वहिर्याति यदा श्वासस्तदा 'सो' शब्द इर्य्यते ॥ १४३ ॥ जाते चाभ्यन्तरे शश्वदहं शब्द॰ स्वभावत । जायते च द्वयोर्योगे, 'सोहं' मित्युपयुज्यते ॥ १४४ ॥ जापं विनैव ससिद्ध्येदजपाजापमुत्तमम् । तेनैवाथापवर्गस्य, प्राप्तिर्भवति योगिनाम् ॥ १४५ ॥ ध्यानेन तत्र सम्पश्येद्यदा श्वासोऽभिजन्यते । यत्र लीनो भवेच्छ्वासस्तत्र वृत्तिप्रयासत॰ ॥ १४६ ॥ स्थापये-

दाभ्यन्तरीयमेवं पूर्वं समाश्रयेत् । प्रयासे चैकदैवात्र, शान्तिः सन्दृश्यते रहः ॥ १४७ ॥ आभ्यन्तरीयाऽऽनन्दस्य, स्याद्वृद्धिश्चोत्तरोत्तरा । मिलित्वाऽहर्निशं चैकविंशत्याख्यसहस्रकम् ॥ १४८ ॥ षट् शतं च तथा शश्वच्छ्वासोच्छ्वासश्च जायते । तेषूपयोगमन्तरा, श्वासो नैकोऽपि हापयेत् ॥ १४९ ॥ ''सोहं' जापजपे जाते, वृत्ति सस्थीयते स्वयम् । तत्र श्वासे विनाऽऽयासं, सहसैवं विनिश्चया ॥ १५० ॥ श्वासकस्यात्मनोत्थ च, ध्याने सिद्धे सुसाधकः । हृदयस्थे मध्यगता, वृत्तिं संस्थापयेन्मुहुः ॥ १५१ ॥ प्रयासोऽपि प्रकर्तव्य, इति योगविदां क्रिया । ज्ञातव्या योगिवृन्दैश्च, यत. स्यादचला क्रिया ॥ १५२ ॥ स्थिरैवं स्याद्यदा वृत्तिर्हृदयस्थाऽप्यलौकिकम् । शान्तस्रोतः प्रवहति, हृदब्जेभ्य समन्तत· ॥ १५३ ॥ यस्य शान्तिमयस्याशु, साधकस्यावसानतः । इतोपि पूर्वं कस्यापि, सन्निधावनुभवस्तथा । न जातश्च तथा ध्यानं, सिद्धं वा हृद्गतं पुनः ॥ १५४ ॥ नाभ्येकदेशेऽपि विधारणीया, वृत्तिश्च तत्रत्यसुसिद्धिभावे । जातः पुनस्तद्धृदये च नीत्वा, कण्ठस्थमध्येऽपि तथा समाप्य, सस्थापयेनैव विचारणात्र ॥ १५५ ॥ नाभ्या हृदिस्थे च सुकण्ठगे वा, ततस्त्रिकुट्या परिधारणीया । वृत्तिश्च सर्वत्र सुसाधकेन ( सस्थापनीया ), ततश्च शान्तिर्मनसस्त्रिलोक्याम् ॥ १५६ ॥ ध्याने च सिद्धे स्थिरवृत्तिरेवं, जाता तदा तत्र मसूरसूपवत् । स्याद्बिन्दुसाक्षात्करणं ततश्च, तद्बिन्दुतेजोऽथ प्रकाशते च ॥ १५७ ॥ तद्दर्शने साधकयोगवेत्तुरपारमानन्दसुखं प्रयाति । ततश्च तद्बिन्दु· प्रदर्शनेन, योगेन योगामृतसेवकानाम् ॥ १५८ ॥ तदा कपालेऽखिलविश्वदर्शनं, सञ्जायते कारणमस्ति तत्र । यत्र स्थिते वर्तुलविन्दुदर्शनं, योगी जन. पश्यति सर्वदेत्थम् ॥ १५९ ॥ तदा त्रिकुट्या शशिलाञ्छनेन, द्वारैव विन्दोरवलोकनं स्यात् । तद्दर्शनानन्तरसाधकाना, भवत्यपूर्वा किल वोधिलब्धि. ॥ १६० ॥ जनेर्जरामृत्यु· विनाशनस्य, भवेत्सुकल्पास्थितिरत्रवोध्या । विन्दोश्च सन्दर्शनमेव यत्र, श्रीशङ्करानन्दतृतीयनेत्रम् ॥ १६१ ॥ आत्माऽखिल. शंकर एव नान्यस्तत्सदृशं नेत्रद्वयं यतोऽस्ति । विंदोश्च सन्दर्शनरूपमुग्रं, ज्ञानात्मक चक्षुरियं तृतीयम् ॥ १६२ ॥ जाते सुविन्दोरवलोकने च, मृत्योर्भयं नास्ति सुसाधकानाम् । तथैव ससंशयशल्यनाशो, भवेच्च योगामृतसेवकानाम् ॥ १६३ ॥ एतस्य वोधार्थमिदं वदन्ति, ह्युद्घाटनं शम्भुतृतीयनेत्रम् । तदा जगत्संशयशल्यरूपं, लयं व्रजेत्सर्वमिदं प्रधार्य्यम् ॥ १६४ ॥ विन्दोस्त्रिकुट्यामवलोकनान्तर, यथा यथा साधकसज्जनानाम् ॥ स्याच्चेत्प्रकाशो हि विशेषतो मुदा, तथा तथा विन्दुविशेषता च, विकाशते सर्वमयी विदां

मुदे ॥ १६५ ॥ अन्ते च विन्दावतिलीनभावं, व्रजेच्च सिद्धं प्रतिभाति योगी। शान्तौ च नादानुभवं च याति, विन्दोरपेक्षा तु विशेषनादे ॥ १६६ ॥ श्रीविन्दोरुवलोकनेऽनुदिवस जाते ततश्चैधते, शक्तिर्योगधिया ततश्च श्रवणं नादस्य जज्ञन्यते। पश्चादात्मसुखं स्वयं विलसति श्रीसाधकाना ततो, वैवं शून्यगुहा निबद्धमनसां मुक्तिः कराब्जे स्थिता ॥ १६७ ॥ नादोऽनेकविधोऽस्ति शास्त्रविहित· संश्रूयते योगिभिर्घण्टानादसमस्तथास्ति निनद शङ्खस्य वीणारव·। वेणूत्तालरवश्च चक्रसदृशं शाङ्गर्यादि शब्दस्तथा, एवं विन्द्ववलोकनादनुमुहुर्नाद समुत्पद्यते ॥१६८॥ योगामृतस्य पानेन, नादस्य श्रवणात्पुन। विन्दुदर्शनतो योगी, जरामरणवर्जित. ॥ १६९ ॥ नादानन्दे समुत्पन्ने, विन्दुर्गौणतमो भवेत्। नादस्य चाविशेषेण, जायते श्रवणं मुहुः ॥ १७० ॥ घनगर्जनतोऽन्यूनं, श्रूयते गर्जनं वहु। दिव्यनादप्रभावेणाऽप्यन्ते योगी प्रलीयते ॥ १७१ ॥ नादे ध्वन्यनुभवस्य, सर्वाधिक्येन वर्धनम्। तदा स्यात्साधकजनो, भ्रमणे चलने तथा ॥ १७२ ॥ उपविश्यासने चैवं, स्थित सर्वक्रियासु च। नादानुभवमेवास्ति, नान्यो भाति विशेषत· ॥ १७३ ॥ नादानुभवतो लोके, सङ्गीतस्य प्रचारक। योगिभिश्च कृतोऽजस्र, यथा नाद· प्रियंकर· ॥ १७४ ॥ मुञ्चन्ति रोदनं वाला·, क्रोध मुञ्चन्ति पन्नगा। मृगा प्राणान् विमुञ्चन्ति, **नास्ति नादसमो रसः** ॥ १७५ ॥ साधकाना तथा लोके, सङ्गीतोऽतिप्रियकर·। अत सङ्गीतगानेन, मनोधृत्वा सदैकताम्। साधक प्रव्रजेच्चाग्रे, शनैर्नूनं प्रयासत ॥ १७६ ॥ वस्तुतो नादो वाह्योऽभूत्सङ्गीतस्य प्रसाधने। वाह्यनादस्य द्वारेणाऽभ्यन्तरो नादमेलनात् ॥ प्राप्तुं च शक्यते योगी, नात्र कार्य विचारणम्। यदा साधकजनो नादैर्वृद्धिमेति तथाग्रत ॥ १७८ ॥ तदा तस्य च यत्राऽभून्नादोऽनुभवमेव हि। तदा भ्रमरगुहाया तु, शङ्खाकार प्रतीयते ॥१७९॥ तदूर्ध्वं प्रेमभावेन, चैक शुद्ध· प्रदृश्यते। तस्य शिखरमध्ये तु, महानेको विराजते ॥ १८० ॥ ततश्चोर्ध्वं पश्येद्भ्रमरसुगुहा यत्र रवित, शशाङ्कादमेर्वाऽप्यधिकबहुतेजोऽस्ति विततम्। तदा विन्दोर्नादश्रवणविलय यात्यनुदिनं, सदा योगी लीनो भवति नितरा यत्र सुखत ॥ १८१ ॥ तस्य चानुभवं नित्यं, कुर्याद्योगी विशेषत। प्रकाशकपदार्थोऽय, वर्तुलाकार इष्यते ॥ १८२ ॥ अधो मुखातपत्रेण, समं सम्भ्राजते यत। छत्राकारमिदं तद्वत्सहस्रदलसवृतम् ॥ १८३ ॥ सिद्धि· शिलारूपकेऽत्राऽजरामरणचक्रके। शिरोऽग्रभागलोकस्य, चाग्रभागोपरिस्थितम् ॥ १८४ ॥ अजरामरचक्रेऽत्र, वृत्तिलीनादनन्तरम्। साधकानामखण्ड चाऽ-

लौकिकानन्दमेव च ॥ १८५ ॥ योगिनोऽनुभवन्तीत्थं, वर्द्धते तदहर्निशम्। यत्र योगात्मनो लीना, भवन्त्यधिकतो मुहुः ॥ १८६ ॥ अपूर्वाऽऽनन्दसन्दोहाऽनुभवो वर्द्धते स्वयम्। आशरीरे (अखिले) स्वयं तस्य, प्रसारो जायतेऽसकृत् ॥ १८७ ॥ अर्थादानन्दसन्दोह, स्वयं सर्वाङ्गकेऽसकृत्। अलौकिकाऽऽनन्दरूपं, स्वयं स्फूर्त्या विभाव्यते ॥ १८८ ॥ अवस्थयाऽनया यो हि, रूपं साधकसंज्ञकम्। विहाय योगी सिद्धश्च, विदेहोऽपि तथा पुन ॥ १८९ ॥ महात्मा जीवनमुक्तः, कथ्यते योगवित्तमैः। महात्मनश्चेदृशस्य, देहादृष्टिर्यदा स्थले ॥ १९० ॥ यत्र यत्र प्रसरति, तत्र तत्राऽप्यलौकिकम्। दिव्यानन्दानुभवनं, करोति साधकोत्तमः ॥ १९१ ॥ जनपदे जले स्थले, तथा वसुमता स्थले। राजस्थले पशुमये, गगनादिसुखस्थले ॥ १९२ ॥ एतत्स्थानेषु साधूनां, दृष्टिर्याति महात्मनाम्। तत्र तत्र स्थले नित्यमानन्दानुभवात्मकम् ॥ १९३ ॥ सर्वत्राऽभेददृष्ट्या च, तथाऽनुभवतः सदा। द्वैतभावस्य भ्रान्तेश्च, जातेऽभावे स कथ्यते ॥ १९४ ॥ तादृशो वीतरागश्च, योगी भवति निश्चलः। कृतकृत्योऽपि सिद्धश्च, जायत आत्मवत्सलः ॥ १९५ ॥ योगिनामीदृशाना च, दर्शनं लोकपावनम्। कुरुते सततं योगादग्रे चैव निशम्यताम् ॥ १९६ ॥ यथाऽभ्यन्तरवृत्तीना, द्वारेणापि प्रयोगके। सम्बन्धे ज्ञायते तद्दृष्ट्या स वाह्यभागत ॥ १९७ ॥ नामेरुपरिभागे च, स्थापनीयो विशेषत.। यदा तत्र प्रयासे तु, चक्षुषो नाभिमध्यगे ॥ १९८ ॥ अत्युज्वलतमं तेजो, दृश्यते चानुरूपत। तदा नाभिगता दृष्टिं, विहाय वक्षसोर्मुहुः। स्थापनीया प्रयत्नेन, मध्यभागे सुभावत. ॥ १९९ ॥ तत्तेजो नासिकारन्ध्रे, स्थापनीयं च ध्यानत। नासिकाग्राभ्रिकुट्यां तु, ततो भ्रमरगह्वरे ॥ २०० ॥ अजरामरचक्रस्य, सिद्धा· सिद्धशिलासु च। ततोऽप्यनुभवे गच्छेत्तन्मार्गे च प्रवर्तते ॥ २०१ ॥ भक्तेरेवं महत्वं च, साधनं जन्यते परम्। भक्त्या चोत्पद्यते प्रेम, तेनैवात्मा प्रदृश्यते ॥ २०२ ॥ कस्यचिच्छास्त्रतत्वस्थश्लोकोपरि विचारणम्। कुर्वन्कुर्वंश्च गम्भीराशयं चोत्तीर्यते पुन ॥ २०२ ॥ तद्वाराग्रतश्चापीह वर्त्तते तन्निशामय। एकास्ति रीतिरीदृशी, यत्र पद्मासने स्थित. ॥ २०३ ॥ विचारयति यत्किञ्चित्तटे स्थित्वा प्रपश्यतु। परन्तु नावरोधव्यो, विचारो योगसाधने ॥ २०४ ॥ अभ्यासबलमासाद्य, स्वयं शान्तिर्भवेत्पुन.। विचारधारा चात्यन्तमेकदैव प्रशाम्यति ॥ २०५ ॥ विचारशान्तितः पश्चात्साधकानामलौकिकम्। आनन्दानुभवो याति, ततोऽखिलभवोपरि ॥ २०६ ॥ प्रेमदृष्टिर्विशाला स्याद्भावं सर्वत्र सदृशम्। स्थापयत्येव योगात्मा,

स्वयं स्वस्मिन्प्रजायते ॥ २०७ ॥ भावनोदयते शश्वत्सिद्धेषु प्रेमवर्धिनी। यदा यदा प्रयासश्च, वर्धते च तदा तदा। आभ्यन्तरे विशेषेणानन्दस्य जागृतिर्भवेत् ॥ २०८ ॥ मूलाधार समुद्धाट्य, चक्रं चक्रान्तरं नयेत्। नाभ्या वक्ष.स्थले कण्ठे, त्रिकुट्यामलिगह्वरे ॥ २०९ ॥ शिखरस्थगुहान्ते च, ब्रह्मरन्ध्रे मेलयेत्। भित्त्वैवं ब्रह्मरन्ध्रं च, योगी निर्वाणता व्रजेत् ॥ २१० ॥ न ह्येतावन्मात्रं हि, प्रत्युत वाह्यतोपि वा। आनन्दस्यैवानुभवो, जायते नु क्षणं पुन. ॥ २११ ॥ पूर्णानन्दमयश्चान्ते, भूत्वा सर्वत्र भावना। ईश्वरे स्थापयेन्नित्यं, भूत्वा प्रेमप्रयोगत ॥ २१२ ॥ पश्येदहर्निशं नित्यं, महानन्दो विकासने। वीतराग-स्ततो याति, विज्ञेयं योगवित्तमै ॥ २१३ ॥ पूर्वोक्तप्रकारेण, प्रमाणमनुसारत.। साधकार्थं स्वल्पमयी, प्रक्रिया कथितार्थिभि॰ ॥ २१४ ॥ एव विचारकरणा-त्तथोक्तस्य प्रकारत॰। भवेदलभ्यलाभश्च, मननात्स्मरणादपि ॥ २१५ ॥ तथा-ऽपरिमितं चेत्थं, सामर्थ्यं लभते मुहु॰। अत्यन्तो योगविषयो, विशालो गहनस्तथा ॥ २१६ ॥ विना गुरुपदध्यानान्न कश्चिद्योगसाधक। योगं शिक्ष-यितुं योगी, न भवद्योगवित्तमम् ॥ २१७ ॥ योगश्चतुर्विध. प्रोक्तो, मुनिभिस्तत्त्व-दर्शिभि.। हठयोगो मन्त्रयोगो, लययोगस्तथैव च ॥ राजयोग इति ख्यात-श्चतुर्धा योगसाधने ॥ २१८ ॥ यमो नियमश्चासनं, प्राणायामस्तथा पुन.। प्रत्याहारो धारणा च, ध्यानं चैव समाधिक॰ ॥ २१९ ॥ स चेत्यष्टाङ्गयोगोऽस्ति, विज्ञेयो मुनिभिर्मुदा। तत्रास्त्यपेक्षा चैकस्य, उत्तरोत्तरतः पृथक् ॥ २२० ॥ प्राणायामो वहुविधो, दृश्यते योगशास्त्रके। तदवान्तरभेदश्च, कथ्यते शास्त्रसम्मतः ॥ २२१ ॥ परन्तु तत्र मुख्योऽस्ति, पूरक. कुम्भकस्तथा। रेचको भस्त्रिकाद्यस्ति, प्राणायामोपयोगकम् ॥ २२२ ॥ प्राणायामसहायार्थं, नेतिर्धौतिश्च नौलिका। वस्ति कपालभातिश्च, गजकर्ण्यादिरस्ति च ॥ २२३ ॥ प्रक्रिया हठयोगस्य, वक्ष्य सन्ति पृथक् पृथक्। नासिकारन्ध्रतः सूत्रं, प्रवेशान्तर्वहि पुन ॥२२४॥ मुखाच्चि सारयेद्बाह्यं, नेति.. सा कीर्त्यते वुधै। वस्त्रमुत्तार्य जठरे, मलं निस्सार-येद्वहि ॥ २२५ ॥ धौति क्रिया च कथिता, योगे साहाय्यकारिणी। भ्रामयित्वा नलं योगी, नित्यंप्रति मुहुर्मुहु.॥ नोलिक्रियेयं सम्प्रोक्ता, योगाभ्यासविशारदैः ॥ २२६ ॥ गुदास्थानगतं तद्वन्मलं सम्मार्जयेद्वहि.। वस्तीक्रियेति विज्ञेया, योग-सिद्धिकरी मता ॥ २२७ ॥ कपालभातिर्विज्ञेया, गजकर्णी तथैव च। हठयोगे क्रियाश्चैता, योगविद्भिर्निदर्शिता ॥ २२८ ॥ खेचर्येका महामुद्रा, सर्वमुद्रोत्तमा

दत्वा नश्च महाव्रतादिनियमानष्टप्रवाक्याँस्तथा । संसारे जिनदेवधर्म-तरणिं प्रादादथो संयमान्, तं साधुं सुखसागरं प्रतिपदं ध्यायन्त्वतिप्रेमतः ॥ ९ ॥ अहिंसा तथा सत्यमस्तेयमाहुर्महद्ब्रह्मचर्यं सुनिर्वाणहेतुम् । यतस्तत्त्वबोधस्समुत्पद्यते च, ह्यतो रक्षणीयाश्च ते भिक्षुवर्यैः ॥ १० ॥ यस्यामोघात्मशक्तिं प्रबलगुणगणैर्नो प्रवक्तुं समर्था, नास्माकं साधुबोधस्तदनु च कथने तत्स्वरूपस्य तत्त्वम् । तस्य ज्योतिःप्रवाहं प्रबलगुणकरं वक्तुमीशाः कथंचिन्नो वा घाताख्यशक्तौ मतिरपि सुतरां नेदृशी तादृशी च ॥ ११ ॥ श्रामण्यप्रतिपालनाय सुधिया जातावतारा वयं, कामक्रोधविमोहलोभममतामानावरोधाशयाः । चेतः संघपदारविन्दयुगले जित्वेन्द्रियग्रामकं, संसारानृतभोगरोगशमने विद्यामये धार्य्यताम् ॥ १२ ॥ कामक्रोधविमर्दनेन च पुनर्लोभः समुत्पद्यते, तस्मान्मोहसमुद्भवः स्मृतिहरो विज्ञाननाशस्ततः । पश्चाद्धर्म्मविपर्य्ययोऽनृतमयी भोगैषणा जायत, इत्थं दुःखमये विचित्रविषये जीवोऽनिशं बध्यते ॥ १३ ॥ आदाविन्द्रियनिग्रहे च विषया नश्यन्त्यनायासतः, काये चारुपरिग्रहादिशमने ज्ञानोदयो भासते । पश्चात्कर्म्मसमुच्चयप्रणशन धर्म्मे प्रवृत्तिः स्थिरा, तस्मादिन्द्रियसंयमे हि मुनिभिश्चेतः प्रदेयं सदा ॥ १४ ॥ तच्छक्तेरात्मयोगात्सकलगुणमयः स्यात्प्रतापोदयश्च, तस्याग्रे चोत्थितायाः प्रचलति नितरां वर्द्धमानाः समस्ताः । जाते शीले महत्वे सकलगुणविधेः सुप्रवाहं नियुज्य, वीर्य्यं चान्तेऽवरोधं कृतमतिविमलं नो मनः शान्तिमत्वम् ॥ १५ ॥ चित्तं मे विमलायतं जिनवरे लग्नं गुरोर्भावनात्, सेवाभावबलं च संयमबल प्रोत्कृष्टमग्रेऽकरोत् । रक्ष्यं

---

१ समितिगुप्तिरूपान् । २ साधुसाध्वीश्रावकश्राविकामयः सघः । ३ श्रुतमये ।

संघबलं प्रतापसहितं कार्यं सुवाक्यार्चनमीर्षाशून्यबलं विघातकबलं तत्वात्मकं धार्यताम् ॥ १६ ॥ धैर्य्येण क्षमया विभान्ति मुनयः कञ्जै-र्यथाम्ब्वाशयाः, सत्यासत्यविमर्शनेन विषयासक्तं मनः शाम्यति। तच्छान्तेः सकलेन्द्रियाणि विषमाच्छाम्यन्त्यसद्भावनात्, साक्षात्कारतरं भवेद्धृदि पुना रूपं परस्यात्मनः ॥ १७ ॥ दृश्यादृश्यभिदापवारणकरे लोलायुषश्चेतसा, सौत्राः सच्चरितामृतादिविलसच्छास्त्राश्रये स्थीयताम् । चार्वाचारविचारसारपटवो येनाखिलाऽभीष्टदा, तस्मिन् ज्ञानमये जगत्य-नुदिनं सत्संयमैरन्विताः ॥ १८ ॥ रुद्धं सर्वमनर्थकं भगवता हिंसाबलं नर्कदं, साधूनां प्रबलारिनाशनकरं साध्वीगणानां तथा । तीव्रं भावक-षायकादिशमनं तत्वानुरूपं महत्तीर्थं स्थापितवान् स्वनामविजितं सार्थ-क्यमेवं कृतम् ॥ १९ ॥ तत्कालीनगुणानुरूपमभिधां बोधात्मिकीं नूतनां, संघे संस्थितिमेकतां सुमधुरां कृत्वा स्वधर्म्मार्थिने । योग्यत्वं समये विधाय हृदये जाता यतो योगिनः, सूत्रोक्ते वचने कुरुध्वम-निशं विश्वासमेवं मुहुः ॥ २० ॥ येनोद्घातबलं च हिंसकबलं पूर्णा-त्मना सम्मुखो, भूत्वा नष्टतरं कृतं सुमनसा रुद्धं च मिथ्याबलम् । शुद्धश्रावकश्राविकागणमयं संस्थाप्य तीर्थं शुभं, श्रीतीर्थङ्करनाम स्वं सुललितं सार्थक्यमेवाकरोत् ॥ २१ ॥ तत्काले जनता स्वधर्मनिरता सङ्घे सदा सम्मता, भावैक्यस्य रसस्य पानमसकृद्यत्पायितं प्रेमतः । आज्ञा विश्वहिता सुबोधजननी संस्थापिताऽमानदा, धैर्य्यं शौर्य्यमथा-वलम्ब्य सुखदं प्रद्योतितं नो मुदे ॥ २२ ॥ धैर्य्यादेर्बलधारणं च विषयासक्तेन्द्रियाणां गणं, रुद्ध्वा योगतपोऽसिना च जगतो जन्यं महा-नर्थदम् । दुःखापायकरे तमोऽपहरणे ज्ञाने मनो दीयतां, स्याच्चित्तं

---

१ विगतं घातं यस्मात् । २ सूत्रस्य भावाः सौत्रा. ।

सकलेन्द्रियैः सह ततः शान्तं प्रयासं विना ॥ २३ ॥ पश्चाच्छान्तिगतं मनो न विषये लग्नं कदाचिद्भवेत्पूर्वाचार्य्यवरैः सुसंयमरतैरित्येवमुक्तं पुरा । साधूनां जगदन्तरायशमने मोक्षाप्तये साधनं, हित्वाऽशान्तिकरान् समस्तविषयांश्चेतो गिरौ स्थाप्यताम् ॥ २४ ॥ कामिन्याः कनकात्कषायविषयाद्ये साधवो बिभ्यति, जीवात्राणकरादसत्यवचनाद्दुर्ज्ञानकृष्णोरगात् । स्वाद्वन्नाशनतः परिग्रहरताच्चे भव्यभावाशया, लोके भव्यजनानवन्ति सततं सद्बोधतत्त्वामृतैः ॥ २५ ॥ तेजस्तस्य प्रकाशतां गतमदो भव्याशयानां हृदि, काण्ड भीषणवत्त्वमत्र गहन संस्थापितं संयमे । जैनाचार्य्यवरैः परस्परमथो संस्थाप्य चैक्य बल, संयुक्ताखिलशक्त्यमोघसहिता संघादिविद्युत्प्रभा ॥ २६ ॥ विद्युच्छक्तिरिवारविन्दहृदये प्रोद्भासिता येन नः, सङ्घे शक्तिमदोच्चयोऽतिकृपया जाता यतश्चैकता । तां विस्मृत्य च मोहमानममताक्रान्ता वय दुःखिनस्तामुद्भावयितुं मुहुर्यतिवरा यत्ने मनो धीयताम् ॥ २७ ॥ पूर्वाचार्यगणैः परस्परमदश्चैक्यं सुसंस्थापित, शक्त्यानन्तप्रवाहसङ्कृतडितः शक्तिः समुत्पादिता । वीरं शासनमेव निम्नपतित येनोद्धृतं शान्तित, एतावन्नहि किन्तु शासनवरं संवर्द्धितं न्यायतः ॥ २८ ॥ योगासक्तधियो जिनेन्द्रमृदुलाम्भोजांघ्रिसेवारता, मिथ्यात्वादिनिरस्तसर्वविषयाः कारुण्यवन्तो दयाम् । धृत्वा चेतसि वो निधाय च गुरोर्निर्द्वंद्वपादाम्बुजं, व्याख्यानाय निबन्धरूपममलं ह्याक्रन्दनाख्यं ब्रुवे ॥ २९ ॥ ॥ इति प्रस्तावना ॥ अद्याऽन्द्यमयेक्षते च महती हानिः समाजस्य च, भाग्यान्मन्दमयादुतावरयुगाद्यच्छासनाख्यं बलम् । क्षीणत्वं प्रतिपद्यतेऽनुदिवसं न ज्ञायते कारणं, द्वन्द्वारम्भविधौ च कष्टमधिकं संवर्धते हानिकृत् ॥ ३० ॥ ईर्षाकारणतो न कोऽपि कमपि ब्रूते न सम्मन्यते, दृष्ट्वेदं

मतभेदकारकमिदं चेतस्ततो धावति । विद्याऽपि ह्सते तथाप्यनयतो धर्मो विलुप्तो भवेन्न्यायान्यायविचारदुर्बलतरो जातोऽधुना बुध्यताम् ॥ ३१ ॥ जातोऽयं मतभेदभेदकवशादाचारभेदोऽपि च, संख्या त्रिशतितोऽपि जातमधिकं किं वर्णयामो वयम् । साम्प्रादायिकभेदवेशकरणादाचारभेदोऽपि च, ज्ञात्वैवं शमसाधनेऽनुदिवसं धर्म्मे प्रवृत्तिर्दमे ॥ ३२ ॥ दृष्ट्वेमं विषयं च कस्य न मनस्तोदं हितेच्छावतां, प्राप्नोत्यन्तमनन्तशासनवतां केषां मनस्तोकताम् । यात्याधीरतया च हेति सुमहच्छन्दः समुत्पद्यते, जाते सत्यपि साधुचेतसि पुनर्नोत्पद्यते भावना ॥ ३३ ॥ तद्दौर्बल्यमहत्तरं न कुरुते प्रत्येकमत्रान्तरे, सर्वेषां मनसा विचारकरणे नो भेदभावोऽधुना । वासं नो कुरुते परस्परमहो सम्मेलनं नैकतां, नान्येषां हितमीहते शुभधिया कश्चिन्नरः प्रेमतः; दृष्ट्वा चोन्नतकं पदं परजनस्यार्ता भवेयुर्जनाः ॥ ३४ ॥ केषां ज्ञानोपलब्धिर्न भवति सुतरां नास्ति शिक्षोपलब्धिस्त्यक्ता सेवापि नित्या निजमुनिचरणाम्भोजयोः साधुवर्य्यैः । सेवाधर्मापलापोऽजनि जनहृदयात्स्वप्नतुल्यो नराणां, क्रोधाविष्टैश्च छिन्नं प्रतिदिनमखिलं सभ्यमूलं विहिंस्रैः ॥ ३५ ॥ योऽन्येषां धर्मलोपे प्रबलबलमथो धारयित्वा प्रवृत्तः, प्राप्तुं शिक्षाविभागे प्रचुरसमबलं संविभर्तुं समर्थः । सोऽनर्थं स्फोटयित्वा रिपुदलगहनं दग्धुमग्निस्वरूपः, कार्यं तस्यापि नित्यं वितरति समये नाभिमानप्रयोगः ॥ ३६ ॥ सम्मेले विलयं गते च कियती सम्भावना दुर्दशा, जातोऽहं पतितो भवे च कियती चाघातसंवेदना । यक्ष्मा मे महती तृतीयजवनी क्रान्तातिदुःखादरा, हा किञ्चिन्नहि मेऽस्ति तद्विगणना कार्ये प्रसिद्धे सति ॥ ३७ ॥ मानक्रोधपरिग्रहोदयवशाद्धर्म्मक्षयो जायते, तत्क्षीणे जिनदेवशासनबले ह्रासः

समुत्पद्यते । तद्ध्रासे च कलङ्कितं जिनमतं निष्ठा ततो भावना, तस्माद्दोषसमुच्चयापनयने चित्तं समाधीयताम् ॥ ३८ ॥ अस्माकं यदि बोधमस्त्यवनतेर्मानापमानस्य च, पातस्यैव च वाऽवहेलनजनेर्जाता पराकाष्ठता । लब्धज्ञानबलेऽपि कुम्भश्रवसो निद्रालयाः शेरते, विद्युत्तेजसमग्निजं किमु पुनर्भानूदये तिष्ठति ॥ ३९ ॥ अत्याचारसमुद्भवे च निखिलं नष्टं च भव्यात्मनां, सर्वापारमयी क्रियापि विपुला नष्टा तथा भावना । शास्त्राणां पठनं प्रणष्टमधिकं जैनावतारे मुनौ, किं कर्तव्यमतः परं मुनिवराः सञ्चिन्तयध्वं हृदा ॥ ४० ॥ शिक्षार्थं बहुशो जनैर्विरचिताः पाठालयाः कालया, नो वा साधुगणैश्च विश्वविदितं संस्थापितं वा क्वचित् । विद्यापीठमनल्पकं यतिवरास्छात्राः पठेयुर्मुदा, ज्ञानाभ्यासकरा नयन्ति सकलं धर्मादिकं श्रेयसे ॥ ४१ ॥ धर्मे नाभिरुचिर्गुरौ न नियतिर्विद्याश्रमे नो मतिः, तत्सूत्रे पठनादरो न हि रतिः सङ्घे मुनीनां तथा । न्यायान्यायविचारणे न च गतिर्योगाश्रमे नादरः, श्रेयो नश्च कथं भवेदनुदिनं चेतः परं क्षुभ्यति ॥ ४२ ॥ मोहेनाधिकतृष्णया च महति सञ्जायते नः क्षतिः, वर्द्धन्ते ममतादयोऽहितकरा ज्ञानं ततः क्षीयते । तत्क्षीणे जिनधर्म्मशर्म्म विलयं यास्यत्यथो भावना, निष्ठा सूत्रसमुद्भवा सुरगुरौ लोके कथं स्यात्स्थितिः ॥ ४३ ॥ रागद्वेषविवर्धनेन च मनो न स्यात् स्थिरं चञ्चलं, तद्रोधानयनं विना न विषयाः शाम्यन्ति योगाश्रयाः । यावत्कर्म्मनिरोधनं न हि भवेत्तावत्कथं भावुकं, ज्ञात्वैवं परिहृत्य रागविषयं सांघं बलं सेव्यताम् ॥ ४४ ॥ गर्तेऽशान्तिमये वयं निपतिताः कश्चिवत्प्रबन्धो न हि, सर्वाधारजिनेश्वरोपकरणे नो विस्मृतिर्योग्यता । दत्तं तेन ततोऽखिलं च विषयं संलब्धवन्तो मुदा, तत्सर्वं कथमन्यथापहरणं कुर्वन्ति चान्ये नराः ॥ ४५ ॥ सामाजस्य सुरक्षणं

च भवतामाधीनतामागमदेवं चाभ्युदयोऽपि भिक्षुकवरा ज्ञात्वा द्वयो रक्षणम्। संयुक्तेष्टबलं विना न हि भवेत् तद्रक्षणं नालसात्, संयुक्ता-भ्युदयप्रतापजनना चैक्यादिकं प्राप्नुयात् ॥ ४६ ॥ पूर्वं देशमवेक्ष्यतां हि कियतीमत्युन्नतिं प्राप्तवान्, तद्देशेऽप्यधिवासिनो हि नितरां स्वार्थी-भिमाने रताः। तत्रैक्येन बलेन सज्जनजनाः कुर्वन्ति निष्कण्टकं, राज्यं छत्रधराश्च भोगनिरताश्चैकाधिपत्ये स्थिताः ॥ ४७ ॥ देशेऽस्मिन् दुरवस्थता प्रतिदिनं वृद्धिंगता पश्यत, अत्रत्या विषयोपभोगनिरता जाताः पराधीनताम्। ऐक्याभावपरा न संयमकरा नो दूरदर्शेप्सवो, रागेर्ष्याशयसंयुताश्च सुतरां विज्ञानशून्याशयाः ॥ ४८ ॥ दारिद्र्येण सुखेतरा जनपदा साहाय्यमाप्यान्यतः, दत्तं चान्यजनेन वस्त्रमनिशं सन्धार्य्यते दुःखतः। पश्यामोऽधमदुर्दशां च महतीं भुंज्मः पराधीनतां, बद्धाः श्रृंखलया वयं परवशाः स्वातन्त्र्यहीनास्तथा ॥ ४९ ॥ पूर्वस्था मनुजाः स्वतन्त्रनिरता राज्यं वहन्त्याहिताः, प्रत्यक्षात्मकमुख्यकेन नियताः सत्यप्रमाणेन च। ऐक्यं चाधिगताः स्वधर्मविलया विख्यात-सेवाः पराः, ज्ञात्वैवं समयादिकं न हि भवेत्त्याज्यं कदाचिन्नहि ॥५०॥ जाते वस्तुनि रोदनादिकरणं मिथ्यैव होच्चारणं, पश्चात्तापनिवेशने न हि पुनर्नेत्राश्रुपातं शुभम्। क्षुद्रारादिविकत्थनं किल मुधा सर्वं व्यलीकं त्यजेच्छ्रीमद्वीरजिनानुशासनवरं चोत्थाप्यतां श्रीध्वजः ॥ ५१ ॥ वीर-स्वाम्यनुशासनानुसरणं संघैक्यता सेवनं, सूत्रागाधमहोदधेश्च तरणं ज्ञानक्रियाराधनम्। काषायाद्यपवारणं जिनमुनौ सेवार्पणं प्रेमतः, सन्त्येतानि शुभार्थिनामनुदिनं श्रेयःकराण्यग्रतः ॥ ५२ ॥ मृत्युप्राय-गतस्य चैक्यसुबलस्योत्थापनं कार्यतां, यद्येकेन समाजकेन समये साम-र्थ्यभाजा न हि। धीरत्वेन च यत्नरत्नकरणे चेतः समाधीयतां दार्ढ्यं

निश्चयमाविधाय मनसः शुद्धिर्विधेया पुनः ॥ ५३ ॥ रागैश्चापि परिग्रहैरनुदिनं मुक्त्वा भवन्त्वादरात्, सर्वानिष्टकरैर्ममत्वबलिभिः सङ्गः परित्यज्यताम् । स्वश्लाघाकरणे ममत्वकरणे दोषो महाञ्जायते, सर्वस्माद्विषयान्मनोपहरणं श्रेयस्करं स्यात्ततः ॥ ५४ ॥ शास्त्रे वस्त्रे शिष्यवर्गे शरीरे, ग्रामे देशे श्रावके चान्यकार्ये । शोकं मोहं सम्परित्यज्य नैजं, स्वायत्तायां नैव ग्राह्यं कदाचित् ॥ ५५ ॥ बोधार्थं जनताहिताय सकलो ग्रन्थो मुदा ह्यर्प्यतां, न स्थाप्यो निकटे कदापि मनसो भारादयं नित्यशः । त्यज्यन्तां प्रियवस्तुनोऽपि नितरां नो कार्यतां सञ्चयो, नित्यैकं वसनं निधाय सुखदं स्वे जीवने रक्षणम् ॥ ५६ ॥ ग्राह्यं मृण्मयमेव भाजनमथो नोऽनल्पमूल्यात्मकं, चैकं चाम्बरमेव धारणवरं नान्यन्महर्घं क्वचित् । धार्यो नान्यपरिग्रहश्च शयनं भूमिस्थले शोभनं, नो वाच्यं परुषाक्षरं क्वचिदथो जातापमानैरपि ॥ ५७ ॥ नो भोक्तव्यमनुत्तमं रसरसैर्युक्तं सदन्नं क्वचित्, गार्हस्थ्यैर्मनुजैर्न सङ्गतिरदः कार्या शुभाकाङ्क्षिभिः । स्थातव्यं शुभशासनैः शमदमक्षान्त्यादिभिः संयुतैरेवं जैनमुनिं समुन्नतपदारूढं भवेन्नान्यथा ॥ ५८ ॥ स्वातन्त्र्यं समवाप्य चात्मनिहिता शक्तिः समाश्रीयतां, चारित्रं च निरीहता सरलता सत्यं निवासं वने । एवं संयमता क्षमत्वमनिशं सत्याग्रहत्वं तथा, इत्यादेर्बलमुद्विभाव्य सकलं स्वातन्त्र्यसञ्चिन्तनम् ॥ ५९ ॥ यत्रानन्तसुखं भवत्यनुदिनं तां पद्धतिं गच्छत, श्राद्धानां भवनं त्यजन्तु मुनयोऽरण्यं गुहां चेच्छत । स्थित्वा तत्र सुसंयमं प्रकुरुत नान्योऽस्ति पन्थाऽपरः, सर्वस्मिन् विषये भवन्तु निपुणाः पारंगताः स्युः पुनः ॥ ६० ॥ भगवद्वीरजिनस्य जन्मभवनं नित्यं भ्रमन्त्वाहिताः, शीताद्यन्वितदेशमार्गपथिको भूत्वा महावेदना । सोढव्या च 'महोष्णादेशज-

नितं चोष्णादिकं वा तथा, सेव्यं साधुजनस्य सङ्गमखिलं हेयं गृहिस्त्री-जने ॥ ६१ ॥ साध्वीस्त्रीगणसंगते न च पुनर्नो दर्शयेच्चाननं, संघस्योन्नतिके मनो मुहुरथो सन्दीयतां प्रेमतः । तच्चाप्युन्नतशेखरे स्थिरयितुं यत्नेन संस्थीयतां, सन्तो भिक्षुवराः समाजविषये सद्गौरवं धार्य्यताम् ॥ ६२ ॥ स्वच्छं जैनमतं तदुक्तविधिना स्याद्वादचित्तार्प्पणं, तत्सूत्रोक्तविमर्शतत्वमननं शश्वद्धिताऽऽधायकम् । कर्तव्य प्रतिवासरं सुमुनयो हित्वा कषायादिकं, शास्त्रेऽन्यत्रमते (परसमये) सुबोधकरणे कल्पन्तु सद्बुद्धिभिः ॥ ६३ ॥ शास्त्रोद्धारकृतेऽनुरक्तमनसः प्रत्यन्तदेशंप्रति, मा गन्तव्यमसत्कराँश्च विषयान्नो चिन्तयध्वं हृदि । सच्चित्रैर्विलसद्गृहं तु धनिनां हेयं सदा दूरतो, दध्याज्येन समन्वितं च पयसा त्याज्यं सदन्नाशनम् ॥ ६४ ॥ शीतोष्णादिकजन्यतापसहनं मौनं मिताभाषणं, येन स्याज्जनतोपकारसुखदं वाक्यं च धार्यं हृदि । गन्तव्यं गहनं गिरौ न पिहितं सत्कन्दरामन्दिरं, भोक्तव्यं विरसादिकं च ह्यशनं धृत्वा प्रशान्ति मुदा ॥ ६५ ॥ योगाभ्यासपरायणो गुरुपदाम्भोजार्चनासक्तधीः, सूत्राभ्यासरतो दमादिसहितः सद्भावनासंयुतः । ध्वस्ताशेषकषायको जितमहाषड्वर्गशत्रुर्गुरुः, सद्भक्त्या परिपूर्णशान्तहृदयो योगाश्रमे दत्तधीः ॥६६॥ नो वै वेषविधानमात्रकरणाच्छिष्यो भवेत्कर्हिचिच्छान्तं धर्मरतं गुणान्वितजनं संशिक्षयेद्दीक्षया । नानाशास्त्रविचारणोत्सुकमनास्त्यक्तैषणो दुःखहृत्, एतादृग्गुणवत्तरो ह्यतिप्रियः शिष्योवधेयो मुहुः ॥ ६७ ॥ हे भिक्षुप्रवरा मयाऽद्य समये सन्दृश्यते संस्थितिः, ये केचिद् गृहिणो गृहादिरहिताश्चायान्ति नष्टे धने । दुःखार्ताश्च बुभुक्षवो हि भवतामारात् पिपासाकुला, नो कृत्वा च परीक्षणं पुनरथो दीक्षां ददत्यादरात् ॥ ६८ ॥ तेभ्योऽयोग्यतरेभ्य दीक्षणमहो सन्दीयते वा हठा-

द्दीक्षामात्रविधानकेन नियता मन्त्रं प्रदत्वा मुदा । किञ्चिद्भाषणयुक्तिशक्तिसहिता भाषात्मिका दीयते, दशवैकालिकनन्दिसूत्रविषय उत्तीर्णता चेद्भवेत् ॥ ६९ ॥ नो वैराग्यरतो विचारकरणेऽदक्षो न विद्यान्वितः, क्षिप्रं श्राद्धजनाय मोहकरणेऽविद्यावशः सत्कथाम् । नो वा जैनमतानुसारचलनो भक्त्या विरक्त्या युतः, (नैवं शिष्यगणोऽतिदीक्षणपरो नो भावशुद्धौ रतिः) अन्येभ्यो हठवञ्चनाय नितरां शिष्योऽप्यनिष्टः स्मृतः ॥ ७० ॥ न्यायप्राकृतजन्यकाव्यविषयं सच्छाब्दिकं वा पुनर्दद्याज्ज्ञानमनन्तरं सुमुनये शिष्याय दीक्षामपि । येन स्यात्समितौ सुयोग्यगणना लब्धप्रतिष्ठो भवेन्नो चेत्कर्मविगर्हितं च भवतां निन्दालयो जायते ॥ ७१ ॥ दृष्ट्वेमां घटनां बुधो हृदि महत्कष्टं मनस्तोददं, हास्यं वा विदधाति रोदनमथो वाह्यार्थमेषो जनः । हीनं योग्यतया जनो न मनुते सत्कारमातन्यते, जन्मान्धस्य दिवाकरः प्रकथनं नामात्यनर्थप्रदम् ॥ ७२ ॥ ज्ञानं नैव विभाति यस्य हृदयेऽज्ञानान्धकारापहं, नो शिक्षा विशदा सतां न मुखरो भूत्वाऽन्यथा वञ्चनम् । लोकान् वञ्चयितुं करोति विविधां धृत्वा मुखे वस्त्रिकां, जैनानां मतदूषणं प्रकुरुते न स्थापनीयो जनः ॥ ७३ ॥ साङ्गोपाङ्गतया च सूत्रविषये स्याद्वादज्ञाने तथा, छन्दःशास्त्रसमन्विते‌ऽन्यविषये ज्ञानं प्रदायाथवा । साधुभ्यश्च परीक्षणं सुनियतं सस्कारयित्वा पुनः, पश्चाद्वीरपदानुसारवशतो दीक्षा प्रदेयाऽन्यथा ॥ ७४ ॥ व्याख्यानप्रतिभाप्रबन्धरचना शिक्षाप्रणाली ततो, धर्माख्यानपरं च भाषणमयी सद्भावना जायते । ज्ञानं न्यायकरं समस्तजनताकल्याणकृद्भाव्यत, एवं रीतिमुपाश्रयेद्यदि मुनिर्धर्मप्रवाहोदयः ॥ ७५ ॥ अर्हद्वीरनिमिचधर्मसरणीमाश्रित्य देशान्तरं, भ्रान्त्वा विश्वहिताय धर्मतः

रणीं हिंसाद्यभावात्मिकाम् । दत्वाऽनेकविवादवादनपरं निर्धूय बोधाश्रये, तिष्ठेताखिलक्लेशनाशनपरा ज्ञाने परे निष्ठया ॥ ७६ ॥ देशैकं च वयं सुसंयमरताः संसेवयामो मुदा, ताम्राचूडमयाण्डवत्प्रतिदिनं संसारस्वाद्भन्नकम् । भूत्वा च भ्रमणं तु निष्फलमहो कुर्म्मो विरामः सदा, तेषां चर्णपरा मतानुकरणे जाताः प्रवृत्ता रहः ॥ ७७ ॥ चित्तं देह्यवलोक्यतां च गृहिणो विश्वासमासाद्य च, युष्माकं मनसा धिया च सुतरां तिष्ठन्ति सेवाश्रये । ध्यात्वैवं च तथाविधाँञ्जनपदाँश्चोत्थापयध्वं ध्रुवं, नोचेन्निम्नतलं पतन्ति बहुधा कृच्छ्रात्पदादुन्नतेः ॥ ७८ ॥ भारत्या भवने च पुस्तकचयं संस्थाप्य साधूत्तमास्तद्रक्षाकरणे प्रयत्नशतकं शश्वद्विधेयं तथा । वस्त्राभूषणयोर्यथेतरजनाः कुर्वन्ति सद्रक्षणं, सूत्राणां चयनं सदा च मुनिभिः कर्तव्यमत्रालये ॥ ७९ ॥ अर्हद्वीरसुधर्म्मरोधकरणं यत्पुस्तकं वर्तते, नो तद्ग्राह्यमसत्करं च मुनिना स्वश्रेयसे सर्वदा । यत्र स्त्रीरतिवर्णनादिविषयं तद्दूरतस्त्यज्यतां, स्याद्वादादिकशास्त्रमेव हितकृत् ग्राह्यं शुभाकाङ्क्षिभिः ॥ ८० ॥ येन ज्ञानविवर्धनं च भवतां सञ्जायते मोदतस्तद्योग्यं च हिताय वोऽनुदिवसं ग्राह्यं बुधैः सत्यतः । द्यूतादेरनुवर्णनं च कथनं भावोऽस्ति यत्रापि वा, हिंसाभावपरिग्रहप्रकथनं हेयं सदा साधुभिः ॥ ८१ ॥ तच्चानर्थकरं सुसंयमहरं शान्त्यादिविक्षेपदं, न ग्राह्यं मनसेदृशं च यतिभिर्योगे च विघ्नप्रदम् । येनाध्यापनधर्म्मशर्म्मविलसत्सद्बोधसूर्योदयस्तद् ग्राह्यं च बलादपि प्रयततां योगार्थिनां श्रेयसे ॥ ८२ ॥ युष्माकं परिपाटिकेयमवरा यच्छास्त्रसूत्रादिके, मोहादिप्रबलायतेऽधिकतरं दृष्ट्वा जनैर्हस्यते । नेत्रादश्रुनिपातनं च नितरां कुर्वन्ति हे भिक्षवः ? पात्रे वाऽप्यथवाम्बरे च ममता सन्दृश्यतेऽन्यैर्जनैस्तस्मादप्यधिकं पटा-

दिविषये मोहं समुज्जृम्भते ॥ ८३ ॥ तर्कि हीनं हि ज्ञायते भगवतां दीक्षार्थिनां लोकतो, लोकानां च धनार्जनं परजनश्रेयस्करं ज्ञायताम् । युष्माकं परिरक्षितं गतपटं न श्रेयसे पुस्तकं, ज्ञात्वैवं ममतां जहत्व-नुदिनं भव्यं भवेद्येन च ॥ ८४ ॥ विद्याऽध्यापनकार्यलुप्तमधिकं तत्रापि पाठ्यक्रमो, हा वो हानिकरी विभाति कियती सख्या विरामस्य च । नोऽवस्था सुव्रतग्रहस्य नियता नो वा व्रतादेस्तथा, न स्वस्यापि गुरो-र्विचारमननं कुर्वन्ति काऽन्यत्कथा ॥ ८५ ॥ यच्छास्त्राणि च पुस्त-कानि पठने चोपक्रमात्पाठने, तानीर्षाममतावशाद्बहिर्गृहे ग्रंथिं विधा-याग्रतः । नष्टप्रायगतानि विश्वजलधौ नोद्घाटयन्त्यालसात्, शिष्येण प्रतिवासरं च गुरवोऽन्योन्यं प्रयुध्यन्त्यतः ॥ ८६ ॥ वैरं भावगताः परस्परमहो प्रेमोच्चकाधःपतन्, लोकान्तानि निजानि संकलुषयन् यान्त्या विनायासतः । ज्ञात्वेमां च दशां मदीयमनसि स्याद्दुःखसङ्गं पुनर्जैनाचारसुशास्त्रतत्वमननात्स्वाध्यायवृद्धिर्भवेत् ॥ ८७ ॥ नीतिन्या-यप्रमाणतत्वनिखिलात् सर्वं विरुद्धं मतं, कोऽपि प्रीतिपुरःसरं न कुरुते कर्माखिलं सज्जनः । तेनाधःपतनं मतादिविहितं धर्म्माच्च यायान्मुहु-स्तेनाऽहं च करोमि चिन्तनमहो धर्मस्य वृद्धिः कथम् ॥ ८८ ॥ शवालयगतौ यद्वत्सारमेयौ परस्परम् । युध्यन्तः साधवस्तद्वत्, युध्यन्ति प्रीतिमन्तरा ॥ ८९ ॥ अतोऽस्माकं च साधुत्वं, गत नास्त्यत्र भावना । दुर्दशा कीदृशी जाता, स्वधर्मो निधन गतः ॥ ८९ ॥ येनास्माकं वर्धते ज्ञानशक्तिर्यस्याधारान्नीतितत्वावबोधः । स्वाध्यायस्या-मूल्यरत्नं वदन्ति, शान्तिर्दान्तिर्ज्ञानरूपे परेशे ॥ ९० ॥ तच्चेदानीं नाशभावं प्रयाति, नो वा शुद्धिः संयमादेश्च प्राप्तिः । तद्द्वारा वा नैव बोधो न भावस्तस्माच्छास्त्रं साधवोऽप्यात्मपार्श्वे ॥ ९१ ॥ तद्वद्ग्रन्थाँल्लो-

ककल्याणहेतोर्लोके धर्म्मप्राप्तये वै वहन्तु । येन स्यान्नो रक्षणं संयमादेर्न स्याद्धानिः कार्यसिद्धौ मुनीशाः ॥ ९२ ॥ तस्मात्सर्वान् भारतीगेहमध्ये, सन्तो ग्रन्थान् स्थापयन्तु प्रयत्नात् । येन स्याद्वै सर्वलोकोपकारो, ज्ञात्वैवं वै नो विलम्बं हि कार्यम् ॥ ९३ ॥ शुद्धस्फाटिकवत्सरोजहृदयो विद्याकलावारिधिर्भाव्यस्तापत्रयापहो गुणनिधिः शिष्येष्टकामप्रदः । यद्येतादृशभावधारणकरः स्याच्चेद्गुरुः क्षिप्रतः, शिष्यारिष्टनिनाशनं च भवतान्नास्त्यत्र सन्देहकः ॥ ९४ ॥ एवं भिक्षुवराश्च शिष्यरचने क्लेशप्रदा वः प्रथा, यः कश्चिद्भवति प्रदीक्षणपरः स्यात्तस्य दीक्षेच्छया । कायात्पारदवद्बहिःप्रसरते वार्ता स्फुटान्नित्यशः, श्रुत्वाऽनेकवरिष्ठसाधुचतुराः स्वास्यात्क्षरन्त्यम्बु च ॥ ९५ ॥ यत्नेनायमतद्विदो यदि भवेन्मे स्याद्वरः शिष्यकस्तस्यापि प्रभवेत्सुजीवनवरं लोके च धन्यो जनः । अन्ते सिद्धिकृतेऽन्तरस्थघटको दुर्वासनां वर्द्धयेत्, नाशार्थं समये सुसंयमयमान्नित्यं यतन्ते मुहुः ॥ ९६ ॥ संग्रहः पुस्तकानां यो, दोषो वर्वर्ति तद्विदाम् । शिष्याणां करणे तद्वन्महान् दोषो हि जायते ॥ ९७ ॥ मातापित्रोर्विनाशं च, व्ययं दीक्षोत्सवे वहु । अपव्ययमपि कर्तुं, प्रेरयन्ति मुहुर्मुहुः ॥ ९८ ॥ भिक्षवः शिष्यतृष्णातो, नश्यन्ति धर्मकर्मतः । स्वगौरवं व्रतं चापि, नाशयन्ति मुधा स्वतः ॥ ९९ ॥ रोगस्यास्येयमस्तीह, शान्तिः श्रीस्वामिनो वरा । महावीरस्य संघस्य, सेवा सर्वार्थसाधिनी ॥ १०० ॥ सम्प्रदायानुरोधेन, संयमादेश्च सेवनम् । गच्छवादं गुरोर्वादं, शिष्यवादं विवर्जयेत् ॥ १०१ ॥ भारतस्याखिलस्यैकमुख्याचार्य्यो भवेद्ध्रुवम् । भूत्वा तस्यैव शिष्यास्तु, तदाज्ञां पालयन्तु च ॥ १०२ ॥ यः कश्चिद्दीक्षणं,

१ सार्वजनिकपुस्तकालये ।

प्राप्तुं, समीहेत मुदान्वितः । स्वदेशे संयमं दीक्षां, निर्वेदेन च धारयेत् ॥ १०३ ॥ तदा व्यवस्था सन्मार्गं, गत्वोन्नतपदं ततः । गच्छेच्च शिवसम्प्राप्तिः, सर्वेषां नो भविष्यति ॥ १०४ ॥ सङ्घे चैकः स्थापनीयो गणेशः, सर्वानर्थान् वेदितुं यः समर्थः । येन स्यान्नः सम्प्रदायानुरोधाद्धर्म्मे वृद्धिश्चिन्त्यतां भिक्षुवर्य्यैः ॥ १०५ ॥ कश्चित्समाजस्य महत्पदास्पदं, बिभर्तुमिच्छेत् किल तस्य वागुराम् । कर्तुं करे स्वस्य सदेषणास्ति वा, प्रगृह्यतां चेद्दूरिवर्ति शक्तिः ॥ १०६ ॥ कश्चित्स्वयं सर्वसमाजकार्यकर्ता तथा धारयिता बुभूषुः । तथा व्यवस्थापि समाजशक्तौ, स्वशक्तिमास्थापयितुं प्रवृत्तः ॥ १०७ ॥ कस्यापि चेच्छास्ति समाजनेता, सदा भवेयं च सुशासकोऽपि । एतद्धितेच्छा च प्रवर्धतेऽनिशं, सर्वस्वमेवास्तु मयि प्रपन्ने, ॥ १०८ ॥ यदीदृशीच्छा परिवर्तते तदा, समाजलोपोऽपि भवेद्धि शीघ्रम् । इत्थं समाजस्य च दुर्दशा भवेद्विचिन्त्यतां जैनमुनिप्रवीणैः ॥ १०९ ॥ कृच्छ्रादास्पदोन्नताद्धि पतनं निम्नं समाजस्य च, एवं गौरवनाशतां परिव्रजेत् सर्वे भवेयुस्त्वरम् । दुःखार्ता जिनदेवभक्तिनिरता धर्मोऽपि नाशं व्रजेत्, ज्ञात्वैवं जिनशासनोऽनुदिवसं तद्रक्षणे स्थीयताम् ॥ ११० ॥ रोगोऽनेन समाजभोगविषये वृद्धिंगतो नित्यशः, साधूनामहमात्मिकाविकृतितो नष्टाऽधुना सभ्यता । सर्वेषां हि महत्वतत्त्वविषये जातैषणा सर्वतो, मानं चातपधावने निपतितं मिथ्यापलापो मिथः ॥ १११ ॥ भिक्षूणामभिमानभावमधिकं काषायसंसेविनामेतस्यापणमार्गभागविषये जातं महर्घं ध्रुवम् । योग्यायोग्यविचारणापि विलयं याता समाजस्य किं, तेनैवास्ति समाजकोऽपि नितरां पिष्टस्ततो घुणवत् ॥ ११२ ॥

१ सङ्घस्य प्रधानाचार्यः ।

दुःखाद्रोगमयाद्भवन्तु मुनयश्चैतन्यभावाः पुरः, सर्वेऽन्योन्यगताश्च स्वीय सुकृतावेकं गुरुं कुर्वताम् । स्वादर्शं सकलागमैश्च हितकृत् सम्मान्यतां प्रेमतो, निश्चिन्तां मनसा सुजैनमुनयो हीमां व्यवस्थां गताः ॥११३॥ यो दीक्षास्थविरोऽथवा श्रुतवरो यः सच्चरित्रे रतो, यो वा योगकरो समाधिनिरतस्तं सेवयन्त्वादरात् । भक्तिं तत्र वहन्तु जैनमुनयः प्रेम्णा तथाऽन्यैर्जैनैः, प्रेमोत्पन्नमयैः सुधारसमथो कुर्वन्तु सद्भावनाम् ॥११४॥

॥ इति ममाक्रन्दनकाव्यस्य पूर्वार्द्धं समाप्तम् ॥

---

## ममाक्रन्दनकाव्यस्योत्तरार्द्धम् ।

नत्वा *जिनेन्द्रमवलम्ब्य च तत्पदाब्जं, संसारशापत्रयतापहरं वरेण्यम् । श्राद्धोदयाय मुनिधर्मविवर्द्धनाय, भक्त्या करोमि सरलं च निबन्धमेनम् ॥ १ ॥ अये ! साधो ! दैवाद्धृतनरशरीरश्च सुभगं, महावीरं सेव्याम्बुजचरणमाधिप्रशमनम् । भवाम्भोधौ पोतं विषयमृगतृष्णापहरणं, भजन्ते नो कस्मादरिदलसुकक्षानलसमम् ॥ २ ॥ भिक्षार्थिनो मुनिवराः समयेऽद्य शश्वद्धर्म्मोपदेशकरणे न च वृत्तपत्रैः । तन्वन्ति लेखकरणाज्जिनपुस्तकानां, श्रीवर्धमानकरुणाकरशुभ्रकीर्तिम् ॥ ३ ॥ समाजसंघं परिपक्वतां दशां, नयन्ति तेषामुपकारवृत्तयः । सुमाननीयाः शुभकृत्यशक्तयस्तथैव चानुकृतिरद्य कार्या ॥ ४ ॥ तत्संघसम्मेलनसुप्रचारे, सहायता चापि मुदैव देया । तत्सम्प्रचारे निरतैस्तपस्विभिर्हेयोऽभिमानादिपरिग्रहश्च ॥ ५ ॥ तत्संघसेवामनिशं विदध्युर्दासत्वमादाय वदेयुरेवम् । मानापमाने न च तापहर्षौ, कुर्वन्तु जैनाश्रमवासिनश्च ॥ ६ ॥ नेच्छेयुरन्यत्र पदं प्रगल्भं, नो मानपत्रेऽ-

---

* रागाद्यरीन् यो जयति स जिन 'इण्षिञ्जिदीङुष्यविभ्यो नक्' इत्युणादेः ।

भिरुचिं विदध्युः । लोकान्तरप्राप्तिनिमित्तभूतसज्ज्ञानकर्मादिकरा भवन्तु ॥ ७ ॥ अत्रान्तरे मानबलं त्यजेयुः, सत्साधुसेवा नितरां विशेषा । सत्वात्मिकां वृत्तिमनूपसृत्य, मनश्च स्वाध्यायबले नियुज्य ॥८॥ स्वजीवनेनाद्यसमाजसेवा, रश्मिं गृहित्वा परिरक्षणीया । निश्चित्य चित्तेन समाजवृन्दे, साहाय्यदानं करणीयमाशु ॥ ९ ॥ **अथाभ्याख्यानप्रहरणम्** ॥ सन्दृश्यते भिक्षुवरा[१] मयाद्य, किञ्चिद्विकारान्वितसाधुभावाः । तेषां च जाते परिवर्तनादिकं, कुत्सान्वितं तेन विचारणीयम् ॥ १० ॥ दुष्टस्वभावान् कथयन्ति चान्यान्, कुर्वन्ति स्वस्यैव प्रशसनं च । विद्वत्सु दोष परिभावयन्ति, गुणं पिधायाथ गुणं स्वकीयम् ॥ ११ ॥ प्रकाशयन्ते च स्वकीयदोष, पिधाय ते संयमिनः वरिष्ठाः । निन्दन्ति ते दुष्कृतिनोऽभिमानात्समाजभाजः प्रवदन्त्यसिद्धान् ॥ १२ ॥ यदापहर्तुं वरिवर्ति शक्तिस्तदेतरस्थान् गुणदिव्यसंघान् । आच्छिद्य सिद्धप्रवरा भवेम, इति प्रजल्पन्ति विचारशून्याः ॥ १३ ॥ मदीयेऽत्र काये यदि शक्तिरुग्रा, जगन्मात्रजातान् गुणानाविच्छिद्य । स्वकीये तनौ स्थापयित्वा वरिष्ठो, भवेयं तदा सर्वतो माननीयः ॥ १४ ॥ परन्त्वस्ति भव्यं न चेदृग् वलं वा, न विज्ञानशक्तिर्विधातुं कुतः स्यात् । परेषां च निन्दाभिधानं मुखेन, परं मन्यते शाकपत्रादिकल्पम् ॥ १५ ॥ अयेऽन्यत्र निन्दे ! न लब्ध पद ते; विहाय स्थलं साधुसंघे प्रवेशः । कृतस्ते न जाने सदा दूरतस्त्वां; त्यजेयुर्जना मानवन्तो मनस्तः ॥ १६ ॥ अये पापिनि त्वत्कृते धर्मनाशे, भवेन्निम्नपातश्च नो धारयत्वम् । अतस्तैर्मुखं नीलवर्णं च नाशः, समाजाद्बहिस्त्वं गता चेद्वरेण्यम् ॥ १७ ॥ अयेऽनिष्टभावे ! पिशाचस्वभावे ! मुनीनां समाजात्त्वमन्यत्र गच्छ । न भव्यं भवेत्तत्र संमे-

लने च, सुजाते सुरम्ये कुतस्तेऽत्र वासः ॥ १८ ॥ सदा सर्यतामद्य ते न प्रवेशो, वय वञ्चिता ज्ञानिनोऽजातसंगाः । मुखं पश्यतेऽग्रे च संमेलनं नो, भविष्यत्यनायासतश्चाजमेरे ॥ १९ ॥ न याचेऽतिरिक्तं समाजान्मुनीनां, मनो मे प्रसक्तं समाजप्रसङ्गे । अतो धारणीयं मन-स्तस्य सिद्धौ, यतो नो भवेद्धर्म्मलाभो मुनीशाः ॥ २० ॥ वयं चाद्य (सं) भोगान्मुदोद्धाटयिष्यामहे द्वादशाख्यान् सदा प्रेमभावात् । अरण्ये निवासाय यत्नं विधाय, तनावेकवस्त्रं मुहुर्धारणीयम् ॥ २१ ॥ मृदा निर्मितं पात्रमेकं सदैव, ध्रुवं धारणीयं गृहस्थैः समं नो । कदाचिद्वि-धेयाऽशुभा सङ्गतिश्च, दलं प्रेषणं वर्जनीयं तथैव ॥ २२ ॥ सुखावा-सिहेतोश्च कर्तव्यमेवं, मिताहारमेकत्र काले वरीयः । मिलित्वा च सांवत्सरं पर्वचैकं, वयं चाखिलाः साधवो यत्नतश्च ॥ २३ ॥ सदाऽऽ-चार्यवर्य्योऽखिलानां मुनीनां, बुधैको भवेच्छिष्यशिक्षाप्रदायी । त्यजे-युर्विचारे च यं भेदवादं, करिष्यामहे ज्ञानविज्ञानवादम् ॥ २४ ॥ अहो ज्ञानरूपेऽथ गङ्गाप्रवाहे, सदुत्साहशक्तिं च कुर्मोऽतिहर्षात् । समाजेऽत्र सर्वे मिलित्वा त्वदीयं, बहिष्कारमेवं करिष्यामहे च ॥ २५॥ यदा ते भवेन्मूलभग्नोऽद्य निन्दे! कथं त्वं समाजे च तिष्ठेर्वदेर्नः । यदा ते च्युतिस्स्वाधिकाराद्भवेच्चेत्, तदा ते क्व यानं भवेद्ब्रूहि क्षिप्रम् ॥ २६ ॥ सुसम्मेलनस्य प्रसगे बलेन, बहिष्कारभावो न जातः कदाचित् । स्मर ! त्वं मुखं नावलोके त्वदीयं, स्वकीयं तथा नैव सन्द-र्शयामि ॥ २७ ॥ तथा नैव केनापि साकं वदामि, तदा मौनमाधाय तिष्ठामि शश्वद् । गतं वैमनस्यं शरीराच्च मेऽद्य, त्वयि निन्दनीये गते जैनसंघात् ॥ २८ ॥ यदा द्रोहबुद्धिस्तदा ते निवासोऽन्यथा त्वं प्रया हीति संघान्मुनीनाम् । जगद्वंचितुं नो वितिष्ठस्व निन्दे ! निव-

र्तस्व तूर्णं वने पर्वते वा ॥ २९ ॥ इतः पेषणं ते करिष्यन्ति लोका, अतोऽन्यत्र गन्तव्यमेवं विचार्य । न वा मद्रमत्राधिवासे बलिष्ठे, जगत्ते करिष्यत्यहोऽनादरं हि ॥ ३० ॥ "भवद्भिर्मुखात्स्वाच्च त्याज्या वरिष्ठैस्तपस्याबलं संयमादेर्बलं च । तथा संघसेवा "बलं चात्मनोऽपि, भवेन्नष्टमेवं हि सर्वस्वनाशः ॥ ३१ ॥ मया निश्चयं दीयतेऽद्य भवद्भिः, परित्यज्य निन्दां सकर्तव्यतां हि । तथेर्ष्याभयं क्रोधमात्सर्य्यमेवं, समाहृत्य धर्म्मं चरेयुर्विरक्तिम् ॥ ३२ ॥ [अथाऽपलापविषये] यदा कश्चिदायाति पार्श्वे स्वकीये, तमुत्थाप्य हस्तेन चोर्द्ध्वं (हर्म्ये) नयन्ति । तथैकान्तगेहे च तेनैव वार्ताऽपलापं प्रकुर्वन्ति मोदैः प्रमोदैः ॥ ३३ ॥ विनाज्ञानसम्पन्नमेकं स्वशिष्यं, विधायाथवा द्वारपालं स्वकीयम् । विनोदेन कुर्वन्ति कार्य्यं विगर्हमहो वर्तते कीदृशी साधुवृत्तिः ॥३४॥ मुखे चानने चक्षुषा चक्षुरेवं, तथा कर्णके कर्णवृत्तिं निधाय । करोत्याहितः किञ्चिदात्मानुकूलामनिष्टप्रदां सर्वनाशाय वार्ताम् ॥ ३५ ॥ निन्दा यस्य मुखेऽस्ति तापसजनाः सत्कर्म्मतो धर्म्मतो, भ्रश्यत्यत्र च तस्य नश्यति तपो ज्ञानं पुनः संयमः । तस्मात्तां परिहृत्य सयमपरैश्चित्तं समाजे मुहुः । संस्थाप्योत्तमकर्म्मसेवनपरैर्जैने मते दीयताम् ॥ ३६ ॥ यदैकस्मिन् स्थाने निवसति मुनिस्तत्र न परान् । समाजस्थान् साधून् न हि हितकरानाहितधियः ॥ निवासार्हान् रागान्निजनिकटतो दूरयति च । तथा वार्तालापं तैः सह हृदा नैव कुरुते ॥ ३७ ॥ समानीतं तैश्च मधुरजलमन्नं न मनुते । न वाऽऽतिथ्यं तेषां न च किमपि सत्कारकरणम् ॥ परं चैवं ज्ञात्वा परमतरताञ्छून्यहृदयः । अहं वै पश्यामि व्रतमपि च तेषां मतिहरन् ॥ ३८ ॥ यथा श्वाऽन्यश्वानं परमनिजकोपेन निकटं ।

ममायं भक्ष्यांशं किमपि न हि चात्तुं प्रभवतु ॥ विचार्येत्थं शब्दैर्विकलमनसा दूरयति च । मुनीनां संघेऽयं भवति कलहो द्वेषमनसा ॥ ३९ ॥ प्रसन्नोऽयं दृष्ट्वा नहि भवति कश्चिन्मुनिवरस्तथाऽन्योन्यं द्वेषं विषममतिनोत्पाद्य कुरुते ॥ पशव्येयं नीतिर्न हि न हि न जाने कथमगात् । इतः श्रेष्ठश्छागः कपिरपि कपोताश्च सुधियः ॥ ४० ॥ मिलित्वेमेऽन्योन्यं समयमनसा रक्षणमहो । सदा कुर्वन्त्यन्ये विषयसुखभोगेऽपि नितराम् ॥ सहाया जायन्ते इति मनसि निश्चित्य भवतो, (परं द्वेषा युक्ताः सुखदगुणवन्तो मुनिजनाः) विलुम्पन्त्या शक्त्या विषयगुणभोगैकनिपुणाः ॥४१॥ [अथ शान्तिकराष्टकम्] न वा साधुवृत्तिर्न वा कोपशान्तिर्न वा संयमादौ प्रवृत्तिर्मुनीनाम् । न हि ज्ञानसिद्धिर्न विज्ञानवृद्धिः, कथं जैनसंघे निवृत्तिर्जनानाम् ॥ ४२ ॥ गता संघभक्तिर्गतश्चित्तरोधो, गतं चात्मतत्वं गतं शुक्लध्यानम् । इदानींतनानां मुनीनां प्रवृत्तिः, सुखे शायके चाशने शिष्यवर्गे ॥ ४३ ॥ गताऽऽध्यात्मविद्या गताऽऽनन्दवृत्तिर्गता भावभक्तिर्गता संघचिंता । गता भिक्षुसेवा गता धर्मवृद्धिर्गता शान्तचर्य्या निवृत्तिः शुभा न ॥४४॥ गतं ज्ञानगम्यं परं धैर्य्यरूपं, यतो नस्ततोऽतो भवेद्धर्म्महानिः । कथं स्याद्भवाम्भोधिपारं मुनीशा, विना सत्क्रियां चिन्तयध्वं मनस्तः ॥४५॥ सदा शिष्यलोभाश्रये नः प्रवृत्तिर्न वा चिन्तनं कोविदानां च सङ्गे । अनेकान्तसिद्धान्तस्वाध्यायहीना, मनोरोधने नो गतिर्वा कथं स्यात् ॥४६॥ गता जैनसंघाद्दया साधुभावाद्गतो न्यायसिद्धान्तजन्यो विचारः । सुसम्यक्त्वमानन्दकन्दालयं नो, धृतं नैव चित्ते कदाचिन्मुनीन्द्रैः ॥ ४७ ॥ अस्वाध्यायतोऽज्ञानवृद्धिप्रसङ्गाद्गतं ध्येयरूपं सुसम्यक्त्वतत्वम् । सदा चिन्त्यते केन भव्यं भवेर्नस्तथा सेवनीयं सदा संघ-

साम्यम् ॥ ४८ ॥ न वाऽरण्यवासो न वा त्यागशक्तिर्न वा चावनं धर्मतत्वस्य शश्वत् । वेरीवर्ति चिन्तोदरार्थं सदैव, अतोऽहं तपाम्यात्तभावं यतीशाः! ॥ ४९ ॥ भजन्त्वाहिता देवदेवं जिनेशं, यतो जायते दुःखमूलस्य भंगः । तथा संवृतौ प्रेमभावो निवृत्तिर्भवांभोधितो ज्ञायतां साधुवृन्दैः ॥ ५० ॥ गता मोक्षप्राप्तिर्गता लब्धिशक्तिर्गता रे गता रे जिनेशस्य भक्तिः । मुनीनामिदानींतनानां प्रवृत्तिः, सुखे शायके चाशने शिष्यलोमे ॥ ५१ ॥ गतं वस्तपो योगचर्य्यापि नास्ति, गतो ध्यानस्वाध्याययोगोऽपि दूरम् । गतः सूत्रपाठो गतं न्यायसूत्रं, न स्याद्वादवादे रुचिर्वा कदाचित् ॥ ५२ ॥ गतोऽध्यात्मवादोऽल्पितो जैनसंघो, गतं रे! गत रे! गतं प्राकृतत्वम् । इदानींतनानां मुनीनां प्रवृत्तिः, सुखे शायके चाशने शिष्यलोमे ॥ ५३ ॥ [ **अथापायनिवृत्तेरुपायः** ] रे चित्त! चिन्तय जिनाम्बुजपादरेणुं, पारं गमिष्यसि सुखेन यतो भवाब्धेः । शिष्यादयोऽन्यजनता न हि ते सहायाः, सर्वं विलोकय मुने? मृगतृष्णिकाभम् ॥ ५४ ॥ संसारसागरमगाधमगम्यपारं, श्रीमज्जिनेन्द्रचरणाम्बुजश्रद्धया वा । उल्लङ्घयिष्यति सुखेन च ते प्रयासस्तस्मात्कुरुष्व मुनिभक्तिमघौघहर्त्रीम् ॥ ५५ ॥ सुखे दुःखे किञ्चिन्न भवति समाजान्तरमुनेः, सहायो रागान्धो निजहठधरो द्वेषनिरतः । तथा विद्याभ्यासं प्रतिपदवमन् द्वेषमनिशं, घृणां तद्वल्लोके निजमतिविरोधेन तनुते ॥ ५६ ॥ जना उच्चैर्हासं विदधति घृणापात्रमिति वो, न वा संघप्रीतिर्न च सहनिवासं प्रकुरुते । अतो मोहस्पर्द्धैर्निखिलमतके नैव भवतां, सुजातं बन्धत्वं दृढतरसुरज्वा मुनिवराः ॥ ५७ ॥ यदा वृद्धिर्मोहावृतिरपि कथं शान्तिरधुना, न वा जाताशा नः पुनरपि सहावासकरणे । निवृत्ते-

मोहस्य कथमखिललोकानुसरणे, विचार्य्यैवं सन्तः कुरुत मुनयो मोह-
शमनम् ॥ ५८ ॥ कुरीतीनां नाशो भवति हि च रूढेरपि तथा,
सहावासः पश्चादनुभवजविज्ञानमभवत् । तदा प्रेम्णाऽऽमोदैः सह
दमशमादेः सुकरणं, जनाधारे जैने निवसति सदा चित्तमचलम् ॥५९॥
स साम्योत्कर्षे वा भवति सहवासस्य जनकं, परं च ज्ञानस्योत्कटकमपि
तस्यास्ति फलदम् । यदाऽभ्यासासक्तं मुनिमपि वदन्त्याहितजनाः,
समं केन स्पर्द्धा निगमसकलाऽध्यात्मविदुषा ॥ ६० ॥ सुविद्यावृ-
द्ध्यर्थं यदि मनसि चिन्ताऽप्युदयते । तदा स्पर्द्धावृद्धिर्निखिलमुनिसंघे
विलसति । तदा विद्यालाभो भवति मुनिवृन्दैरधिगता । भवे विख्यातिः
स्यान्निजनिजमताचारवशतः ॥ ६१ ॥ विना स्पर्द्धां नापि प्रसरति
समुत्साहविषयः । सहावासे चैवं न लगति मनश्चंचलतया । विनान्तः
स्वाध्याये न वसति धियो वृत्तिरचला । ततो विद्यालाभो भवति विदुषां-
मोदसहितः ॥ ६२ ॥ सहाध्यायिनं वा सहावासिनं वा, विनाधीत-
विद्याविनोदप्रचारः । सहाचारिणं चान्तरा नो विचारी, ततो नो भवे-
च्छास्त्रतत्वावबोधः ॥ ६३ ॥ तथा नावलोको भवेच्छास्त्रचर्या, विना
तत्कृते नैव पुष्टिं प्रयाति । न काठिन्यकं स्थायिभावं तथैव, चिरं
चित्तभित्तौ मुहुश्चिन्तयध्वम् ॥ ६४ ॥ तथाऽध्ययनतोऽध्यापनाद्वा विचा-
रात्समुत्पद्यतेऽपूर्वशक्तिप्रवाहः । यदैकत्रवासो मिलित्वाऽखिलानां, तदा
यत्र येषां प्रवेशोऽधिकोऽस्ति ॥ ६५ ॥ प्रवीणोऽथवा वै विशेषाधि-
कारी, सहाचारिणे वा सहाध्यायिने च । सहावासिने वा प्रवीणं
करोति, भवेत्तस्य सौख्यं नितान्तं मुनीनाम् ॥ ६६ ॥ स्वकीयेन तुल्यं
च योग्यं विधाय, समाजे समुत्तेजनां वै करोति । अतो भेदभावं
परित्यज्य शक्तिं, स्वकीयां तथा योग्यतां सन्तनोतु ॥ ६७ ॥

चरित्रं सुविद्यां परस्मै ददातु, सुवक्तृत्वबोधोऽस्ति केषां विशेषः। तदा तत्कला चापि देया परस्माययं नो विचारो हृदा धारणीयः ॥६८॥ स्वविद्या मया दीयते चेत्परस्मै, तदा तस्य लोके प्रतिष्ठाऽधिका स्यात्। तथा योग्यता वृद्धिरेवं प्रयाति, विचारं च नैवं कदाचित्करोतु ॥ (पठित्वा च विद्या प्रदानेऽधिका स्यात्) ॥ ६९ ॥ तदा ज्ञानवृद्धिश्चरित्रप्रवृत्तिर्गरिष्ठो जनेऽथो भवेस्त्वं विचार्य्य। परस्मै कुरुष्वार्पणं स्वं गुणानां, समाजे प्रवृत्तिर्विधेया सुखेन ॥ (तथाऽनन्यभावेन प्रीतिं विधाय) ॥ ७० ॥ यथा यश्च यस्मै विधत्ते च भावं, तथैवेतरोऽपि करोत्यात्मभावम्। धिया प्रेमभावो विचार्य्यैव कार्यो, यतोऽन्योन्यसंमेलन स्यात्सुसौम्यम् ॥ ७१ ॥ न याचे गुरोः पादसेवातिरिक्तं, विरक्तिं तु वाऽऽध्यात्मविद्याप्रशक्तिम्। परं प्रेमतः साधुभावं प्रयाचे, समाजोन्नतिर्येन मे तद्विधेहि ॥ ७२ ॥ त्रिधा तापतप्तोऽहमस्मिन् भवाब्धौ, कथं मे निवृत्तिर्भवेद्दुःखराशेः। अतो मेऽभिलाषामिमां पूरयस्व, गुरो ! स्वां दयां मे विधायाथ भावात् ॥ ७३ ॥ जीवत्राणकरी निधाय विशदामास्येऽनिशं पट्टिकां, काये चोलपटं विलुंचितशिखः कक्षे सितां मार्जनीम्। विद्याशून्यमुखारविन्दहृदयः श्राद्धादिकैर्गीयते, लोकान् शिक्षयितुं सुवेशरचना यस्यास्ति तस्मै नमः ॥ ७४ ॥ उपर्युक्तमर्थं हृदा धारयित्वा, सुविद्याविनोदे मनो धारणीयम्। न हास्यं भवेत्ते सभायां मुनीश! ह्यतो विद्यया सर्वमान्यो भवेस्त्वम् ॥ ७५ ॥ परं भावुकत्वं च सद्वृत्तिरेवं, सदाचारता चोच्चता भावनायाः। तथैवोन्नतत्वं चरित्रस्य भावि, जनाः प्रेमदृष्ट्या प्रतिष्ठां प्रकुर्य्युः ॥ ७६ ॥ प्रतिष्ठाऽपि संसारमध्येऽधिका स्यात्समाजेऽपि विद्वान् भवेच्चोपदेष्टा। तथा वक्तृतादायको ग्रन्थकारः, सुजाते महावीरदेवस्य शिक्षाविभागेऽधिका चोन्नतेर्वर्धिका

स्यात् ॥ ७७ ॥ भवेत्काचिदित्थं जने योग्यता च, तथा शक्तिभाग्नोऽस्ति यस्मिन् विशेषः। प्रदेयस्तदान्ये नरे भक्तितश्च, सुविज्ञानवृद्धिस्तथा शक्तिवृद्धिः ॥ ७८ ॥ स्वशक्तेस्तथा योग्यतायां च विद्योपयोगस्य वृद्धौ च संयुक्तवीर्य्ये। ध्रुवं योजनीयं ध्रुवं योजनीयं, स्वचित्तस्य शंकां निराहृत्य लोके ॥ ७९ ॥ [ अथ परोपकृतिः ] शिक्षाप्रेमधराः पवित्रहृदया भिक्षार्थिनो ध्यानतो, ज्ञायन्तां प्रतिजीवकार्यसमये लक्ष्यात्मविन्दुं मुहुः। मत्वानन्तपरोपकारकरणे शूरा भवन्त्वाहिता, लक्ष्यं नैव कदापि विस्मृतिपथं कर्तव्यमेवं विदुः ॥ ८० ॥ धर्म्मे नोन्नतिकार्यगौरववशान्नान्यत्ररोधे करः, येन स्यादुपकारकेऽनुदिवसं लोकोपकारी भवेत्। न स्थानं च क्वचित्प्रदेयमधुना भेदस्य भावस्य च, सामाजे वितरन्तु कार्यपरतां ध्यात्वा हृदा भिक्षुकाः ॥८१ साहाय्यं च भवेज्जनान्तरमुदेऽन्योन्यं विचारेण च, शक्तौ स्याद्दृढताबलं विवरणादेकं विचारस्य वा। तन्माहात्म्यबलं भविष्यति पुनः स्यादुन्नतत्वेन हि, संयुक्तस्य बलस्य वर्द्धनमथो स्यान्नोऽप्यनायासतः ॥ ८२ ॥ एकस्यान्यसहायकोऽनुदिवसं भूत्वा सहायं कुरु, स्वान्ते वासकराय देयमखिलं नो वा विचारो मुने! विद्यैवं च समाजके प्रसरति लोकोपकारस्ततो, ज्ञात्वा सर्वमिदं विचारनिरताः श्रेयस्करा बुध्यताम् ॥ ८३ ॥ [ अथाऽऽधुनिका सम्यक्त्वादानरूढिः ] अद्यानद्यभवे च भिक्षुकवरेष्वाधीनजैनेषु च, सम्यक्त्वं प्रविधाय योगमिषतः शिष्यं स्वकीयं तथा। भक्तं पक्षधरं विनेतुमसतां रूढिर्विचित्रा मता। भीत्या सार्द्धमियं प्रवृद्धिरतुला वात्या स्वरूपेण च ॥ ८४ ॥ भूकम्पोऽयमितीव शेषविषयाज्ज्ञेयो मुनीन्द्रैरतो। वृक्षाणामिव सहतेश्च नितरां स्याद्येन नाशो मुहुः ॥ सम्यक्त्वस्य तथान्धसंघविलसच्छ्र-

द्धाऽपि नोत्पद्यते । अन्यत्रापि न भक्तिभावसंहितप्रेमोपकारादिकम् ॥ ८५ ॥ शुश्रिभावसहानुभूतिरपि च जंजन्यते नो मुनौ, तस्यैव ग्रहणे सदा हि निरतो भक्तोऽपि दासोऽपि च । सम्यक्त्वस्य विता-ननोत्तरमदः सञ्जायते वा ततः, सम्यक्त्वाच्च तथास्तिकत्वमपि च माध्यस्थ्यकत्वं पुनः ॥ ८६ ॥ वैषम्यं च भवेद्यतोनुदिवसं दूरं तथा निष्ठता, सत्वस्याऽप्यनुवर्तनं सरलता चायाति सौजन्यता ॥ आत्मीय-त्वमथो गुणग्रहणता सत्यं सुसेवा परा। (ज्ञातव्यं सफलं मदीयसुमते ! सम्यक्त्वकस्याधुना,) दृश्यन्ते प्रतिकूलता गुणगणा ज्ञातव्यमेवं बुधैः ॥ ८७ ॥ आत्मज्ञानपरायणाः सुजनतासक्ता जिनोपासकाः, कामक्रोधविवर्जिताश्च शमतो रागादिशून्याशयाः । सज्ज्ञानाभिनिविष्टधर्म-रसिकाः सद्दानशीलानुगास्त्यक्तेर्षाश्च परोपकारनिरता जैना भवन्तीदृशाः ॥ ८८ ॥ कालेऽस्मिन्नहि दर्शनस्य विषयः कण्ठी यथा स्याद्गुरो-रातङ्को विषमत्वकस्य सुतरामाच्छादयत्याशु नः । भूकम्पोऽपि च पक्षपातविषये चायात्यनायासतो, रागद्वेषसमाजवृद्धिरतुला निन्दा तथा-न्यस्य च ॥ ८९ ॥ बीजारोपणकारकस्त्वमनसा सद्दर्शने वा गुरुर्भक्तं स्वस्य च सेवकं पुनरहो कृत्वा वदत्यादरात् ॥ पश्येतो वचने मदीय-रचने ध्यानं कुरुष्वाहितः, शिष्यस्त्वं मम साधकोऽसि च गुरुरद्या-वधि ज्ञायताम् ॥ ९० ॥ मत्तोऽन्य न हि मन्यतां गुरुवरं साधुर्वरो ज्ञायतां, सन्त्यन्ये यतिपार्श्वगाश्च भवता सन्दृश्यतां ध्यानतः । नान्य-स्मिन्नमने शिरस्तव मया त्यक्तं मदीयानुगे, मत्पादाम्बुजवन्दनं प्रति-दिनं भक्त्या कुरु प्रेमतः ॥ ९१ ॥ व्याख्यावं न हि चेतरस्य सुखतः सश्रूयतां वा कचित्स्वक्षेत्रे न च दीयतां निवसनं तेभ्यश्च नो स्थाप्यताम् । चातुर्मास्यव्रतं न तैरपि सह कर्तव्यमेवं धिया । पानीयं न च भोजनं

पुनरथो तेभ्यश्च देयं क्वचित् ॥ ९२ ॥ नेदं सर्वमपस्मृतिं कुरु न चेत्स्वर्गोऽपि न स्याद्गतिर्धर्मे मोक्षपथं च नाकमथवा स्वस्यैव पाणौ स्थितम्। जानन्त्येवमहं शुभोऽस्मि निखिलादन्येऽवराः सन्ति च, श्रद्धेयं परिज्ञायतामविरतं स्यादन्धकारावृताः ॥ ९३ ॥ अस्त्यन्योऽपि महानुभावविषयः सन्धार्य्यतां चित्ततः, सम्यग्दृष्टप्रदत्तमन्यमुनिभिस्त्यक्त्वा च तत्स्वं पुनः। सम्यक्त्वं च प्रदाय नैव कुरुते सर्वोत्पथं मानतः, केचित्स्वस्य समीपके च रहसि संलेखयित्वा मुदा ॥ ९४ ॥ संस्थाप्योत्तमग्राहकेण सदृशो नामाङ्कितं पुस्तकं । तीर्थस्थाश्च स्वकीयपत्रनिचये संलिख्यते नाम च ॥ यात्रार्थं च जनाः प्रयान्ति नितरां तेषां यथा यत्नतस्तद्वज्जैनमतावलम्बनपराः कुर्वन्ति कुत्सान्विताः ॥९५॥ कठोरात्मिकायाश्च निन्दास्पदायाः, प्रवृत्तेश्च सञ्जायते कुग्रहत्वम्। ममत्वान्धकारेण संछादनं स्यात्तथा रागद्वेषादिकस्थानमेतत् ॥ ९६ ॥ सम्यक्त्वसंयुक्तबले च सम्यङ् मन्दत्वमायातमितो विचिन्त्यम्। मदीयसम्यक्त्वबलस्य मूलं, संछिद्यते कुत्सितया च रीत्या ॥ ९७ ॥ अतोऽस्य रोगस्य चिकित्सकत्वं, कर्तव्यमेवं कुप्रथाप्रणाशः। तदेकदेशस्य मलं विधाय, धर्म्मे भयङ्कारि च राजयक्ष्मा ॥ ९८ ॥ रोगो यथोत्पन्नतया करोति, विकारतामात्मतृतीयकेऽन्तः। महाननर्थो भवतीति ज्ञेयं, गृहस्थरागात्मकदृष्टिभावः ॥ ९९ ॥ विधाय दोषं परितः करोति, तथाऽनिशं पुत्तलिकेव दृष्ट्या। सन्नर्तयन्त्यत्र विवर्द्धनं च, वैषम्यभावस्य निशम्य योगिन्! ॥ १०० ॥ स्वकीयजालस्य महाधिकारं, सन्त्रोटयच्चैव स्वयं च सम्यक्। त्वदीयजालेन विशन्ति लोकाः, कुतश्च लोके प्रविवेकबुद्ध्या ॥ १०१ ॥ जानन्ति सर्वे च वरावरं वा, विचारसारस्य करोति भावम्। धावन्ति ते चान्धपरम्परातो, दूरं परं क्रोशमितं

वरिष्ठाः ॥ १०२ ॥ कृते चाभिमाने तपस्याविनाशः, समाजोन्नतौ जायते विघ्नसंघः । अतश्चाभिमानं न वै धारणीयं, न वै धारणीयं न वै धारणीयम् ॥ १०३ ॥ महापक्षपाताभिमानाभिभूताश्चरन्त्यात्मनः कुमथां लोकगर्हाम् । समुत्पद्यते योगिनी मोहमाया, ततो बध्यते तत्कृते भोगजाले ॥ १०४ ॥ मुनिजनहृदि भानुर्ज्ञानरूपी यदैति । सकलदुरितनाशो जायते चाप्रयासात् ॥ विकसति यदि पद्मं ज्ञान-चारित्ररूपं । भवति मनसि शान्तिर्योगसिद्धिस्ततः स्यात् ॥ १०५ ॥ गृहस्था न चास्मिन्महामोहजाले, निबद्धुं त्वदीये समर्था भवन्ति । महावीरसंघे मिलित्वा च सर्वे, भवेयुश्च श्रद्धालवो जैनश्राद्धाः ॥१०६॥ सदा संघसम्बन्धमात्रेण सर्वं, स्वकीयं विदित्वा कुरुष्वात्मरूपम् ।

[ अथ शरीरसाहाय्यदानम् ] यदा रोगयुक्तो भवेत्कोऽपि साधुः, कचित्कश्चिदेवं च देशान्तरस्थः ॥ १०७ ॥ न चेच्चानुकूल्यं जलं वायु-रेवं, न तेषां सुखाधायको देश एव । चिकित्सालयं नास्ति तद्देशमध्ये, न वा साधनं किञ्चिदन्यं विदित्वा । तदा तत्र देशे विहारे प्रवृत्तैर्मुदा साधुवर्य्यैश्च ही दोलिकायाम् ॥ १०८ ॥ समारोप्य वा स्कन्धमारोप-यित्वा, समानीयतामन्यदेशेऽनुकूले । यदा सम्प्रदायस्य भेदो हि छिन्नस्तदेवं भवेन्नान्यथा वै शुभं स्यात् ॥ १०९ ॥ केचित्स्वार्थपरा-यणाश्च मुनयः केचित्स्वकुक्षिंभराः, सन्त्यन्ये श्रुतसञ्चयेऽपि निरताः केचित्स्वधर्मच्युताः ॥ विद्यारत्नसुवञ्चिताल्पमतयो मूढाश्च केचिद्ध्रुवं, केचित्साधनसारशून्यहृदयास्ते वै कथं पारगाः ॥ ११० ॥ मुनिः सेव-नाख्ये निजे धर्मवृद्धेर्मुहुश्चान्तरात्मातिपूतो विभाव्य । सुशय्यंभवैः सूरिभिर्वर्णितं च, महत्त्वं भवे भव्यभावेन सिद्धः ॥ १११ ॥ ततस्तस्य सम्बन्धभावो महान् हि, यतस्तेन सेवाख्यधर्म्मप्रचारः । मवाङ् नाम

पुत्रो ह्यनेनैव शुद्धो, मुदा कारितः साधुसेवाप्रचारः ॥ ११२ ॥ इदं नावरुद्धं भवत्तो विचार्य्यो, यदा तस्य सत्यस्य नाम्नो मुनीशाः । गृहीतार एवं कदा ग्राहकत्वान्निवृत्ता भवेयुश्च पंकेन तुल्यात् ॥ ११३ ॥ पुनः साधुसेवा सुकायेन कार्या, श्रुतेनाथ चित्तेन वाचा विमृश्य । स्वकीयं परं चेति भेदं विहाय, ह्ययं रागद्वेषान्विते भेदवादः ॥ (न वाऽन्यत्र भेदोऽयमेवं विभाव्य, करोत्वञ्जसा साधुसेवा मतस्थः) ॥११४॥ वसुधैव कुटुम्बकमित्युक्तिश्चरितार्थता । कर्तव्याखिलभावेन, भवद्भिर्धर्मसिन्धुभिः ॥ ११५ ॥ यद्रम्यं श्रवसो मिताक्षरयुतं पीयूषकल्पं वचः, श्रोतॄणां हृदयान्धकारहरणं व्याख्यानमेतज्जगुः । व्याख्याता उभयागमादिजनितज्ञानेन्दुना भूषितो, ये शृण्वन्त्युपदेशमेकमनसा श्रोतॄन् विदुस्तान् नरान् ॥ ११६ ॥ व्याख्यानस्य सुगन्धमस्ति शिरसि मद्भिक्षुकाणां मुहुर्यावद्बुद्धिबलोदयं मुनिगणास्तावच्च व्याख्यानकम् । श्राद्धेभ्यश्च सुश्रावयन्ति मनसा महता प्रयत्नेन च । श्रोतारं परिकथ्यतेऽनुदिवसं मेऽद्योपदेशं शृणु ! ॥ ११७ ॥ यः कश्चित्परदेशगोऽस्ति चतुरो विद्वान् सभायां महान्, व्याख्यानं च कथा तदीयमुखतः श्राव्या कदाचिन्न हि । श्रोतव्या च सदैव मेऽत्र मुखतः सन्धार्य्यतां प्रेमत, एवं ते कथयन्ति साधुनिपुणा ये दास्यभावं गताः ॥ ११८ ॥ देशान्तरागतः साधुः, सम्प्रदायेतरः पुनः । समाचारी प्रभिन्ना वा, मद्देशे च समागतः ॥ ११९ ॥ मदग्रे नो कथा कर्तुं, समर्थो न च श्रूयताम् । विना मदाज्ञया किंचिन्नोश्रावयितुमीश्वरः ॥ १२० ॥ लघुत्वस्य विचारोऽयं, प्रदेशान्तरगो भवेत् । तदर्थं न हि स्यादेवं, प्रतिष्ठा नैव चाश्रयः ॥ १२१ ॥ श्रावकाणां च सौभाग्यं, यद्यागन्तुकसाधवः । प्रवासिनः समायान्ति, तेषां व्याख्यानमुत्तमम् ॥ १२२ ॥ श्रोतव्यमथ

कर्तव्यमिति निश्चीयते यदा। साम्प्रदायिकधर्मस्य, मोक्षस्य शुल्कदायकाः ॥ १२३ ॥ कलहं कुर्वतेऽन्योन्यं, मत्क्षेत्रे स्थानके तथा। मदाम्नाये तथा लोके, देशान्तरागतो मुनिः ॥ १२४ ॥ व्याख्यानं न हि कर्तुं च, समर्थो जायते क्वचित्। ममापमानं भवति, प्रतिष्ठाहानिरेव च ॥ १२५ ॥ यो वीतरागोऽस्ति मुनिर्विवेकी, स्वसाधनासक्तधियोऽपि रागात्। सोऽप्यन्यव्याख्यानवरातिदुःखं, प्राप्नोति तापं च महद्धि कष्टम् ॥ १२६ ॥ तथोदरं ताडयतीति दुःखाद्धा! शब्दमत्रापि करोति नूनम्। न वा तपस्वी न च संयमी वै, न वास्ति जैनाश्रितधर्मरूढः ॥ १२७ ॥ धिगस्तु नः कुत्र गतः स कालः, श्रीगौतमः केशिमुनिश्च यत्र। परस्परं प्रेमसरित्प्रवाहो, वाह्यो महाधर्मरतैकृतश्च ॥ १२८ ॥ क्व चाद्यकालीनगतः स साधुर्यश्चोपदेशे हि करोति तापम्। श्रुत्वाऽन्यसाधोश्च न भाति चित्ते, श्रोताद्य कुर्य्याच्च महत्त्वपापे ॥ १२९ ॥ श्रुतं त्वया चाद्य मतान्तरस्थसाधोर्मुखाद्धर्मविरुद्धवाक्यम्। व्याख्यानरूपं च करोति शान्तिं, न ते भवेच्छ्रेय इति प्रधार्य ॥ १३० ॥ श्रद्धानकं नष्टमिति प्रधार्य्य, तथास्तिकत्वं च गतं भवेत्ते। अतो न साध्वन्तरतो सुधीश! न श्राव्यमेवं च वदन्ति सन्तः ॥ १३१ ॥ हे भिक्षुकाश्चेद्दशरोगयोगान्नष्टा भवन्तश्च मृतः समाजः। तद्द्वेषरागाच्च महत्त्वहानिमुत्थापयन्तीति विचारणीयम् ॥ १३२ ॥ एवं न कर्तव्यमथो दयां च, समाजसंघे कुरुत प्रयत्नात्। प्रेमाभिलाषेऽभिरतश्च लोको, भवेच्च प्रेम्णा समतोपनद्धः ॥ १३३ ॥ सदैक्यभावे न बुभूषुरेवं, यत्र स्थितास्तत्र विदेशगानाम्। आगन्तुकानां च मुनीश्वराणां, देयं भवद्भिश्च निवासयोग्यम् ॥ १३४ ॥ सुस्थानकं स्वीयसहाधिवासी, स्वाद्येन भावेन कुरुध्वमेवम्। एकासने चाप्युपविश्य

सुज्ञाः, शृण्वन्तु व्याख्यानमनन्यभावात् ॥ १३५ ॥ पश्चाद्भवन्तोऽपि सुशासनं वरं, तन्वन्तु यत्नाच्च तथोपदेशम् । कुर्वन्तु वृद्धिं च प्रशासनस्य, सुस्वागतं चापि तथैव सुज्ञाः ॥ १३६ ॥ साध्यं ह्युत्तममेकमेव मुनयः सर्वे मिलित्वा हृदा । स्वाचार्यं परिकल्पयन्तु सुधियं विद्याचरित्रात्मकम् ॥ येन स्याच्च समाजकोन्नतिदशा शिक्षाविभागस्य च । नो चेद्धर्म्मविपर्य्ययस्य समयो जातोऽवधार्य्यं बुधैः ॥ १३६ ॥ संस्थाप्या किल भारतस्य जनता पोते च संघात्मके । सिद्धाख्यं नगरं ह्युदारचरिता संस्थापयन्त्वाहिताः ॥ एतावत्करणेन याति भवतां पारत्रिकं चैहिकं । सर्वं कार्यमदभ्रमेव विषयासक्तं मनोहीयताम् ॥१३७॥ स्वादर्शं च जगद्भवन्तमधुना जानातु चात्मा पुनर्लोके नाम भवेद्यतोऽनुविततं ह्यात्मानुसन्धानतः ॥ एवं धर्मपरायणो यदि भवेस्ते स्याच्च कीर्तिः परा । तस्मात्संघविवर्धनाय भवतां स्याच्चेत्प्रवृत्तिश्शुभा ॥१३८॥

[ अथ क्षमाऽभ्यर्थना ] भवान् वीरपुत्रोऽस्ति शान्तात्ममूर्तिरहिंसा तपस्यान्वितः सत्यग्राही । तथा चात्मनोऽत्यन्तसूद्धारकोऽस्ति, पुनर्वीतरागानुकारं करोति ॥ १३९ ॥ नयनेन्दुसंख्योत्तरके शतस्य, दिनावधित्वं कुरुते तपस्याम् । अतस्तपस्विप्रवरोऽस्ति लोके, चोपाधिधार्य्यस्ति विचारणीयम् ॥ १४० ॥ त्वत्पृष्ठतो विश्वमिदं च लग्नमहं च स्वल्पज्ञमतिर्न मेऽस्ति । स्वात्मानुभावोऽपि न साक्षरोहं, व्याख्यानदानेऽपि न मेऽस्ति शक्तिः ॥ १४१ ॥ प्रसिद्धवक्तापि न चास्मि विद्वान्, किन्त्वल्पबुद्धिस्तव बालकोऽहम् । सद्भावतस्ते विदधामि सेवां, तथाऽस्मि संयुक्तबलाभिलाषी ॥ १४२ ॥ रागादिकं वै चिकीर्षामि मन्दं, मत्तो यदि च्छद्मतयाऽपमानम् । जातं तदा विस्मृतिरापराधस्तथा हि शुद्धान्तरभावनातः ॥ १४३ ॥ क्षमा विधेयातिकृपा-

नुरागात्, समासिमेतस्य हि संकरोमि । परन्तु प्रष्टुं यतते मदीया, बुद्धिः प्रसन्नोऽसि च पृच्छ्यते मया ॥ १४४ ॥ मदीयवार्ता कटुकास्ति किन्तु, क्षमा भवेन्नात्र विचारणीयम्। यदा मदीया कटुकाऽस्ति वाणी, ज्ञातव्यमेवं च मदीयरोगाः ॥ १४५ ॥ शाम्यन्ति कट्वौषधिसेवनेन, शीघ्रं भवेद्रोगनिवृत्तिरेवम् । भुक्त्वा च कट्वौषधमुग्रतेजो, रोगी ध्रुवं पावयतेऽतिशीघ्रम् ॥ १४६ ॥ तद्रोगशान्तिर्भवतीति ज्ञात्वा, मदीयवार्तामपि संसहस्व । स्वकीयभावान्न हि रोद्धुमस्ति, शक्तिर्मदीयेति विभावनीयम् ॥ १४७ ॥ महानुभावोऽस्ति च दुर्बलोऽसि, तथाऽसमर्थोऽहमिति प्रधार्य्य । क्षमा विधेया च महात्मनस्तु, भवन्ति क्षान्तेश्च सुभाजनानि ॥ १४८ ॥ गुरुर्मदीयोऽस्ति फकीरचन्द्रो, ज्ञानं मया लब्धमिदं यतश्च । बोधं च लब्ध्वा सुक्रियां करोमि, ततोऽमरत्वं च भवेत्स्फुटं मे ॥ १४९ ॥

इति ममाक्रन्दनकाव्यम् ॥

---

## ज्ञातृपुत्र-महावीरका सिद्धान्त

(१) जगत्में दो द्रव्य मुख्य [ substances ] हैं, एक जीव [ soul ] दूसरा अजीव [ non soul ] । अजीवके पुद्गल [ matter ] धर्म [ medium of motion to soul and matter ] जीव और पुद्गलके चलनेमें सहकारी । अधर्म medium of rest to soul and matter जीव और पुद्गलके ठहरनेमें सहकारी । काल Time वर्तना लक्षणवान् और आकाश Space स्थान देनेवाला । इस प्रकार पांच भेद हैं ।

(२) स्वभावकी अपेक्षा सब जीव समान और शुद्ध हैं, परन्तु अनादिकालसे कर्मरूप पुद्गलोंके सम्बन्धसे वे अशुद्ध हैं, जिस प्रकार सोना खानसे मिट्टीमें मिला हुआ अशुद्ध निकलता है ।

सुज्ञाः, शृण्वन्तु व्याख्यानमनन्यभावात् ॥ १३५ ॥ पश्चाद्भवन्तोऽपि सुशासनं वरं, तन्वन्तु यत्नाच्च तथोपदेशम् । कुर्वन्तु वृद्धिं च प्रशासनस्य, सुस्वागतं चापि तथैव सुज्ञाः ॥ १३६ ॥ साध्यं ह्युत्तममेकमेव मुनयः सर्वे मिलित्वा हृदा । स्वाचार्यं परिकल्पयन्तु सुधियं विद्याचरित्रात्मकम् ॥ येन स्याच्च समाजकोन्नतिदशा शिक्षाविभागस्य च । नो चेद्धर्मविपर्य्ययस्य समयो जातोऽवधार्य्यं बुधैः ॥ १३६ ॥ संस्थाप्या किल भारतस्य जनता पोते च संघात्मके । सिद्धाख्यं नगरं ह्युदारचरिता संस्थापयन्त्वाहिताः ॥ एतावत्करणेन याति भवतां पारत्रिकं चैहिकं । सर्वं कार्यमदभ्रमेव विषयासक्तं मनोहीयताम् ॥१३७॥ स्वादर्शं च जगद्भवन्तमधुना जानातु चात्मा पुनर्लोके नाम भवेद्यतोऽनुवितर्त ह्यात्मानुसन्धानतः ॥ एवं धर्मपरायणो यदि भवेस्ते स्याच्च कीर्तिः परा । तस्मात्संघविवर्धनाय भवतां स्याच्चेत्प्रवृत्तिश्शुभा ॥१३८॥

[ अथ क्षमाऽभ्यर्थना ] भवान् वीरपुत्रोऽस्ति शान्तात्ममूर्तिरहिंसा तपस्यान्वितः सत्यग्राही । तथा चात्मनोऽत्यन्तसूद्धारकोऽस्ति, पुनर्वीतरागानुकारं करोति ॥ १३९ ॥ नयनेन्दुसंख्योत्तरके शतस्य, दिनावधित्वं कुरुते तपस्याम् । अतस्तपस्विप्रवरोऽस्ति लोके, चोपाधिधार्य्यस्ति विचारणीयम् ॥ १४० ॥ त्वत्पृष्ठतो विश्वमिदं च लग्नमहं न्न स्वल्पज्ञमतिर्न मेऽस्ति । स्वात्मानुभावोऽपि न साक्षरोहं, व्याख्यानदानेऽपि न मेऽस्ति शक्तिः ॥ १४१ ॥ प्रसिद्धवक्तापि न चास्मि विद्वान्, किन्त्वल्पबुद्धिस्तव बालकोऽहम् । सद्भावतस्ते विदधामि सेवां, तथाऽस्मि संयुक्तबलाभिलाषी ॥ १४२ ॥ रागादिकं वै चिकीर्षामि मन्दं, मत्तो यदि च्छद्मतयाऽपमानम् । जातं तदा विस्मृतिराःपराधस्तथा हि शुद्धान्तरभावनातः ॥ १४३ ॥ क्षमा विधेयातिकृपा-

नुरागात्, समासिमेतस्य हि संकरोमि । परन्तु प्रष्टुं यतते मदीया, बुद्धिः प्रसन्नोऽसि च पृच्छ्यते मया ॥ १४४ ॥ मदीयवार्ता कटु-कास्ति किन्तु, लज्जा भवेन्नात्र विचारणीयम्। यदा मदीया कटुकाऽस्ति वाणी, ज्ञातव्यमेवं च मदीयरोगाः ॥ १४५ ॥ शाम्यन्ति कट्वौषधि-सेवनेन, शीघ्रं भवेद्रोगनिवृत्तिरेवम् । भुक्त्वा च कट्वौषधमुग्रतेजो, रोगी ध्रुवं पावयतेऽतिशीघ्रम् ॥ १४६ ॥ तद्रोगशान्तिर्भवतीति ज्ञात्वा, मदीयवार्तामपि संसहस्व । स्वकीयभावान्न हि रोद्धुमस्ति, शक्तिर्मदी-येति विभावनीयम् ॥ १४७ ॥ महानुभावोऽस्ति च दुर्बलोऽस्मि, तथाऽसमर्थोऽहमिति प्रधार्य्य । क्षमा विधेया च महात्मनस्तु, भवन्ति क्षान्तेश्च सुभाजनानि ॥ १४८ ॥ गुरुर्मदीयोऽस्ति फकीरचन्द्रो, ज्ञानं मया लब्धमिदं यतश्च । बोधं च लब्ध्वा सुक्रियां करोमि, ततोऽमरत्वं च भवेत्स्फुटं मे ॥ १४९ ॥

इति ममाक्रन्दनकाव्यम् ॥

---

## ज्ञातृपुत्र-महावीरका सिद्धान्त

(१) जगत्में दो द्रव्य मुख्य [ substances ] हैं, एक जीव [ soul ] दूसरा अजीव [ non soul ] । अजीवके पुद्गल [ matter ] धर्म [ medium of motion to soul and matter ] जीव और पुद्गलके चलनेमें सहकारी । अधर्म medium of rest to soul and matter जीव और पुद्गलके ठहरनेमें सहकारी । काल Time वर्तना लक्षण-वान् और आकाश Space स्थान देनेवाला । इस प्रकार पांच भेद हैं ।

(२) स्वभावकी अपेक्षा सब जीव समान और शुद्ध हैं, परन्तु अनादि-कालसे कर्मरूप पुद्गलोंके सम्बन्धसे वे अशुद्ध हैं, जिस प्रकार सोना खानसे मिट्टीमें मिला हुआ अशुद्ध निकलता है ।

(३) उक्त कर्ममलके कारण इस जीवको नाना योनिओंमें अनेक सङ्कट भोगने पडते हैं और उसीके नष्ट हो जानेपर यह जीव अनन्तज्ञान-अनन्त-दर्शन-अनन्तसुख और अनन्तशक्ति आदिको जो कि इसकी निजी सम्पत्ति है और जिसे मुक्ति कहते हैं वह प्राप्त करता है।

(४) निराकुलता लक्षणयुक्त मोक्ष सुखकी प्राप्ति इस जीवके अपने निजी पुरुषार्थके अधिकारमें है किसीके पास मांगनेसे नहीं मिलता।

(५) पदार्थोंके स्वरूपका यह सत्य श्रद्धान [ Right belief ] सत्य-ज्ञान [ Right knowledge ] और सत्य आचरण [ Right conduct ] ही यथार्थमें मोक्षका साधन है।

(६) वस्तुयें अनन्त धर्मात्मकहैं, स्याद्वाद ही उनके प्रत्येक धर्मका सत्यतासे प्रतिपादन करता है।

(७) सत्य आचरणमें निम्नलिखित बातें गर्भित हैं, यथा—

[ क ] जीव मात्र पर दया करना, कभी किसीको शरीरसे कष्ट न देना, वचनसे बुरा न कहना, और मनसे बुरा न विचारना।

[ ख ] क्रोध-मान-माया-लोभ और मत्सरआदि कषायभावसे आत्माको मलिन न होने देना, उसे इनके प्रतिपक्षी गुणोंसे सदा पवित्र रखना।

[ ग ] इन्द्रियों और मनको वश करना एवं बाह्य संसारमें लिप्त न होना।

[ घ ] उत्तम क्षमा-निर्लोभ-सरलता-मृदुलता-लाघव-शौच-संयम-तप-त्याग-ज्ञान ब्रह्मचर्यादि लक्षणात्मक धर्मको धारण करना।

[ च ] झूठ-चोरी-कुशील आदि निन्द्य कार्योंसे ग्लानि करना।

(८) यह संसार स्वयं सिद्ध अर्थात् अनादि अनन्त है, इसका कर्ता हर्ता कोई नहीं है।

(९) आत्मा [ soul ] और परमात्मा [God] में केवल विभाव और स्वभावका विशेष है। जो आत्मा रागद्वेषरूप विभाव को छोडकर निज स्वभावरूप हो जाता है उसे ही परमात्मा कहते हैं।

(१०) ऊंच-नीच-छूत-अछूतका विकार मनुष्यका निजका किया हुआ विकार है वैसे मनुष्यमात्रमें प्राकृतिक भेद कुछ भी नहीं है।

# शुद्धिपत्रम्

कृतेऽपि भूयसि संशोधनप्रयासे काश्चिदशुद्धयोऽवशिष्टा एवेति ताः कृपया अधोनिर्दिष्टसङ्केतानुसारं संशोध्यैव पठन्तु पाठयन्तु भव्यजनाः श्रावका मुनयश्चेति सविनयमभ्यर्थयतेऽयं लघुतम. पुष्पभिक्षुः ॥

| पृष्ठाङ्काः | पङ्क्तयः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १६ | ११ | जैनतरमतावलम्बी | जैनेतरमतावलम्बी |
| १९ | ५ | ० | अनन्तशक्ति |
| २१ | १५ | सम्यग्दर्शनका | सम्यग्दर्शनकी |
| २८ | ४ | मेल | मेल |
| २७ | २३ | भावन | भावना |
| ३९ | ५ | निशंकसे | नि शंकसे |
| ४८ | ११ | नस्वर | नश्वर |
| ,, | २१ | कार्माण | कार्मण |
| ५२ | २५ | वुद्धिष्शक्तिने | वुद्धिशक्तिने |
| ७३ | १६ | तेओ | ते |
| ९० | ११ | कल्मापास्रवकारणम् | कल्मषास्रवकारणम् |
| ९१ | २२ | पुरुषेष्वयि | पुरुषेष्वपि |
| १०० | ११ | वहभी | वह भी |
| १०० | २२ | इनकि | इनकी |
| १०१ | २ | कि | की |
| १०३ | २३ | इत्यभिधानप्यदीपिका | इत्यभिधानप्पदीपिका- |
| १०४ | ३ | सवशर्दोंम | सव शब्दोंमें |
| ,, | २५ | सेठे | सेठं |
| १०६ | ५ | तेन | तेने |
| १०९ | १० | धुनीका मताः | धुनिकाः |

| पृष्ठाङ्काः | पङ्क्तयः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ,, | ६ | योद्देषु | योद्धृषु |
| ,, | २१ | महावीरस्वामी | महावीरस्वामी |
| ११३ | २४ | नामभिद्रोहः | नामनभिद्रोहः |
| ११८ | २१ | ऽमानितः | ऽतिमानितः |
| ,, | २३ | दानस्यपधानत्वात् | दानस्य प्रधानत्वात् |
| १२२ | १९ | नापराद्धूमलं | नापराद्धुमलं |
| १२७ | १७ | एतेर्वर्गैः | एतैर्वर्गैः |
| १३० | ९ | र | २ |
| ,, | १५ | श्रीज्ञातनन्दम् | श्रीज्ञातनन्दनम् |
| १३२ | ११ | रक्षाकी | रक्षा की |
| ,, | १७ | की | कि |
| १४२ | १३ | प्रतिकार | प्रतीकार |
| १४४ | २२ | पत्निमें | पत्नीमें |
| १४५ | १२ | भमि | भगिनी |
| १४६ | १७ | क्योंकी | क्योंकि |
| १५६ | १ | इसपर | ० |
| १८७ | ४ | कषाया | काषाया |
| १९३ | १ | पूज्यनीय ! | पूजनीय ! |
| ,, | २ | मार्दवताकां | मार्दवका |
| २०० | ५ | वधादिकृदधैस्तदिति | वधादिकृदधस्तदिति |
| २०७ | १७ | इवागंजा | गजा इव |
| २२१ | २५ | भावनी | भाव थी |
| २२९ | १ | वुवोध | वोध |
| ,, | ६ | हतो | हीतो |
| २३६ | १ | अर्ध | ० |
| २४० | ८ | तथाऽन्यं च | तथाऽन्यस्य |

| पृष्ठाङ्काः | पङ्क्तयः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २४० | ८ | हि | च |
| २९२ | २१ | धर्म्मं | धर्म्मे |
| २९४ | ३ | जिव ! | जीव ! |
| २९६ | १२ | निजा | निजां |
| ,, | १९ | नंक्ष्यत्ति | नंक्ष्यति |
| २९९ | २० | समस्त्येद्धा | समस्त्येतद्धा |
| ३०५ | ४ | ऽश्नासि | ऽश्नाति |
| ३१३ | २४ | दश्यर्ते | दर्श्यते |
| ३१४ | २० | चैतना | चेतना |
| ३१७ | १७ | स्वसन् | श्वसन् |
| ३२० | १८ | मस्तुते | मश्नुते |
| ,, | २२ | ऐसा | ऐसे |
| ३२९ | २५ | दीनाना | दीनाँश्च |
| ,, | २८ | चलते | चलति |
| ३३० | २७ | श्वैदं | श्वेदं |
| ,, | २९ | शंकटान् | सकटान् |
| ३३१ | १२ | वेतिति | तेनेति |
| ३३६ | ९ | प्रयागमण्डल | प्रयागमण्डले |
| ३४१ | १९ | निसेवनम् | निवेशनम् |
| ३४७ | २९ | मादिनियमादि | यमादिकाना वि. |
| ३४८ | २८ | जनोप्यू | जनैरू |
| ३५३ | १४ | न भवद्योगवित्तमम् | न भवेद्योगवित्तमः |
| ३६९ | २५ | तद्रक्षस्वाधुना गुरो ! | रक्षमामधुना गुरो ! |
| ३७० | ९ | जगज्जलाम्भोधे | जगज्जलाम्भोधेः |
| ,, | १९ | पुष्पाञ्जली | पुष्पाञ्जलिः |
| ३७१ | ३१ | निरदार | निरादर |

| पृष्ठाङ्काः | पङ्क्तयः | अशुद्धम् | शुद्धम् |
| --- | --- | --- | --- |
| ३७२ | २२ | आपना | अपना |
| ,, | २५ | अन्यत्वता | अन्यत्व |
| ३७३ | ३ | एकत्वता | एकत्व |
| ३८१ | ९ | तरुः | तरु |
| ३८४ | ११ | वोधात्मिकीं | वोधात्मिकां |
| ३८७ | २१ | कश्चित्प्रवन्वो | कश्चित्प्रवन्धो |
| ३९९ | ६ | दीयतेऽद्य | दीयते यद् |

गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र, समादधति सज्जनाः ॥

विवृतिकारः

---

## दानी पुरुषोंकी नामावली

१००) शे० जगजीवन महता, मु० झरिया, १००) शेठ मानकचन्द महावीरप्रसाद, सुपुत्र शेठ ज्वालाप्रसादजी राजा वहादुर कलकत्ता, १००) शे० शिवलाल पोपट संघवी, झरिया, २००) शे० मनोहरलाल जैन, कानपुर, २०) शे० अमरचंद नाहर, कलकत्ता, २०) शे० सुजानमल पन्नालाल कलकत्ता, २०) शे० गोपीचंद हीरावत कलकत्ता, ११॥) शे० चादमल मूसल कलकत्ता, १३) शे० सुंदरलाल खारड कलकत्ता १४) शे० रतनलालजी वदलिया कलकत्ता, ७) शे० मागीलाल वोरडिया सरवाड.

पुस्तकें मिलनेका पता—

मन्त्री—ज्ञातपुत्र महावीर जैनसंघ,

मु०, पो०, पाटोदी, [ स्टेट ]

जि० गुडगाँव ( पंजाव )